Deccan College Monograph Series : 31

PRAUḌHA MANORAMĀ

with Commentary

ŚABDARATNA

Volume 1

CRITICALLY EDITED BY
VENKATESH LAXMAN JOSHI

POONA
1966

Deccan College Monograph Series

31

PRAUḌHA MANORAMĀ
with Commentary
ŚABDARATNA

Vol. I

Critically edited by
V. L. JOSHI

DECCAN COLLEGE
Postgraduate and Research Institute
POONA

PRAUḌHA MANORAMĀ

with Commentary

ŚABDARATNA

of

HARI DĪKṢITA

Vol. I

Critically edited

by

VENKATESH LAXMAN JOSHI

Vyākaraṇa Tīrtha, Vyutpatti Kovida, Kāvya Tīrtha etc
Senior Fellow in Linguistics, Deccan College, Poona.
Sometime Lecturer in Sanskrit at the School of Oriental and African Studies, University of London.
Visiting Assistant Professor of Sanskrit, University of Chicago (U.S.A.).

POONA

1966

Code No.: M 113

First edition: 1000 copies, October 1966

Price: Rs. 30-00

Printed by—S. R. Sardesai, B.A., LL.B., Veda-Vidyā Mudraṇālaya,
41 Budhwar Peth, Poona 2

Published by—Dr. S. M. Katre, M.A., Ph.D. for the Deccan College
Postgraduate and Research Institute, Yeravada, Poona 4.

– विद्वद्रत्न –

मुरगुडकरजोशीलक्ष्मणशास्त्रिणां

चरणकमलयोः स्मृतये

सादरं सभक्त्युन्मेषं च

समर्पितम्

अनुक्रमणिका

प्रौढमनोरमा-शब्दरत्नम्

परिशिष्टानि

FOREWORD

It is indeed a matter of good fortune that a critical edition of *Śabdaratna* is now being made available for the first time by Pandit Venkatesh Laxman Joshi who has been associated with the project of editing a Dictionary of Sanskrit on Historical Principles of the Deccan College as Senior Śāstrī and with the Centre of Advanced Study in Linguistics, there as a Senior Fellow. During the time that he was on deputation with the London University as Visiting Lecturer in Sanskrit at the School of Oriental and African Studies between 1957 and 1960 Shri Joshi was busy collecting the material for this edition from manuscripts available at the India Office Library and other places. But it was only on return to the Deccan College that Pandit Joshi had the necessary opportunity to bring out this critical edition of an important text of neo-linguistic approach within the history of Sanskrit Linguistics. We are thankful to the Ministry of Education, Government of India for providing the stimulus which enabled Pandit Joshi to begin this work in all seriousness and the Deccan College to undertake its publication. The publication of this important text representing the navya-vyākaraṇa tradition built up by Bhaṭṭoji Dīkṣita and his school follows closely on the publication of the third and first Kāṇḍas of Bhartṛhari's magnum opus *Vākyapadīya* and is a precursor of the new activity in resuscitating ancient and medieval Indian masterpieces in Linguistics which has recently resulted in the creation of another Centre of Advanced Study for Sanskrit in the University of Poona. It is not without significance that just when this work in being published Pandit Joshi is joining the University of Chicago Department for South-Asian Studies as Visiting Assistant Professor in Sanskrit for teaching the Indian system of Vyākaraṇa and related subjects.

Pandit Joshi has not only contributed to our knowledge of such an important recent contribution to linguistic studies in India which marked the beginning of the Dīkṣita school in Banaras, but has provided

in his introduction new material which will have a bearing on textual criticism and supply the necessary inspiration to scholars trained in the traditional system to acquire the fundamental tools of a text-critic and enable them to contribute significantly to publishing critical editions of all unpublished Sanskrit texts.

The present work bristles with many problems connected with the text where competent scholars have expressed different opinions. But it may be mentioned that this is the first systematic attempt to edit the text critically on the basis of manuscripts, by classifying the manuscripts and establishing the links between them for enabling the critical constitution of the text itself, and on the basis of such a text to discuss problems of the mutual relationship between *Śabdaratna* and *Laghuśabdaratna* and their authorship. Guesses have been made without relying on sound evidence. Pandit JOSHI has been able, with the critical study of Vaidyanātha Pāyaguṇḍe's *Bhāvaprakāśa*, to throw much welcome light on these problems and establish for the first time some semblance of order in these conflicting views.

Sanskrit Grammar has become, since the days of Bhartṛhari, the refuge of traditional scholasticism and the subject of much controversy, without in any way making new contribution to the development of original thought. This criticism has too often been levelled without much deep study of the original texts. Imbedded within such scholastic discussions are to be found many original gems which have great value when considered in the light of modern developments. Indeed, there are passages in commentaries and sub-commentaries of the Pāṇinian tradition which correspond literally with modern theoretical approaches to descriptive linguistics, such as the *Padamañjarī* on *Kāśikā*. It is essential that critical editions of these texts should be made available to modern scholars not merely to appreciate the contributions that the Sanskrit tradition has made towards General Linguistics, but also to understand the spirit which informed and framed the approaches to linguistic studies which resulted in the composition of such texts.

I am confident that this edition of *Śabdaratna* will provide a sure basis for further studies of this and other related texts, and that the views expressed by Pandit JOSHI will meet with general approval. The critical edition of a work of this magnitude is no small undertaking, particularly when a great deal of mutually contradictory material has been assigned to works bearing similar titles and attributed to a single author. The unravelling of such involved problems will be made easier by the availability of a critically constituted text, presented in the best tradition of modern scholarship established in India for Indian conditions by the unrelenting efforts of the late Professor V. S. SUKTHANKAR and represented today in the completion of the critical edition of the Great Epic which is being announced by His Excellency the Honourable President of India at the Bhandarkar Oriental Institute next week. This first volume of *Śabdaratna* represents the application of modern critical scholarship by the editor who received training in traditional scholarship and acquired through his association with the Deccan College and the University of London skill and competence in modern western critical methodology, and, I am happy to note, that it is a substantial contribution, worthy of emulation by other scholars similarly placed. I am sure that Pandit JOSHI's continued efforts in this direction during his stay as Visiting Assistant Professor at the University of Chicago will result in converting at least some scholars in the West to a critical study of India's medieval contribution of Sanskrit Linguistics.

15th September 1966, S. M. KATRE.



ABBREVIATIONS

Amar.	*Amara Kośa.*
AIOC.	All India Oriental Conference.
A V. Pippalāda.	*Pippalāda* śākhā of *Atharva Veda.*
ICO (or) INCO.	International Congress of Orientalists.
Uddyota.	*Bhāṣyapradīpoddyota* of Nāgesha.
Uṇ.	*Uṇādi-Sūtrapāṭha.*
R Prā. (or) *Ṛk. Prā.*	*Ṛk Prātiśākhya.*
RV.	*Ṛgveda.*
K Pr.	*Kāvya Prākāśa.*
Kāś.	*Kāśikā Vṛtti* of Vāmana-Jayāditya.
Kiel.	*Mahābhāṣya :* edited by Kielhorn.
Kai.	*Pradīpa :* Kaiyata's Commentary on *MB.*
Kirāt.	*Kirātarjunīya.*
Kumāra.	*Kumāra Sambhava.*
Gaṇ. S.	*Gaṇa Sūtra.*
TS.	*Taittirīya Saṁhitā.*
Dhā P.	*Dhātupāṭha.*
Nāg.	Nāgeśa Bhaṭṭa.
Nārad Śik.	*Nāradīya Śikṣā.*
Nir.	*Nirukta* of Yāska
Naiṣ.	*Naiṣadhīya Carita.*
Nyāsa.	*Kāśikā Vivarṇa Pañjikā* of Jinendrabuddhi.
Pat.	Patañjali.
Paspaśā.	First Āhnika of *Mahābhāṣya.*
Pāṇ Śik.	*Pāṇinīya Śikṣā.*
P Mañ. (or) *Pad Mañ.*	*Pada Mañjarī* of Haradatta.
P L M.	*Parama Laghu Mañjūṣā.*
PV.	*Paribhāṣā Vṛtti* of Sīradeva.
PŚ.	*Paribhāṣendu Śekhara* of Nāgeśa.
PK.	*Prakriyā Kaumudī* of Rāmacandra.
Prasāda.	A Commentary by Viṭṭhala on PK.

PM. PMS. (or) *ŚR.*	*Prauḍha Manoramā* with *Śabdaratna* (Present ed.)
Phiṭ.	*Phiṭ Sūtra.*
Bhāg P.	*Bhāgavata Purāṇa.*
Bhāṭṭ D.	*Bhāṭṭa Dīpikā.*
MB.	*Mahābhāṣya.*
Manu S.	*Manu Smṛti.*
MK.	*Mīmaṁsā Kośa.*
M Vṛ. (or) *M Dh.*	*Mādhavīya Dhātu Vṛtti.*
Māheśvarī.	A Commentary on *Amara Kośa.*
Med.	*Medinī Kośa.*
Med. Vyā.	*Medinī Vyākhyā.*
Raghu.	*Raghuvamśa.*
Rāmāśrami	*Vyākhyā Sudhā* by Rāmāśrama Commentary on *Amarakośa.*
LN.	*Laukika Nyāyāñjali* : edited by Jacöb.
LŚ.	*Laghu Śabdaratna.*
Vākya.	*Vākyapadīya.*
Vār.	*Vārttikapāṭha* of Kātyāyana.
Ved Bhā.	*Veda Bhāṣya* of Sāyaṇācārya.
Vaidyanātha.	Vaidyanātha Pāyagunḍe.
Vai B.	*Vaiyākaraṇa Bhūṣaṇa Sāra.*
ŚK.	*Śabda Kaustubha.*
Śs.	*Śiva Sūtra.*
Ślok. Vār.	*Śloka Vārttika.*
SK.	*Siddhānta Kaumudī.*
HD.	Hari Dīkṣita.

शुद्धिपत्रम्


पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२	१६	तत् श् हित्याहे	‘ तत् श् ह् इत्याह ’
२	२५	ग. घ.	ख. ग.
३	१२	अड्ग्रहणेषु	“ अड्ग्रहणेषु
३	१४	सः ’	सः ”
५	१२	सम्बन्धाबाध	सम्बन्धबाध
७	२२	क. ख.	क. घ.
१२	१०	हरन्त्यम्	हर् रन्त्यम्
१३	१५	एकवि°	एव । वि°
१६	२६	ग. घ.	ख. ग.
१८	२४·१	ग. घ.	ख. ग. घ.
१९	७	मेडा°	मेडा°
२१	२६	1,3.1,19	1.3.1.9
२७	८	प्रगृह्य	अप्रगृह्य
३२	३०	12.अर्थापत्तिप्रमाणम्	12. MK. 2750
४१	४	कवर्गा°	चवर्गा°
४४	२२	सुश्लोका	सुश्लोका३
४९	१५	अच्°	अक्°
५३	८	त्वार्थि°	स्वार्थि°
५४	१	चकमे	चक्रमे
५४	३	°देशा°	°देश°
५४	१६	पुट°	मुण्ड°
५५	२३	१. ख.	१. क.
६१	१४	°त्तदुक्तिकालेऽस्य	°त्तदुक्तिः । कालस्य
७३	१२	तत्र	तत्तु
७९	१५	उपदेशो !	उप देशः
८०	१७	°वेऽच°	°वे च°
९१	२८	13. Kṛṣṇamiśra ?	13. Haradattamiśra
९२	२३	4. Kṛṣṇamiśra ?	4. Haradattamiśra

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
९८	२१	°वृत्या योग्यत्वे	°वृत्त्ययोग्यत्वे
१०२	९	°मिच्छा	°मिट्
१०७	१०	अहला°	अज्झला°
११४	१५	च लोपा°	वलोपा°
११९	११	वर्णाश्रयत्वात्	**वर्णाश्रयत्वात्**
१३२	२७	page 80	page 96
१४१	१६	चापि परिचचार	चानीयरि चचार
१४४	२३	MB on 3.2.178	MB. on 6.4.19
१५४	११	गोका	गोचा
१५८	१४	अकारौ	अकाराकारौ
१६४	६	न हि।	। न हि
१७९	९	अञ्जलिर्न°	अञ्जलिर्यस्मिन् न°
१८१	१०	जश्त्वविषयानु°	जश्त्वाविषयेऽनु°
१९०	१	**गविति**	**गवीति**
१९३	४	सम्बोधन°	सम्बोधन°[१]
१९८	११	अग्नीन्द्र	अग्नी३
२००	२५,२६	[notes] 2,3,4,6	[notes] 1,2,3,4.
२०१	२४	°बोधनात्।	°बोधनात्,
२०२	२१	१. [टिप्पणी]	१. अयं 'मे रायः' इति पाठो वाजसनेयिसंहितायामुपलभ्यते।
२०३	३	राये	रायो
२०४	१०	इदू°	ईदू°
२०७	४	अन्ततस्	अम्, ततस्
२३७	३४	12 MB.	12 MB. 8.3.3.41.
२४६	१६	°स्यान्ययत्वे	स्यान्ययत्वं

शब्दरत्नस्य

वंशवृक्षालेखः

Stemma Codicum



वंशवृक्षालेखस्य विवरणम्

ऊर्ध्वमूलमधःशाखं वंशवृक्षं विदुर्बुधाः ।
°लेख-पुस्तक-शाखोप-प्र-शाखाद्यतिविस्तृतम् ॥

* एतच्चिह्नाङ्कितानि पुस्तकानि मूललेखपुस्तकमारभ्य आदितः परम्परानिर्धारणार्थम् अस्माभिः कल्पितानि–गृहीतानि; न तु साक्षादुपलब्धानि ।

1 गृहीतमूललेखपुस्तकशब्दः Autograph इत्यस्मिन्नर्थे प्रयुज्यते ।

2 गृहीतमूललेखाद्यावृत्तिपुस्तकशब्दः Archetypus इत्यस्मिन्नर्थे ।

3 गृहीतमूलपुस्तकशाखा Hyparchetypus, Sub-archetypus इत्यस्मिन्नर्थे ।

4 गृहीतमूलपुस्तकोपशाखा Recension इत्यस्मिन्नर्थे ।

उपलब्धानि पुस्तकानि तत्सङ्केताश्च

5 **क.** कै. विद्वद्रत्नमुरगुडकरजोशीलक्ष्मणशास्त्रिणां पुस्तकम्.
°प्रशाखा = Sub-recension

6 **ख.** लण्डन–इण्डियाऑफिस्ग्रन्थालयग्रन्थरीतः समधिगतं पुस्तकम्. °प्रशाखा.

7 **ग.** पुण्यपत्तनस्थ–वेदशास्त्रोत्तेजकसभाग्रन्थालयात् लब्धं पुस्तकम्.
°उपशाखा = Recension

8 **घ.** पुण्यपत्तनस्थ–प्राध्यापकवर्याणाम् अभ्यंकरकाशिनाथशास्त्रिणां पुस्तकम्.
°प्रशाखा.

9 **च.** मुरगुडकरजोशीकुले (मुरगूड-कोल्हापूर) लब्धं पुस्तकम्. °उपशाखा.

उपरिनिर्दिष्टेषु उपलब्धेषु पुस्तकेषु **क-ख-घ**–पुस्तकानि एच्. टी. कोलब्रुक्-महाभागैः (H. T. COLEBROOKE) अष्टादश-शतकस्यान्तिमे दशके काश्यां लेखनिकद्वारा स्वसूचनानुसारं लेखितानि इति विभावयामः । एतद्विषयको विमर्शः प्रस्तावनायां द्रष्टव्यः ।

प्रस्तावना

महदेतत् प्रमोदस्थानं यदद्य बृहतः *शब्दरत्नस्य* पञ्चसन्ध्यन्तः प्रथमो भागः *प्रौढमनोरमया* सह प्रकाशतां नीयते इति। अस्य ग्रन्थस्य विषये बहोः कालादारभ्य वर्तते पाणिनीयव्याकरणकुले कुतूहलगर्भा जिज्ञासा। तत्र कारणकलापोऽपि सविशेषो विविधश्च। स च इत्थम्:—

(१) अयं बृहत्–*शब्दरत्न*ग्रन्थः न केवलम् अद्यावधि अमुद्रितः; किन्तु एतावन्तं कालं यावत् हस्तलिखितस्वरूपेणापि सर्वत्र अधिगन्तुं दुर्लभः, स्वस्वरूपेण अज्ञातप्राय एवासीत्।

(२) साम्प्रतम् अध्ययनाध्यापनपरम्परायां सर्वत्र विपुलप्रचारस्य *लघुशब्दरत्नस्य* अनेन बृहता *शब्दरत्नेन* सह कः सम्बन्धो वर्तते; इत्यस्मिन् विषये पण्डितानां समाजे, विशिष्य च वैयाकरणकुले महान् विवाद आसीत्।

यद्यपि '*लघुशब्दरत्न*ग्रन्थः हरिदीक्षितकृतः' इत्येव सर्वेष्वपि *लघुशब्दरत्न*-पुस्तकेषु प्रकरणान्ते ग्रन्थान्ते च पुष्पिकायां निर्देशा उपलभ्यन्ते; अथापि गुरुमुख-परम्परया व्याकरणशास्त्रपारावारीणानां तु ज्ञातमासीदेव, यद् *लघुशब्दरत्न*ग्रन्थः न हरिदीक्षितकृतः, किन्तु नागेशभट्टकृतः, इति। अतः *लघुशब्दरत्न-शब्दरत्नयोः* सम्पादनशास्त्रीय-चिकित्सापद्धत्या सन्तुलनार्थम् अप्रसिद्धस्य बृहतः *शब्दरत्नस्य* आवश्यकता आसीदेव।

(३) हरिदीक्षिताः भट्टोजिदीक्षितानां पौत्राः प्रशिष्याश्च। नागेशभट्टाश्च हरिदीक्षितानां साक्षाच्छिष्याः। अयं भट्टोजि–हरिदीक्षितसम्बन्धः, हरिदीक्षित-नागेशसम्बन्धश्च अत्यन्तं महत्त्वपूर्णः। यतः भट्टोजिदीक्षितैः *सिद्धान्तकौमुदी-प्रौढमनोरमा-शब्दकौस्तुभा*दिग्रन्थेषु स्वीकृतानां सिद्धान्तानां *परिभाषेन्दु-शब्देन्दुशेखर-मञ्जूषोद्द्योतादौ* नागेशभट्टैः खण्डनं क्रियते, स्वकीयं च नव्यं मतं स्थाप्यते। तत्र भट्टोजिदीक्षितनागेशभट्टयोर्मध्ये वर्तमानोऽयं हरिदीक्षितकृतः बृहत्– *शब्दरत्नाख्यो* ग्रन्थः कमपि विशिष्टमभिनवं प्रकाशं प्रदर्शयितुं शक्नुयाद् वा, इत्यस्मिन् विषयेऽपि महत् कुतूहलमासीत् वैयाकरणकुले।

अधुना तु चतुर्णां हस्तलिखितानां साहाय्येन सम्पादनशास्त्रपद्धत्या सम्पादितस्य *शब्दरत्नस्य* अभिनवोपलब्ध्या एतद्विषयको विमर्शः याथातथ्येन कर्तुं शक्यते एव।

पुस्तकचतुष्टयोपलब्धिः

अस्य बृहतः *शब्दरत्नस्य* आधुनिके काले इदम्प्रथमतया याथातथ्येन च ज्ञानम् अस्माकं जन्मविद्यावंशगुरूणां कै. मुरगुडकरजोशीलक्ष्मणशास्त्रिणां पञ्चत्रिंशत्-वर्षेभ्यः प्राक् खिस्ताब्दस्य १९२७ तमे संवत्सरे सञ्जातम्; इति स्पष्टं वक्तुं शक्यते। तैश्च यावज्जीवम् अध्यापनमात्रगृहीतैकव्रतैः अस्य पुस्तकस्य मुद्रणावृत्त्यर्थमवसर एव न लब्धः। नासिकक्षेत्रे खि. १९२७ तमे संवत्सरे पितृचरणानां निकटे एतद् पुस्तकं समागतम्। तदनन्तरं काश्याम् अन्यत्र च भारते अस्य ग्रन्थस्य अन्यत् हस्त-लिखितं पुस्तकं लभ्यते वा, इत्येतज्ज्ञातुं तैर्महान् प्रयत्नः कृतः। परं तदा कुत्रापि अस्य ग्रन्थस्य अन्यत् हस्तलिखितपुस्तकं तैः नैव लब्धम्।

तदनन्तरं गुरुचरणानामनुज्ञया खि. १९५१ तमे संवत्सरे लखनौ-नगरे अखिलभारतीयप्राच्यविद्यापरिषदः (All India Oriental Conference) अधि-वेशने अस्माभि *शब्दरत्न*विषयको लेखः पठितः। तदानीं तत्र समागतानां बहूनां प्राचीनार्वाचीनपण्डितानां बृहत्– *शब्दरत्न*विषयकं ज्ञानं नासीदेव, इत्यस्माभिः प्रत्यक्षीकृतम्। तदनन्तरं यदा लण्डनविद्यापीठे ' स्कूल् ऑफ् ओरिएंटल् अँड् आफ्रिकन् स्टडीज् ' इत्यत्र अध्यापकत्वेन गन्तुमवसरोऽस्माभिर्लब्धः (खि. १९५७ तमे संवत्सरे) तदा इण्डिया-ऑफिस्-लायब्ररीमध्ये विद्यमानं *शब्दरत्नस्य* हस्तलिखित-पुस्तकं साक्षात्कृतमस्माभिः। तस्मिन् पुस्तके च ये पाठभेदाः समुपलब्धाः, तेऽपि ततः सङ्गृहीताः सन्तुलनार्थम्।

वर्षत्रयमुषित्वा लण्डननगरीतः प्रत्यागमनानन्तरं माननीयानां डॉ. एस्. एम्. कत्रेमहोदयानामनुज्ञया अस्य *शब्दरत्न*ग्रन्थस्य सम्पादनमस्माभिः प्रारब्धम्। सम्पादनप्रारम्भसमये एव पुण्यपत्तनस्थप्राध्यापकवर्यैः अभ्यङ्करकाशिनाथशास्त्रिभिः स्वकीयं *शब्दरत्नस्य* पुस्तकमस्मभ्यं प्रदत्तम्। तस्मिन्नेव समये च पुण्यपत्तनस्थवेद-शास्त्रोत्तेजकसभायाम् एकं *शब्दरत्नस्य* पुस्तकं वर्तते, इति ज्ञात्वा सम्पादनकर्मणि तस्यापि पुस्तकस्य उपयोगः कर्तव्यः इति निश्चित्य च तत्संस्थासञ्चालकानाम् अनुमतिर्लब्धा, उपयोगार्थं पुस्तकं स्वीकृतं च। महता वेगेन कार्यं प्रारब्धम्; प्रथमो मुद्रणावृत्तिसम्पुटः (षोडशपत्रीरूपः) सिद्धः कृतश्च।

परं तस्मिन्नेव समये पुण्यपत्तने प्रलयकारिणा पानशेतपूरोत्पीडेन सर्वमप्यस्माकं गृहम् उद्ध्वस्ततां नीतम्। मुद्रणावृत्तिरपि समूलनाशं नष्टा; परं हस्तलिखितद्वयं

तावत् सुरक्षितं लब्धम्। तत्रत्यानि आदितः कानिचन पत्राणि तु विनष्टानि। तदनन्तरं पुनरपि यथावकाशं शनैः शनैः कार्यं प्रारब्धम्।

मूलग्रन्थसम्पादनम्

चतुर्णां हस्तलिखितानां साहाय्येन प्रारब्धे पुनरपि नवीनतया सम्पादनकार्ये (षोडशपत्री तु आपद्ग्रस्ता तथैव स्थापिता।) प्रतिपुस्तकं तत्र तत्र लेखनवैशिष्ट्यदर्शनेन बहुषु स्थलेषु पाठत्रुटि-व्यत्यास-प्रक्षेपादिनैकविधदोषाणां समुपलम्भात मूलग्रन्थसम्पादनशास्त्रीयचिकित्सापद्धतिलक्ष्यभूतानि बहून्युदाहरणानि अस्मद्दृग्गोचरीभूतानि। विविधाः महान्तः पाठभेदाः, असाधारणाः महत्यः पाटत्रुटयः, लिपिवैशिष्ट्यम्, विशिष्टाक्षरलेखनपद्धतिः, बिन्दुरूपाणि च पूर्णविरामचिह्नानि; इत्यादि दृष्ट्वा इदं *शब्दरत्न*पुस्तकचतुष्टयमालम्ब्य हरिदीक्षितकृतमूलग्रन्थनिर्धारणार्थं यदि ग्रन्थसम्पादनशास्त्रीयचिकित्सापद्धत्या संस्कृतभाषायां विमर्शः क्रियेत, तर्हि संस्कृतभाषाश्रयिणां कृते तद् महते उपकाराय कल्पेत; इति चिन्तयित्वा अस्माभिस्तथा प्रयत्नाः प्रारब्धाः।

किमिदमपूर्वं शास्त्रम्?

एवं चात्र प्रस्तावनायाम् उपलब्धानां चतुर्णां हस्तलिखितानां साहाय्येन हरिदीक्षितकृतः *शब्दरत्नाख्यो* मूलग्रन्थो यावच्छक्यं तदक्षरसन्निबद्धतया निर्धारणीयः, इत्यस्ति अत्र प्रवृत्तिनिमित्तम्। तस्य मूलग्रन्थस्य निर्धारणसमये उपलब्धेषु चतुर्षु हस्तलिखितेषु कतमत् अधिकं प्रमाणभूतम्? कुत्रत्याः पाठभेदाः मूलग्रन्थत्वेन स्वीकर्तुं योग्याः? कतमस्मिन् हस्तलिखिते च लेखनिकप्रमादाः समधिका उपलभ्यन्ते? कुत्र च प्रक्षिप्ताः पाठाः समधिकाः? उपलब्धानां सर्वेषां पुस्तकानां शाखापरम्परा (कुलपरम्परा) एका एव उत भिन्ना? इत्यादयो बहवो विषयाः हंसक्षीरन्यायाश्रितेन सारासारविवेकेन, चातुर्येण, स्वकीयेन बुद्धिवैशद्येन च विमर्शनीया भवन्ति। तदर्थं च किमपि अपूर्वं विशिष्टं शास्त्रं नास्ति, अथवा किमपि नवीनमध्येतव्यं न भवति। यथा खलु उच्यते:—

A man who possesses common sense and the use of reason must not expect to learn from treatises or lectures on textual criticism anything that he could not, with leisure and industry, find out for himself. A textual critic engaged upon his business is not at all like Newton investigating the motions of the planets,

he is much more like a dog hunting for fleas. If a dog hunted for fleas on mathematical principles, he would never catch a flea except by accident. ... If a dog is to hunt for fleas successfully, he must be quick and he must be sensitive.

[by : Housman : *Classical Assosiation Proceedings;* XVIII pp. 68-69, 1921]

अस्य तात्पर्यार्थः— ग्रन्थसम्पादनशास्त्रीयचिकित्सातत्त्वं नाम किमपि **अपूर्वं शास्त्रं नास्ति;** अथवा न्यूटनप्रणीतः आकाशस्थग्रहस्थितिनिर्धारकः कश्चन नवीन एव सिद्धान्तोऽपि नास्ति । प्रायः सुव्युत्पन्नेन बहुश्रुतेन च केनापि पण्डितेन स्वकीयानुभवसाहाय्येन, कस्यापि ग्रन्थस्य चिकित्सितावृत्तिः सम्पादयितुं सुशका; विनापि विशिष्टं ग्रन्थसम्पादनशास्त्रीयचिकित्सातत्त्वाभ्यासम्। किञ्च सम्पादनशास्त्रीयचिकित्सातत्त्वानुरोधेनैव नवीनाम् आवृत्तिं सम्पादयितुकामः कोऽपि सम्पादको यदि भवेत्, तर्हि महान्तं कालं यापयित्वाऽपि कदाचित् भाग्यवशादेव सः स्वकीयं कार्यं पूर्णतां नेतुं समर्थो भविष्यति । इति।

Introduction to Indian Textual Criticism इत्यस्मिन् पुस्तके डॉ. एस. एम्. कत्रेमहोदयैरपि उच्यते:—

" Textual criticism is in effect an art by means of which the critic skilfully and methodically applies **Common Sense** to a class of problems which beset all inquirers whose evidence rests upon the authority of manuscript-documents and therefore ultimately limited by the human agency responsible for their transmission. Hence the general rules, founded mainly on observed forms of error or licence, and called ' Canons of Criticism, ' Should bc used with due recognition of their limited validity, " (p. 72).

अस्य मथितार्थः– सम्पादनशास्त्रीयचिकित्सातत्त्वं नाम सम्पादकेन मूलग्रन्थनिर्धारणार्थं स्वबुद्धिवैशद्येन, बहुश्रुतत्वसाहाय्येन, सारासारविवेकेन च स्वीकृता विशिष्टा पद्धतिरेव । एवं च सम्पादकं सततं पीडयन्तो मूलग्रन्थनिर्धारणविषयकाः सर्वेऽपि प्रश्नाः उपरिनिर्दिष्टपद्धत्यैव दूरीकर्तुं शक्याः; अन्ततो गत्वा कथमपि दूरीकरणीया भवन्ति च । प्रायः सर्वेऽपि मूलग्रन्थनिर्धारणविषयकाः प्रश्नाः हस्तलिखितग्रन्थमाश्रित्यैव प्रवर्तन्ते । अतः तानि हस्तलिखितान्येव अस्मिन् विषये अन्तिमं प्रमाणं भवितुमर्हन्ति । तानि हस्तलिखितानि च ग्रन्थकारैः स्वयं लिखितानि

स्युः; लेखनिकैर्लिखितानि वा भवन्तु; अथवा उभयैर्मिलित्वा लिखितानि सन्तु; अन्ततो गत्वा स्खलनशीलैः मानवैरेव तानि लिखितानि, इति कृत्वा मानवसुलभदोषयुक्तान्येव तानि हस्तलिखितानि भवेयुः, इत्यत्र नास्ति संशीतिलेशोऽपि ।

सम्पादनशास्त्रस्य मर्यादा

अतः यदा यदा हस्तलिखितविषयकसूक्ष्माभ्यासवशात् तत्स्वरूपज्ञानेन, विशिष्य च हस्तलिखितोपलब्धदोषाणामाश्रयणेन ग्रन्थसम्पादनशास्त्रीयचिकित्सातत्त्वविषयकाः विशिष्टाः सिद्धान्ताः स्थाप्यन्ते; अथवा केचन नियमाः क्रियन्ते, तदा तदा तत्तेषां सिद्धान्तानां नियमानां च आलम्बनसमये सापवादं (स्वरूपविवरणकोटौ प्रविष्टम्, न तु लक्षणकोटौ) स्वरूपं स्थूलरूपेणैव अङ्गीकर्तव्यं भवति। एवं च एतेषां नियमानां स्वरूपम् अव्याप्त्यतिव्याप्त्यसम्भवरूपदोषत्रयशून्यात्मक-लक्षणेन कदापि प्रतिपादयितुं नैव शक्यम्। केवलम् उपलब्धानां दोषाणामाश्रयेण तत्सदृशदोषाणां परिगणनकारकाः स्वरूपविवरणपराश्च नियमाः अत्र विरच्यन्ते; हस्तलिखितविषयकसूक्ष्माभ्यासवशात् स्वरूपवर्णनपराश्च सिद्धान्ताः स्थाप्यन्ते । न हि एतावता विद्यमानसमस्तहस्तलिखितेषु दोषसम्भावना नियमस्वरूपेण अपरिहार्या, इति वक्तुं शक्यते; न वा उपलब्धानां भिन्नभिन्नप्रकाराणां हस्तलिखितानां स्वरूपविवरणं सकलांशेन साधितम्, इत्यपि वक्तुं पार्यते ।

मार्गदर्शनपरं शास्त्रम्

अतः अत्र प्रतिपाद्यमानं सम्पादनशास्त्रीयचिकित्सातत्त्वं सामान्यतो [1]मार्गदर्शनपरम्; इत्येवावधेयम्। "अस्माभिः एतावन्तं कालं यावत् यानि हस्तलिखितानि अभ्यस्तानि; तेषां स्वरूपवर्णनादिकम् एतादृशम्, तत्र एतादृक्षा दोषा दृष्टिपथमायान्ति।" इति कथने एव तात्पर्यम्। न हि एतावता "अन्येष्वपि हस्तलिखितेषु एतैरेव दोषैर्भाव्यम्; नान्यैः" इत्याकारको नियमः, अथवा "एतैर्दोषैः सर्वत्र भाव्यमेव" इत्याकारको वा नियमः कदापि कर्तुं शक्येत। सामान्यतः तत्तद्धस्तलिखितविशेषानुसारम् एतादृक्षा दोषाः अन्येष्वपि हस्तलिखितपुस्तकेषु प्रायः सम्भवन्ति" इति स्वानुभवप्रदर्शनपूर्वम् अन्येषां मार्गदर्शनं कर्तुं शक्यम्। इति।

---

1. Many people tend to regard textual criticism as a disease. But it is neither a disease nor a science, but simply the application of common sense to a class of problems which beset all inquirers whose evidence rests upon the authority of manuscript-documents. *Companion to Classical Studies.*; by. F. W. Hall; page 3.

एवं चायं निर्गलितोऽर्थः अत्र सम्पन्नो भवति, यदनयैव उपरिनिर्दिष्टया पद्धत्या प्रकृत-मार्गदर्शनपरशास्त्रानुसारं चिकित्सापूर्वकं च यस्य कस्यापि मूलग्रन्थस्य सम्पादनं कर्तव्यम्, इति । तत्र

को नाम मूलग्रन्थः ? किञ्च नाम तत्सम्पादनशास्त्रम् ?

१. **मूलग्रन्थो** नाम अ. ग्रन्थकर्त्रा स्वयं विरचितः ग्रन्थः ।

ब. अथवा केनापि सम्पादकेन विविधेभ्यः भिन्नभिन्नेभ्यः ग्रन्थेभ्यः इदम्प्रथमतया विविधान् विषयान् सङ्कलय्य यथायथं स्थापितः सम्पादितश्च ग्रन्थः । (यथा कोषादिः)

ततश्च तत्पठितृभिः, टीकाकारैः लेखनिकैः, अन्येन केनापि वा यथाकथमपि अपरिवर्तितः, (अपरिवर्धितः, अन्यूनीकृतः, ग्रन्थकर्त्रक्षरानुपूर्वीयुक्तश्च) ग्रन्थः ।

२. **मूलग्रन्थसम्पादनशास्त्रं** नाम सम्पादकेन एतद्विषयकस्वानुभवेन स्वीकृता, [हंसक्षीरन्यायाश्रितसारासारविवेकबलाधिष्ठिता] ऐतिह्यपरम्पराश्रिता तर्कादिप्रामाण्याविरुद्धा च मूलग्रन्थनिर्धारणपद्धतिः ।

एतदुभयं निरूपणं च स्वरूपकथनपरतयावधेयम् ।

इमां च आधुनिक–शास्त्रीयपद्धतिमाश्रित्य प्राचीनभारतीयग्रन्थानाम् अवश्यं सम्पादनं कर्तव्यं भवति । यतः यथा यथा अस्माभिः प्राचीनातिप्राचीनकालीनाः ग्रन्था दृश्यन्ते; तदा एकस्यैव ग्रन्थस्य भिन्नभिन्नेषु पुस्तकेषु मूलग्रन्थापेक्षया भिन्नभिन्नाः पाठा उपलभ्यन्ते । क्वचित् अधिको ग्रन्थः प्रक्षिप्तः; क्वचित् क्वचित् महत्यस्त्रुटयः, केषुचन पुस्तकेषु तु वर्ण-शब्द-पङ्क्ति-श्लोक-परिच्छेदादीनां व्युत्क्रमा व्यत्यासाश्च अधिकैः प्रमाणैर्दृश्यन्ते । अतः एतादृक्षाणां ग्रन्थानां मूलरूपनिर्धारणार्थं मूलरूपप्रदर्शिनी चिकित्सा अवश्यं कर्तव्या भवति । एतादृशो ग्रन्थाश्च संस्कृतवाङ्मये बहवो वर्तन्ते । एतदर्थमेव च संस्कृतभाषायां सम्पादनशास्त्रीयचिकित्साविमर्शस्यात्यन्तमावश्यकता ।

लिपेः लेखनकलायाः वा प्राचीनत्वविषये

लेखनसन्निविष्टानां ग्रन्थानां परम्परा भारते प्राचीना वर्तते, इति तु सत्यमेव । अथापि सा नातीव प्राचीना । साङ्गानां वेदानाम्, तथा तत्सम्बन्धिवाङ्मयस्य पठनस्य पाठनस्य च परम्परा यद्यपि नितान्तं प्राचीना वर्तते; अथापि ग्रन्थसन्निविष्टत्वेन अथवा लेखननिबद्धतया स्थैर्यं गतस्य तादृशस्य वाङ्मयस्य कालः खिस्ताब्दपूर्वं चतुर्थशतकात् प्राक् नैव गच्छति ।

यद्यपि मोहेञ्जेदारो अथवा हराप्पा इत्यत्र उत्खननसमये उपलब्धेन वस्तुजातेन लेखनकलायाः ज्ञानं तदानीमपि आसीत्, इति अनुमातुं शक्यम्; तथैव मृत्कपालेषु

ताम्रपटेषु च अद्याप्यज्ञातायाः कस्याश्चन लिपेरपि सम्भावना कर्तुं शक्या, तदनुसारेणैव च लेखनार्थं भूर्जपत्र–तालपत्र–काष्ठफलक–चर्मपट-कार्पासपटादीनामप्युपयोगस्य[1] कल्पना कर्तुं शक्या; एवं च लिपिस्तस्मिन् काले आसीदेव; इति प्रतिपाद्यते। तथापि मूलग्रन्थ-सम्पादनशास्त्रीयचिकित्साविषयीभूतत्वं तत्रोपलभ्यमानस्य लेखादेः नितरां नैव सम्भवति, इति तु सर्वथा स्पष्टम्। अतः यदा अस्माभिः प्राचीनानां सङ्कलितानां ग्रन्थानां मूल-ग्रन्थनिर्धारणार्थं सम्पादनशास्त्रीयचिकित्सापद्धत्याश्रयणेन संशोधनपूर्वकं सम्पादनं कर्तुं प्रयत्यते; तदा ख्रिस्ताब्दात् प्राक् चतुर्थं शतकमारभ्यैव विचारः कर्तव्यो भवति; इति उपरितनविचारानुसारेण सिद्धम्।

सम्पादनयोग्यहस्तलिखितोपलब्धिकालः

वस्तुतस्तुः— ख्रिस्ताब्दात् प्राक् चतुर्थे शतके भारतीयानां लिपिज्ञानमासीत्, तथा च तदा नैके ग्रन्थाः लेखनसन्निविष्टाः बभूवुः; इति यद्यपि वक्तुं शक्यम्। तथापि तदानीं लिखितानां विविधानां हस्तलिखितपुस्तकानामधुना [2]अनुपलब्धेः सम्पादनशास्त्रीयचिकित्साकर्मणि तेषामनुपयोग एव, इत्यवश्यं स्वीकर्तव्यं भवति। साम्प्रतमुपलभ्यमानानि हस्तलिखितानि तु तत्तत्कालीनानां मूलग्रन्थानां नैकावृत्त्यन्तरितानि आवृत्तिरूपाणि पुस्तकानि। अतः यदारभ्य साक्षाद्धस्तलिखितपुस्तकानामुपलब्धिः, तदारभ्यैव प्रत्यक्षतः सम्पादनशास्त्रीयचिकित्सा प्रारब्धुं शक्यते; नान्यथा।

यद्यपि "खरोष्ठीधम्मपद" प्रभृतीनि अतिप्राचीनानि हस्तलिखितानि भूर्जपत्रतालपत्रादिषु लिखितानि उपलभ्यन्ते एव। तथापि तादृशि भूर्जपत्र-तालपत्र-ताम्रपटादिषु लिखितानि हस्तलिखितपुस्तकानि तु अत्यल्पान्येव साम्प्रतं दृश्यन्ते। भारते कागजागमनानन्तरमेव लिखितानि हस्तलिखितानि साम्प्रतं वैपुल्येन प्राप्यन्ते। एतानि च हस्तलिखितानि ख्रिस्ताब्दस्य त्रयोदशशतकानन्तरमेव उपलभ्यन्ते। प्रायः एतादृश्येव हस्तलिखितानि ग्रन्थसम्पादनशास्त्रचिकित्साकर्मणि उपयुक्तानि, इति विभावयामः।

---

1. In the absence of other material like clay tablets, we must infer that the Indus scribes, in the place of clay, employed less durable materials, such as birch-bark, palm-leaves, parchment, wood or cotton cloth any of which would naturally have perished in the course of the ages. *Introduction to Indian Textual Criticism*, page 1.

२. गीती शीघ्री शिरःकम्पी तथा **लिखितपाठकः**।
अनर्थज्ञोऽल्पकण्ठश्च षडेते **पाठकाधमाः** ॥ पा. शिक्षा। ३२.

इत्यादिवचनैः तदानीन्तने काले लिपिज्ञानसत्त्वेऽपि लेखनविषये आदरो नासीदिति वक्तुं शक्यते।

हस्तलिखितप्रकाराः

एतादृशां च हस्तलिखितानां विविधाः प्रकाराः साम्प्रतम् उपलभ्यन्ते । प्रकरणशुद्ध्यर्थं सन्दर्भवशादुपस्थिताश्च ते, अतः सङ्क्षेपतः अत्र अधो निर्दिश्यन्ते । ते च यथाः—

(१) **भूर्जपत्रहस्तलिखितानि** । हिमालयपर्वते एते भूर्जवृक्षाः विपुलप्रमाणेन वर्तन्ते । अतः प्राचीनतरे काले ऋषिभिः स्वकीया ग्रन्थाः भूर्ज-पत्रेषु लिखिताः, इति उन्नेतुं शक्यते । प्रख्यातेन अलेक्झाण्डरमहोदयेनापि भारते भूर्जपत्रलेखाः दृष्टाः आसन्, इति तदीयलेखतो ज्ञातुं शक्यते । बौद्धग्रन्थेषु ब्राह्मणग्रन्थेषु चास्य निर्देशः पौनःपुन्येनावलोकयितुं शक्यते । भूर्जपत्रेषु उपलभ्यमानमाद्यं हस्तलिखितं 'खरोष्ठीधम्मपदम्' ।

प्रायो भूर्जपत्राणां पार्श्वभागे मध्यतो वा छिद्रं विधाय सूत्रेण भूर्जपत्राणां एकत्र बन्धनं कृतम्; इति दृश्यते ।

(२) **कार्पासपटे** अपि सातवाहनकाले लेखनपद्धतिः आसीत्, इति स्मृतिग्रन्थेभ्यः शिलालेखेभ्यश्च ज्ञातुं शक्यते । प्रायः शासकीयव्यवहारविषयका लेखाः कुलपरम्पराविषयकाः लेखाश्च कार्पासपटेषु दृश्यन्ते ।

कौशेयपटेषु लिखिता अपि लेखाः क्वचित् क्वचित् उपलभ्यन्ते ।

(३) **काष्ठफलकानामपि** लेखनार्थमुपयोगः आसीत्, इति निर्देशाः विनयपिटकेषु जातकग्रन्थेषु च वर्तन्ते । क्वचित् क्वचित् एतानि फलकानि चित्रतैलाभ्यक्तान्युपलभ्यन्ते ।

(४) **तालपत्रेषु** लिखितानि साम्प्रतं विपुलप्रमाणेनोपलभ्यमानानि हस्तलिखितानि खिस्ताब्दानन्तरं षष्ठं शतकमारभ्य प्रवृत्तानि दृश्यन्ते । तथापि तालपत्राणां लेखनार्थमुपयोगः खिस्ताब्दस्य प्रथमं शतकमारभ्यैव आसीत्, इति विद्वद्भिः तैस्तैः प्रमाणैरनुमीयते । तालपत्राणां च सूत्रेण एकत्र बन्धनं भूर्जपत्रहस्तलिखितवत् पार्श्वयोः अथवा मध्ये छिद्रं विधाय कृतम्, इति दृश्यते ।

(५) **चर्मपटेषु** (°पट्टिकासु) अपि हस्तलेखाः दृश्यन्ते । विशिष्टानां पशूनां चर्मणः ऋते अन्यत् सर्वं चर्ममयमशुद्धम्, इति वैदिकधर्मानुयायिनां मतम् । अतः विना धर्माज्ञां (सूत्रादौ विधानं विना) चर्मणो लेखनकलायामुपयोगो न सम्भाव्यते वैदिकपरम्परायाम् । जैनानां तु चर्मपटलेखनं सर्वथा असम्भवि । अहिंसैकमात्रव्रतत्वात् महावीरानुयायिनाम् । अतः चर्मपटलेखनं बौद्धानामेव सम्भवति, इति तैस्तैर्विद्वद्भिः प्रतिपाद्यते । एतेषु चर्मपटेषु च लिखिताः लेखाः अत्यल्पाः विद्यन्ते ।

(६) **ताम्रपटेषु** अथवा **ताम्रपत्रेषु** उट्टङ्किताः, उल्लिखिता वा नैके हस्तलेखाः बुद्धकालावधिप्राचीनाः वर्तन्ते । प्रायो दानपत्राणि शासनिकव्यवहाराश्च अत्र लिखिताः दृश्यन्ते । ऐतिह्यविमर्शनार्थं तु ताम्रपटानां महत्त्वमसाधारणं वर्तते । भाषाशास्त्रार्थम्, लेखनपद्धतिविमर्शार्थम्, लिपिविकासाभ्यासार्थं च ताम्रपटानां महान् उपयोगो भवति ।

(७) **रजतपटेषु** अपि लिखिताः केचन लेखाः तक्षशिलानगर्याः समीपे उपलब्धाः ।

(८) **सुवर्णपटेषु** लिखिता लेखाः अपि क्वचित् क्वचित् उपलभ्यन्ते एव । रजतपटवत् एषामपि हस्तलेखानां सम्पादनशास्त्रीयचिकित्सादृष्ट्या नास्ति तादृश उपयोगः । केवलं हस्तलेखगतभाषादृष्ट्या, लिपिविकासलेखनपद्धत्यभ्यासदृष्ट्या, ऐतिह्य-विमर्शार्थं चैषामुपयोगः ।

किञ्च अत्यल्पा अपि रजतपटलेखाः सुवर्णपटलेखाश्च हस्तलेखानामैतिह्यविषये स्वकीयमसाधारणं वैशिष्ट्यम्, तत्तत्कालीनं सांस्कृतिकमार्थिकं जीवनं च समीचीनया रीत्या बोधयितुं प्रभवतः; इत्यप्यवश्यमङ्गीकर्तव्यं भवति ।

(९) **शिलासु** उल्लेखनं (भेदनं) कृत्वा लिखिताः अथवा उट्टङ्किताः लेखा अपि बाहुल्येनोपलभ्यन्ते । परम् एते **शिलालेखाः** ग्रन्थरूपेण क्वचिदेवोपलभ्यन्ते । अतः सम्पादनशास्त्रीयचिकित्सादृष्ट्या तेषामुपयोगस्त्वल्पीयानेव । परं सामान्यतः ऐतिह्यविमर्शार्थम्, विशिष्य च लिपिविकासाभ्यासार्थं भाषाशास्त्रपरामर्शार्थं च एतेषां सर्वेषां लेखानामत्यन्तमुपयोगो भवति; तत्तत्कालीनं सांस्कृतिकमार्थिकं च जीवनं बोध-यितुमपि प्रभवन्त्येते ।

(१०) **इष्टिकासु** उल्लेखनं कृत्वा लिखिताः लेखाः वायव्यसीमाप्रदेशे वैपुल्येन उपलब्धाः । मृत्तिकायाः आर्द्रतासमये एव इष्टिकासु अक्षराण्युल्लिख्यन्ते ततश्च **इष्टिका-लेखाः** इति शब्देन व्यवहृता दृश्यन्ते ।

(११) कर्गजेषु हस्तेन लिखितः लेखः **कर्गजहस्तलेखः**, अथवा केवलं **हस्त-लिखितम्**, इत्यादिशब्दैर्व्यवह्रियते । प्रायः **हस्तलिखितम्** इति शब्दे उच्चरिते कर्गजहस्तलिखितमेव दृष्टिपथमायाति । एतादृक्षाणां च हस्तलिखितानां प्राचीनत्वं न ख्रि. त्रयोदशशतकात् पूर्वं गच्छति । अतः अत्र एतद् स्पष्टं भवति; यद् मूलग्रन्थाः भवन्तु नाम अतिप्राचीनाः; परं साम्प्रतमुपलभ्यमानानि हस्तलिखितानि तु कण्ठीकृतानां भूर्जपत्रतालपत्रादिषु लिखितानाम् तत्तेषां मूलग्रन्थानां नैकपुस्तकान्तरितानि आवृत्ति-पुस्तकान्येव इति ।

एवं च उपरिनिर्दिष्टैर्विविधैः प्रकारैरेतद् वक्तुं शक्यम् ;यद् अद्यावधि भारते विविधासु भाषासु सहस्रशो ग्रन्थाः लेखनसन्निविष्टाः अथवा लिप्याश्रिताः सञ्जाताः; इति। तथैव लिपिज्ञानात्पूर्वं येषां ग्रन्थानां केवलं गुरुमुखपरम्परयैव पठनपाठनादिकमासीत्, तादृशाः प्राचीना ग्रन्थाः, तदनन्तरं च लिखिता ग्रन्थाः अगणनीया एव। सम्प्रति तेषु ग्रन्थेषु तु कानिचन सहस्राण्येवोपलभ्यन्ते; इति त्वन्यदेतत्।

एकस्यैव मूलग्रन्थस्य वैविध्यपूर्णानि पुस्तकानि

अधुना च ज्ञातेषु विविधेषु हस्तलिखितप्रकारेषु क्रमप्राप्तोऽयं विमर्शः कर्तव्यो भवति, यद् कस्मिन्नपि हस्तलिखितप्रकारे वर्तमानस्य एकस्यैव मूलग्रन्थस्य नैकानि वैविध्यपूर्णानि पुस्तकानि, भिन्नभिन्नप्रदेशेषु च भिन्नभिन्नाः परम्पराः कुतो वा कारणात् सन्दृश्यन्ते ? विशिष्य च निखिलेऽपि भारतेऽत्यन्तं प्रसिद्धानां विपुलप्रचाराणाम्, भारतीयजीवनाङ्गभूतानाम्, *वाल्मीकिरामायण-महाभारत*-सदृक्षाणां ग्रन्थानां नैकानि वैविध्यपूर्णानि पुस्तकानि, भिन्नभिन्नप्रदेशेषु भिन्नभिन्नाश्च परम्पराः केन वा कारणेन समुपलभ्यन्ते; इति।

प्रधानदोषचतुष्टयम्

तत्र प्रथमतस्तावत् एतत् सुस्पष्टमङ्गीकर्तव्यं भवति, यत् सत्स्वपि मूलग्रन्थस्य परम्पराभेदकारकेषु भिन्नभिन्नप्रदेशाश्रितेषु हेतुविशेषेषु, मूलग्रन्थस्य आवृत्तिकरणसमये लेखनिकानाम् अनवधानेन, अज्ञानेन, ज्ञानाभासतया वा सञ्जाताः, अथवा तैः कृताः दोषाः एव प्रधानं कारणम्। तथा च वर्तमानेष्वपि नैकेषु दोषेषु, तत्र प्रधानभूता दोषास्तु चत्वार एव। ते च यथाः—

१. लेखनसमये लेखनिकानवधानजन्या वर्ण-शब्द-पङ्क्ति-श्लोक-परिच्छेदानां **त्रुटिः**।

२. लेखनसमये लेखनिकानवधानजन्यः वर्णशब्दादीनां **व्यत्यासः व्युत्क्रमो वा**।

३. लेखनसमये लेखनिकैः; अथवा पठनसमये छात्रैः, पाठकैः; अथवा अध्यापनसमये अध्यापकैः; अथवा व्याख्याकरणसमये व्याख्याकारैः; अथवा ग्रन्थसम्पादनसमये सम्पादकैः लिखिताः, मूलग्रन्थेऽन्तर्भाविताश्च हैतुकाः अहैतुकाश्च महान्तः **प्रक्षिप्ताः पाठाः**।

४. मूलग्रन्थस्यलिप्यक्षरादीनां दुर्ज्ञेयतया दुर्बोधस्थलेषु लेखनिकस्य प्रमादस्थलेषु च नवीनैः लेखनिकैः, पाठकैः, व्याख्याकारैः, सम्पादकैश्च **कल्पिताः**, मूलग्रन्थत्वेन **संसूचिताः**, मूलग्रन्थेऽन्तर्भाविताः **पाठाश्च**। इति।

एवं च रामायणं भवतु, महाभारतं वा भवतु । अथवा अन्यः कोऽपि प्रसिद्धोऽप्रसिद्धो वा ग्रन्थो वर्तताम् । यदा खलु मूलग्रन्थनिर्धारणार्थं सम्पादकेन सम्पादनशास्त्रीयचिकित्सामाश्रित्य विमर्शः प्रारभ्यते; तदा उपरि निर्दिष्टानां दोषाणां प्राधान्येन विमर्शः कर्तव्यो भवति । यतः वर्तमानेष्वपि अन्येषु बहुषु लेखनदोषेषु उपरितनमिदं दोषचतुष्टयमेव मूलग्रन्थनिर्धारणकर्मणि सम्पादकं सततं दुनोति । किञ्च मूलग्रन्थसम्पादनकर्मणि दृश्यमानाः अन्ये सर्वेऽपि दोषाः एतांश्चतुरो दोषानाश्रित्यैव प्रवर्तन्ते; इत्युच्यमाने नातिशयोक्तिलेशोऽपि ।

एतदाश्रितानाम् अन्येषां दोषाणां च सविस्तरं परिगणनं प्रायः इत्थं कृतं दृश्यते:—

शब्दाक्षरसादृश्यजनितभ्रान्तिमूलकाः दोषाः

(१) लेखनसादृश्यजनितभ्रान्तिमूलको वर्णव्यत्यासः ।

(२) लेखनसादृश्यजनितभ्रान्तिमूलकं भिन्नशब्दलेखनम् ।

(३) सङ्केतितानां चिह्नानां शब्दानां चान्यथाग्रहणम् ।

(४) सन्धि-पदच्छेदयोर्विषये अनवधानमूलको भ्रान्तिमूलको वा दोषः ।

(५) पूर्वपदस्थविभक्तिप्रत्ययानां समीपवर्तिशब्देष्वन्तर्भावः ।

(६) वर्ण-शब्द-वाक्य-पङ्क्ति-पत्राणां व्यत्यासेन, व्युत्क्रमेण वा लेखनम् ।

(७) लेखनिकस्य विशिष्टलिपिशैलीवशात् सहजतया, भ्रान्त्या वा प्राकृतभाषा-संस्कृतभाषयोर्मिश्रणं कृत्वा लेखनम् ।

(८) कथितलेखनिक-भाषितलेखनिक-वाचितलेखनिकविषये उच्चारण-श्रवणजनितदोषः ।

(९) अङ्कलेखनव्यत्यासः ।

(१०) विशेषनामविषये भ्रान्तिः ।

(११) अप्रसिद्धानां पदानां स्थाने हैतुकम्, अहैतुकं वा प्रसिद्धपर्यायपदस्थापनम् ।

(१२) प्राचीनानां शब्दानां स्थाने नवीनपद्धत्या (भिन्नां व्युत्पत्तिमाश्रित्य) लेखनम् ।

(१३) पूर्वलेखनिकेन अनवधानात् परित्यक्तानां वर्णानां शब्दानां च स्थाने स्वतर्केण नवीनवर्णानां शब्दानां च स्थापना । (एतादृशस्थलेषु च एतच्छास्त्रीयसङ्केतानुसारम् < > एतच्चिह्नं प्रायः क्रियते ।)

लुप्तिः ग्रासः त्रुटिः

(१४) लेखने आद्यवर्णसादृश्यमूलिका अन्तवर्णसादृश्यमूलिका वा लेखनिकेन कृता अक्षर-शब्द-पङ्क्तीनां त्रुटिः, **लुप्तिः** ।

(१५) उभयोः सदृशयोर्वर्णयोर्मध्ये वर्तमानानाम् अक्षरशब्दादीनां लेखनिकानवधानजन्या त्रुटिः, **ग्रासः** ।

(१६) विशिष्टं कारणं विना लेखनिकेन अनवधानेन कृतः अक्षरशब्दादीनां त्यागः, **त्रुटिः** ।

एतादृक्षु च लुप्ति-ग्रास-त्रुट्यादिस्थलेषु सम्पादकेन यदि नवीनानाम् अक्षर-शब्दादीनां स्थापना स्वतर्केण क्रियते; तर्हि सम्पादकसंसूचिताः ते अक्षरशब्दादयः विशिष्टचिह्नानां मध्ये स्थापनीयाः; इति एतच्छास्त्रीयः सङ्केतः ।

यदि च हस्तलिखितानां कीटकादिभक्षणात् अथवा अन्यथा जायमानात् नाशात् अक्षर-शब्दादीनां दुर्ज्ञेयता, अपरिस्फुटता अथवा सर्वात्मना नाशो भवति; तदर्थं च सम्पादकेन नवीनपाठस्थापना क्रियते तर्हि तदर्थं विशिष्टं चिह्नं कृत्वा तन्मध्ये नवीन-पाठस्थापना कर्तव्या; इत्यपि एतच्छास्त्रीयः सङ्केतो दृश्यते । चिह्नविमर्शोऽग्रे भविष्यति ।

द्विर्लेखनम्, प्रक्षेपः, मिश्रणम्, आधिक्यम्

(१७) अनवधानात् अक्षरशब्दपङ्क्त्यादीनां पुनर्लेखनम् **द्विर्लेखनम्** ।

(१८) अनवधानेन हेतुतो वा टिप्पण्यादीनां मूलग्रन्थे एवान्तर्भावः **प्रक्षेपः** ।

(१९) अपपाठ**मिश्रणम्** ।

(२०) अक्षरसादृश्याद् अधिकाक्षरविन्यासः **आधिक्यम्** ।

इदं चात्रावधारणीयम्ः—उपरिनिर्दिष्टाः दोषाः सम्पादनशास्त्रीयचिकित्सासमये [1]पूर्वसूरिभिर्यया सरण्या प्रदर्शिताः, तामेव सरणिं प्रायः समाश्रित्य अत्रास्माभिः उद्धृताः परिगणिताश्च । इदं च परिगणनं दोषाणां स्वरूपप्रदर्शनपरम् । इति ।

उपरिवर्णितेषु दोषेषु बहवो दोषाः शब्दरत्नस्थ-पाठभेदचिकित्सासमये उपलभ्यन्ते । तत्रैव च तत्तेषां दोषाणाम् लक्षणोदाहरणरूपेण समन्वयः कर्तुं शक्यते एव अतः पुनरुक्तिभिया अत्र पुनः उपरि निर्दिष्टानां दोषानाम् उदाहरणानि पार्थक्येन न दीयन्ते ।

---

1. *Introduction to Indian Textual Criticism, pp.* : 55,56

शब्दरत्नस्य उपलब्धपुस्तकानां वर्णनम्

१. क–पुस्तकम्

एवं चात्र पाठभेदचिकित्सायां प्रारम्भणीयायाम् "वाक्यार्थज्ञाने वाक्यघटकीभूतपदपदार्थज्ञानं कारणम्" इति न्यायेन पाठभेदचिकित्साधारभूतानां क-ख-ग-घ-च-पुस्तकानां लेखनकालस्थलादिस्वरूपज्ञानम् आवश्यकम्; इति कृत्वा तत्स्वरूपवर्णनं प्रथमतः प्रारभ्यते।

पुस्तकोपलब्धिस्थानम्।

व्याकरणमीमांसाशास्त्रपारावारीणैः कै० विद्वद्रत्नमुरगुडकरजोशीलक्ष्मणशास्त्रिभिः खिस्ताब्दस्य १९२७ तमे संवत्सरे नासिकक्षेत्रे पञ्चवटयाम् इदं पुस्तकं लब्धम्; इति तेषां मुखात् अस्माभिः श्रुतम्। वैराजक्षेत्रे पाठशालायाम् इचलकरंजीसंस्कृतपाठशालायां च अध्यापनसमये *प्रौढमनोरमायाः लघुशब्दरत्नस्य* च स्पष्टीकरणार्थं बृहतः *शब्दरत्नस्य* अस्य पुस्तकस्य पौनःपुन्येन तैः परिशीलनं कृतम्, इति तेषां छात्रोत्तमानाम् अनुभवः। अध्यापनमात्रगृहीतैकव्रतैः पूजनीयैः लक्ष्मणशास्त्रिचरणैः इदं पुस्तकं स्वलिखितावृत्त्या सह खि. १९५७ तमे संवत्सरे अस्मभ्यं प्रदत्तम्।

शास्त्रिचरणैः लिखिता आवृत्तिस्तु *शब्दरत्नस्य* अजन्तस्त्रीलिङ्गान्तमासीत्। परं दुर्भाग्यवशात् तद्धस्तलिखिता *शब्दरत्नस्य* आवृत्तिः पुण्यपत्तने खिस्ताब्दस्य १९६१ तमे संवत्सरे पूरग्रस्ता, पङ्कित्रिला, मषीमयी चाभूत्। इदानीं च महता प्रयत्नेनापि अपरिस्फुटाक्षरा वर्तते। सा चावृत्तिः अस्माभिस्तथैव संरक्षिता वर्तते। परं साम्प्रतं तस्याः आवृत्तेः संशोधनकर्मणि नातीवोपयोगो भवति।

नासिकक्षेत्रे पञ्चवटयां तैः अधिगतमिदं पुस्तकं 'क–पुस्तकम्' इति सङ्केतेन अस्मिन् संस्करणे अस्माभिः व्यवह्रियते।

पुस्तकलेखनवैशिष्ट्यम्।

इदं क–पुस्तकम् अत्यन्तमशुद्धम्, अक्षरव्यत्यासत्रुटिन्यूनाधिक्यादिविविधैर्दोषैर्ग्रस्तम्, अक्षरलेखनमात्राधिगतपाण्डित्यैः लेखनिकैः अनवधानभ्रान्त्यादिदोषपरिपूर्णेन मनसा लिखितम्, इति विभावयामः[1]। लेखनवैशिष्ट्येन (हिन्दी अकारः, णकारः, 'यमां यमि' इत्यस्य स्थाने 'जमां जमि' इत्यादिना[2]) क–पुस्तकस्य लेखनिकाः औत्तरा आसन्, इति स्पष्टं भवति। स्वरवैदिकीप्रकरणान्तं सम्पूर्णस्यास्य

१. अस्य मतस्य स्फुटप्रतिपत्त्यर्थं दृश्यताम्ः 'उपलब्धपुस्तकानाम् अन्योऽन्यसम्बन्धविवरणम्' इति प्रकरणम्। २. विस्तारार्थं दृश्यताम्ः 'वर्णव्यत्यासाः' इति प्रकरणम्।

लेखनं प्रायस्त्रिभिश्चतुर्भिर्वा लेखनिकैः कृतम्, इत्यनुमीयते ग्रन्थे तत्र तत्र भिन्नभिन्नानामक्षराणामुपलब्धेः। अतश्चेदं भिन्नलेखनिकं नैकलेखनिकं वा पुस्तकम्। प्रायः सर्वत्र अखण्डपङ्क्तिलेखनं दृश्यते। वाक्यान्ते च दण्डस्थाने सर्वत्र पूर्णविरामस्य बिन्दुरूपम् (·) आधुनिकं चिह्नं दीयते। एतद्विषये अग्रे सविस्तरं विमर्शः क्रियते।

पत्रपङ्क्त्यक्षरादिमापनम्।

क–पुस्तकस्य ५३५ पत्राणि १०७० पृष्ठानि। कर्गजपत्राणि जीर्णान्यपि समीचीनानि। १३॥ × ५। इंचपरिमितस्य पत्रस्य ११ × ३ इंचपरिमिते भागे लेखनं वर्तते। प्रतिपृष्ठं १० पङ्क्तयः। प्रतिपङ्क्ति सामान्यतः ५५ अक्षराणि वर्तन्ते।

पुष्पिका।

क–पुस्तकस्य पूर्वार्धसमाप्तिसमये तथा उत्तरार्धसमाप्तिसमये पुष्पिकायां ग्रन्थ–ग्रन्थकार–लेखनकालादिविषये सुस्पष्टं निर्देशा वर्तन्ते।

तत्र पूर्वार्धलेखनसमाप्तिः विक्रमसंवत्सरस्य संवत् १८५३ तमे संवत्सरे माघमासे कृष्णपक्षे तृतीयायां तिथौ समजनि। तथा च

[1]" इति श्रीभट्टोजिदीक्षितपो(पौ)त्रेण वीर(रे)श्वरदीक्षितसूनुना हरिदीक्षितेन कृत(ते) शब्दरत्ने सुवंतं (बन्तं) समाप्तम्. (।)" एतदनन्तरं श्लोकद्वयम्। यथा :—

" तत्तत्स्वोक्तिविरुद्धवादिवचनप्रच्छेदयुक्तीर्हरम्
आश्रौषीदहिराज इत्यहिकुले श्रौत्रत्वमाविर्बभौ।
तद्युक्तं न हि वो दिगीशबुधवन्मोदाम्बुधौ मज्जनात्
तत्राधूतसहस्रमूर्धनिकरे लोकप्रथाया तत्म् ॥ १ ॥
विपक्षपक्षमाते(तं)गदानशोषकृतो हरेः।
कृतिः प्रीणात(तु) देवै(वे)शं शैलकन्यार्द्धशेखरम् ॥ २ ॥"


" शुभमस्तु (।) मङ्गलमस्तु (।) संवत् १८५३ समै (मे) नाम माघमासे (माघे मासे) कृष्णपक्षे तृतीयायां (याम्।)

उत्तरार्धे तिङन्तप्रकरणे तु अक्षरं सर्वोत्कृष्टम्। अशुद्धिस्तु पूर्ववदेव। प्रतिपत्रम् ११ पङ्क्तयः; प्रतिपङ्क्ति च ५५ अक्षराणि। अन्यत् सर्वं पूर्वार्धवत्। उत्तरार्धस्य समाप्तिस्तु संवत् १८५४ समे संवत्सरे समभूत्। तत्र चैवं निर्देशः—


" इतिश्रीमट्टोजिदीक्षितपौत्रवीरेश्वरदीक्षितपुत्रहरिदीक्षितविरचिते शब्दरत्ने उत्तरार्धं समाप्तम्. (।) संवत १८५४ "

---

१. अत्र ( ) अस्मिन् चिह्ने वर्तमानानि अक्षराणि अस्माभिः स्थापितानि।



१. क-पुस्तकम्



२. ख–पुस्तकम्

२. ख–पुस्तकम्

पुस्तकोपलब्धिस्थानम् ।

लण्डननगर्यां विश्वविख्यात–इण्डिया–ऑफिस्–ग्रन्थालयस्य कोल्ब्रुक्–सङ्ग्रह-विभागे एतत् पुस्तकं वर्तते । अस्य पुस्तकस्य ग्रन्थालय-क्रमाङ्कश्च ६५१–६५२ (१३४६–१३४७) इति एवं ग्रन्थालयसूचीमध्ये प्रदीयते । लण्डननगर्यां यदा अस्माकं निवासः (ख्रि० १९५७ तः १९६०) आसीत्; तदैव ग्रन्थालयाध्यक्षेभ्यः इदं पुस्तकं स्वीकृत्य तत्रैव पाठभेदसन्तुलनादि कार्यं कृत्वा सङ्गृहीताः पाठभेदाः अस्मिन् संस्करणे अस्माभिः उपयोजिताः । धन्यवादार्हाः इण्डिया-ऑफिस्-ग्रन्थालयाधिकारिणः। एतदेव च 'ख-पुस्तकम्' इति सङ्केतेन अस्माभिः अस्मिन् संस्करणे उपयोजितम्।

पुस्तकलेखनवैशिष्ट्यम् ।

ख–पुस्तकमिदं क–पुस्तकापेक्षयाऽपि अशुद्धिपरिपूर्णम्, अक्षरत्रुटिव्यत्यास-न्यूनाधिक्यादिदोषैरसकृत् ग्रस्तं च वर्तते । लिपिज्ञानमात्राधिगतपाण्डित्यैः[१] लेखनिकैः लिखितमेतद् पुस्तकम्। अतश्चेदं भिन्नलेखनिकं नैकलेखनिकं वा पुस्तकम्।

लिपिवैशिष्ट्येन अक्षरलेखनशैल्या च एतद् अनुमातुं शक्यते; यद् इदं पुस्तकं त्रिभिश्चतुर्भिर्वा औत्तरैर्लेखनिकैः मिलित्वा पूर्णतां नीतम्, इति। क–पुस्तकवदेव वाक्यसमाप्तिसमये दण्डस्थाने बिन्दुरूपाण्येव पूर्णविरामचिह्नानि अस्मिन् पुस्तकेऽपि दीयन्ते । एतद्विषयकः सविस्तरं परामर्शोऽग्रे द्रष्टव्यः ।

[ख–पुस्तके आदितो दश पत्राणि यावत् दण्डा एव पूर्णविरामचिह्नत्वेन दीयन्ते। ततः दश पत्राणि (विंशतिपत्रपर्यन्तम्) प्रायः चिह्नमेव नोपलभ्यते। ततः विंशतितमात् पत्रादनन्तरं ग्रन्थसमाप्तिपर्यन्तं सर्वत्र बिन्दुरूपमेव पूर्णविरामचिह्नम्।][२]

पत्रपङ्क्त्यक्षरादिमापनम् ।

पूर्वोत्तरार्धाभ्यां विभक्तम्, भागद्वयेन च सुबद्धम् इदं पुस्तकम्। अस्या पुस्तकस्य पत्रसङ्ख्या ६०५, पृष्ठसङ्ख्या च १२१० इति। तत्र पूर्वार्धस्य पत्रसङ्ख्या ४५५, पृष्ठसङ्ख्या ९१०; उत्तरार्धस्य पत्रसङ्ख्या १४५, पृष्ठसङ्ख्या २९० इति

---

१. अस्य मतस्य परिपुष्ट्यर्थं दृश्यताम्ः 'उपलब्धपुस्तकानाम् अन्योऽन्यसम्बन्धविमर्शः' इति प्रकरणम् ।

२. अस्य विषयस्य विस्तरस्तु 'बिन्दुरूपं पूर्णविरामचिह्नम्' इत्यस्मिन् प्रकरणे द्रष्टव्यः ।

१२×४॥ इंचपरिमितानि अस्य पुस्तकस्य पत्राणि । प्रतिपृष्ठं प्रायः १० पङ्क्तयः, प्रतिपङ्क्ति च प्रायः ६० अक्षराणि ।

पुष्पिका ।

अस्मिन् पुस्तके बहुषु स्थलेषु प्रकरणानामन्ते समीचीनया रीत्या पुष्पिका लिख्यते । यथा पूर्वार्धप्रकरणान्ते:—

[1]" तत्तत्स्वोक्ति .... ॥ १ ॥

विपक्षपक्ष .... ॥ २ ॥

शुभमस्तु । मङ्गलमस्तु । संवत् १८५६ "

तिङन्ते १११ पत्राणि । तत्र अन्ते पुष्पिकायाम्:—

" इति श्रीभट्टोजिदीक्षितपौत्रहरिदीक्षितविरचिते शब्दरत्ने तिङन्तं समाप्तम् । संवत् १८५६ "

कृदन्ते च २३ पत्राणि । तत्र चान्ते पुष्पिकायाम्:—" इतिश्रीभट्टोजिदीक्षितपौत्रेण वीरेश्वरदीक्षितसूनुना हरिदीक्षितेन विरचिते शब्दरत्ने कृदन्तं समाप्तम् । संवत् १८५६ मिति फाल्गुनमासे सु(शु)क्लपक्षे दुरतीयां (द्वितीयायां) तिथौ रविवासरे ।"

स्वरवैदिकीप्रकरणे च ११ पत्राणि । तत्र अन्ते पुष्पिकायां च:—

" इतिश्रीभट्टोजिदीक्षितपौत्रवीरेश्वरदीक्षितपुत्रहरिदीक्षितविरचिते शब्दरत्ने उत्तरार्धं समाप्तम् । संवत् १८५६ मास उत्तममासे फाल्गुनमासे कृस्न(ष्ण) पक्षे तेरोदश्यां (त्रयोदश्यां) कथा लिख्यते ॥ "

३. ग--पुस्तकम्

पुस्तकोपलब्धिस्थानम् ।

पुण्यपत्तनस्थवेदशास्त्रोत्तेजकसभातः समधिगतं पुस्तकमिदम् । क–ख–घ–पुस्तकापेक्षया शुद्धं समीचीनपाठयुक्तं चैतत् पुस्तकम् । पुण्यपत्तनस्थसाठेकुलोत्पन्नैः दामोदरशास्त्रिभिः वेदशास्त्रोत्तेजकसभायाः ग्रन्थालयमध्ये स्थापनार्थं दत्तमिदं पुस्तकम्, इति श्रूयते । वेदशास्त्रोत्तेजकसभासञ्चालकानामनुमत्या सभायाः कार्यालये गत्वा तत्रैव पाठभेदसन्तुलनादि कार्यं कृतम् । ग्रन्थालयनियमानुसारं संस्थास्थानात् बहिः हस्तलिखितानां नयनम् अशक्यमासीत्, इति कार्यालयमध्ये एव सर्वं कार्यं सम्पादयितुं

1. एतत् श्लोकद्वयं क–पुस्तकवर्णनावसरे १६ पृष्ठे द्रष्टव्यम् ।

सभाचालकैः यत् साहाय्यं प्रदत्तम्, तदर्थं नितान्तं धन्यवादान् अर्हन्ति वेदशास्त्रोत्तेजकसभासञ्चालकाः ।

इदमेव पुस्तकम् अस्मिन् संस्करणे ग–सङ्केतेन अस्माभिर्व्यवह्रियते ।

पुस्तकलेखनवैशिष्ट्यम् ।

क–ख–घ–पुस्तकानां लेखनिकाः औत्तरा आसन्, इति तैस्तैः प्रमाणैः अस्माभिः निर्धारयितुं प्रयत्यते । इदं ग–पुस्तकं तु अक्षरलेखनवैशिष्ट्येन पुष्पिकायां साक्षान्निर्देशेन च महाराष्ट्रियेण लेखनिकेन लिखितम्, इति स्पष्टं भवति । इदं पुस्तकं व्याकरणशास्त्रमधीयानेन छात्रेण स्वकीयाध्ययनोपयोगार्थं काश्यामेव विश्वेश्वरसन्निधौ बिन्दुमाधवघट्टे लिखितम्, इति पुष्पिकायां स्पष्टतया निर्देशः लभ्यते ।

इदं पुस्तकं व्याकरणशास्त्रे अधीतिना छात्रेण लिखितम्, इति कृत्वा अत्र क-ख-घ-पुस्तकापेक्षया अल्पीयांसो दोषाः उपलभ्यन्ते । अक्षरादिसादृश्यमूलिका अथवा आनवधानिकी ग्रन्थत्रुटिरपि अल्पीयस्येव । अक्षरलेखनं नातिसमीचीनम्, परं प्रायः परिस्फुटाक्षरं तत् । वकारबकारादीनां त्रकारत्नकारादीनां व्यत्यासास्तु वर्तन्ते एव । अतः ग्रन्थलेखनविषये अस्य प्रकरणस्य अन्ते अस्माभिः कृताः निष्कर्षाः अवश्यं विमर्शनीया भवन्ति ।

पत्रपङ्क्त्यक्षरादिमापनम् ।

अस्य ग-पुस्तकस्य ४०२ पत्राणि ८०४ पृष्ठानि च । प्रतिपृष्ठं १४ पङ्क्तयः। प्रतिपङ्क्ति च ५८ अक्षराणि । १३। × ५ इंचपरिमितस्य पत्रस्य लेखनसन्निविष्टो भागः ११। × ३। इंचपरिमितो दृश्यते ।

पुष्पिका ।

अस्मिन् पुस्तके बहुषु स्थलेषु प्रकरणान्ते ग्रन्थान्ते च पुष्पिकायां ग्रन्थ-ग्रन्थकार-लेखनकालादीनां सुस्पष्टं निर्देशा उपलभ्यन्ते । तत्र समासाश्रयविधिप्रकरणान्ते यथाः—

" इति समासाश्रयविधयः । आश्विनकृष्णैकादशीमन्दवासरदिवसे साठोपनामकमहादेवेन लिखितमिदं बिन्दुमाधवघट्टे । शुभमस्तु । "

ततः द्विरुक्तप्रक्रियान्ते यथाः—

"इति श्रीभट्टोजिदीक्षितपौत्रेण वीरेश्वरदीक्षितसूनुना हरिदीक्षितेन कृते शब्दरत्ने सुबन्तं समाप्तम् । "

ततः " इति श्रीभट्टोजिदीक्षितपौत्रेण वीरेश्वरदीक्षितसूनुना हरिदीक्षितेन कृते शब्दरत्ने उत्तरार्धं समाप्तम् । "

ततः "श्रीमन्मयूरेशसूरिसूनुना साठोपनामकमहादेवेन वाराणस्यां विश्वेश्वर-सन्निधौ स्वहस्तेनालेखि ।

संवत् १८३१ शके १६९६ विश्वावसुसंवत्सरे पुरुषोत्तमवैशाखामावास्यायां सम्पूर्णमिदं बृहच्छब्दरत्नपुस्तकम् ।" इति ।

ग–पुस्तकस्य वैशिष्ट्यम् ।

इदं ग–पुस्तकं लेखनदृष्ट्या समीचीनतमं कालदृष्ट्या च प्राचीनतमं सर्वेष्वपि उपलब्धेषु पुस्तकेषु । परम् अस्मिन् पुस्तके षड्लिङ्गीप्रकरणं नास्ति । रामशब्दस्य प्रक्रियाविवरणावसरे ग्रन्थस्य त्रुटिर्दृश्यते । पृष्ठस्य मध्ये एव त्रुटिः, अर्धं पृष्ठं च अलिखितमेव वर्तते । तदनन्तरम् अव्ययप्रकरणे एव पुनः प्रारम्भः । अयं षड्लिङ्गी-प्रकरणरूपः महत्त्वपूर्णो भागोऽस्मिन् पुस्तके नास्ति, इति महती न्यूनताऽस्य पुस्तकस्य । अत एव चेदमपूर्णं पुस्तकम् ।

क–ख–घ–पुस्तकेष्विव अस्मिन् पुस्तके वाक्यान्ते बिन्दुरूपं (.) पूर्णविराम-चिह्नं न दृश्यते, किन्तु दण्ड एव । अत्यल्पेषु स्थानेषु बिन्दुर्यद्यपि दृश्यते, परं न सः वैशिष्ट्यद्योतकः; किन्तु अहैतुकः आनवधानिको वा इति विभावयामः।

बृहच्छब्दरत्न–शब्दः ।

किञ्चास्य पुस्तकस्यायमपि विशेषः, यत् सर्वत्र अस्य ग्रन्थस्य 'शब्दरत्नम्' इति नामनिर्देशं कृत्वापि ग्रन्थान्ते पुष्पिकायाम् "सम्पूर्णमिदं बृहच्छब्दरत्न-पुस्तकम्" इति लेखनिकेन स्वयं 'बृहच्छब्दरत्न' इति नाम्ना कृतः अस्य ग्रन्थस्य व्यपदेशो दृश्यते । अयमेव च इदानीं यावत् इदम्प्रथमतया उपलभ्यमानः 'बृहच्छब्दरत्न' इति व्यपदेशः संस्कृतवाङ्मये; इत्यस्माकं मतम् ।


किञ्च अस्मिन् ग–पुस्तके लेखनिकेन बहुषु स्थलेषु शब्दरत्न–टिप्पणीरूपोऽपि ग्रन्थो मूलग्रन्थमध्ये अन्तर्भावितः[1] (प्रक्षिप्तत्वरूपेण) इति दृश्यते । छात्रावस्थायां वर्तमानस्य लेखनिकस्य सुलभम् अनुरूपं च तद् इति अनुमातुं शक्यम् । इति ।

अत्रायं निष्कर्षः ।


यद्यपि साठेमहादेवशर्मभिरेव इदं पुस्तकं लिखितम् इति तत्र तत्र प्रकरणान्ते ग्रन्थान्ते च पुष्पिकायां दृश्यते; अथापि अक्षरलेखनशैलीलिपिवैशिष्ट्याद्यनुरोधेन इत्य-मस्माकमत्रास्ति विवेकः—

---

१. दृश्यन्ताम् पृष्ठानि : २३, ४८, ६३, ७८, ११५, ११७ इत्यादि, इत्यादि ।



३. ग–पुस्तकम्



४. घ– पुस्तकम्

(१) उत्तरार्धं सम्पूर्णं साठेमहोदयैरेव लिखितम् ।

(२) पूर्वार्धे अव्ययप्रकरणमारभ्य शैषिकान्तं तैरेव लिखितम् । किन्तु अन्तिमं पत्रद्वयमन्यस्य स्यात् ।

(३) शैषिकान्तमारभ्य तद्धितान्तपर्यन्तं (पूर्वार्धान्तपर्यन्तम्) बहुभिर्लेखनिकैर्मिलित्वा लिखितम् ।

(४) आदितः पञ्चसन्ध्यन्तपर्यन्तमजन्तपुंलिङ्गस्थानि च पञ्चषपत्राणि अन्यैर्लेखनिकैर्लिखितानि ।

(५) अजन्तपुंलिङ्गप्रकरणे च रामशब्दे पृष्ठस्यार्धभागे एव केनापि लेखनिकेन लेखनं परिसमापितम् । पृष्ठस्यार्धभागस्तु तथैव अलिखित एव वर्तते ।

(६) रामशब्दमारभ्य अव्ययप्रकरणप्रारम्भपर्यन्तं प्रायः लेखनिकेन शतपत्रपरिमितः ग्रन्थः अलिखितो दृश्यते । (षड्लिङ्गीत्रुटिः ।)
अथवा एतावान् भागः पूर्वं लिखितोऽपि साम्प्रतं नष्टः, हस्तलिखितपुस्तकात् भ्रष्टो वा, इति न वयं विमर्शितुं समर्थाः ।

(७) एवं च एतद् ग–पुस्तकमपि भिन्नलेखनिकम् अथवा नैकलेखनिकम् ।

४. घ–पुस्तकम्

पुस्तकोपलब्धिस्थानम् ।

पुण्यपत्तननिवासिनां प्राध्यापकवर्याणाम् अभ्यङ्कर-काशिनाथशास्त्रिणां कुलपरम्परागतम् *शब्दरत्नस्य* पुस्तकमिदम् । खिस्ताब्दस्य १९६१ तमे संवत्सरे तैः स्वकीयमिदं पुस्तकं सम्पादनकार्यार्थम् अस्मभ्यं प्रदत्तम् । एतदेव च पुस्तकम् अस्माभिः अस्मिन् संस्करणे ' घ–पुस्तकम् ' इति सङ्केतेन व्यवह्रियते ।

लण्डननगरीस्थ-इण्डिया-ऑफिस्-ग्रन्थालये वर्तमानात् *शब्दरत्नस्य* पुस्तकात् ('ख–पुस्तकम्' इति सङ्केतेन अस्मिन् संस्करणे व्यवहृतात्) पाठभेदान् सङ्कलय्य *शब्दरत्नस्य* चिकित्सितावृत्तिसम्पादनकर्मणि बहोःकालात् कृतोद्यमाः वयम् , इति यदा प्राध्यापकवर्यैः अभ्यङ्करकाशिनाथशास्त्रिभिः ज्ञातम्; तदा तैः स्वकीयं पुस्तकं स्वयमेवास्मभ्यं प्रदत्तम्, इति नितान्तं धन्यवादार्हाः प्राध्यापकवर्याः काशिनाथशास्त्रिणः ।

पुस्तकलेखनवैशिष्ट्यम् ।

अक्षरत्रुटिविपर्ययन्यूनाधिक्यादिविविधैर्दोषैर्ग्रस्तम् , अत्यन्तमशुद्धम् अक्षरलेखनमात्राधिगतज्ञानैः लेखनिकैः अनवधानभ्रान्त्यादिदोषपरिपूर्णेन मनसा लिखितमेतद्

पुस्तकम् । लिपिवैशिष्ट्येन, अनवधानेन, भ्रान्त्या च अक्षरव्यत्यासपत्रे प्रदर्शितम् [1]अक्षरविपर्ययादिकं प्रायः बाहुल्येन अत्र उपलभ्यते ।

लेखनशैल्या अक्षरवैशिष्ट्येन च एवमनुमातुं शक्यते, यत् अस्य घ–पुस्तकस्य लेखनिकाः त्रिचतुराः आसन्, ते च प्रायः सर्वेऽपि औत्तरा एव; इति । मध्ये मध्ये पृष्ठार्धभागे एव ग्रन्थत्रुटिर्दृश्यते; पृष्ठार्धभागस्तु अलिखित एव ।

किञ्च उत्तरार्धे सम्पूर्णं दशगणीप्रकरणं नास्ति, इति महती न्यूनताऽस्य पुस्तकस्य । दशगणीप्रकरणं तु अत्यन्तं महत्त्वपूर्णं विस्तृतं च, इति जानन्त्येव वैयाकरणधौरेयाः ।

क-ख-पुस्तकवत् अस्मिन्नपि पुस्तके वाक्यान्ते सर्वत्र दण्डस्थाने बिन्दुरूपम् आधुनिकं पूर्णविरामचिह्नम् (·) दीयते । कुतूहलगर्भस्यास्य विषयस्य सविस्तरं प्रपञ्चोऽग्रे द्रष्टव्यः[2] ।

पत्रपङ्क्त्यक्षरादिमापनम् ।

अस्य घ-पुस्तकस्य ४५९ पत्राणि, ९१८ पृष्ठानि च । प्रतिपृष्ठं १० पङ्क्तयः। प्रतिपङ्क्ति च सामान्यतः ६० अक्षराणि । कर्गजपत्राणि नातिजीर्णानि अथापि क्वचित् क्वचित् कोणे कोणे त्रुटितानि । अत्र १३×५ इंचपरिमितस्य पत्रस्य १०।।×३ इंचपरिमिते भागे लेखनं दृश्यते ।

पुष्पिका ।

अस्मिन् पुस्तके बहुषु स्थलेषु पुष्पिका वर्तते । बहुषु स्थलेषु च प्रकरणारम्भे नवीना पत्रसङ्ख्या प्रारभ्यते ।

तत्र पूर्वार्धे ४०३ पत्राणि, अधिकानि च ४ शोधपत्राणि । पूर्वार्धस्य अन्ते पुष्पिका च एवम्:—

" इतिश्रीभट्टोजिदीक्षितपौत्रेण वीर(रे)श्वरदीक्षितसूनुना हरिदीक्षितेन कृते शब्दरत्ने सुवंतं(बन्तं)समाप्तम् (।) ततः 'तत्तत्स्वोक्ति' इत्यादि श्लोकद्वयम्[3] । ततः

" शुभमस्तु (।) मङ्गलमस्तु (।) संवत् १८५४ समौ (मे) नाम कार्तिकमासे शुक्लपक्षे एकादश्याम् । "

उत्तरार्धे प्रारम्भे एव दशगणीप्रकरणं नास्ति ।

---

१. दृश्यताम्: पृष्ठम् २९.

२. दृश्यतां ' बिन्दुरूपं पूर्णविरामचिह्नम् ' इति प्रकरणम् ।

३. पृ. १६.

ततो ण्यन्तप्रक्रियामारभ्य तिङन्तप्रकरणान्तं यावत् २१ पत्राणि। ततश्च पूर्वोत्तरकृदन्तयोः २४ पत्राणि। ततोऽनन्तरं स्वरवैदिकीप्रकरणान्तं ११ पत्राणि। ततश्च ग्रन्थान्ते पुष्पिका एवम्:—

"इतिश्रीभट्टोजिदीक्षितपौत्रवीरेश्वरपुत्रहरिदीक्षितविरचिते *शब्दरत्ने* उत्तरार्धं समाप्तम्। संवत् १८५४"

५. च–पुस्तकम्

पुस्तकोपलब्धिस्थानम्।

कोल्हापूरमण्डलान्तर्गतमुरगूडग्रामे श्रौतस्मार्तक्रियातत्पराणाम् सुव्युत्पन्नानाम् अस्माकं पितृव्यचरणानां कै. कृष्णम्भट्टानां गृहे *रसगङ्गाधर*पुस्तकमध्ये स्थापितानि स्वादिसन्धिमारभ्य हलन्तनपुंसकलिङ्गान्तपर्यन्तं हरिदीक्षितकृतशब्दरत्नस्य षट्सप्ततिः पत्राणि (७६ पत्राणि १५२ पृष्ठानि) लब्धानि। अहो महद् भाग्यमस्माकम्। जगन्नाथपण्डितकृत*रसगङ्गाधरस्य* पुस्तकम् अष्टादशशतकस्यान्ते लिखितं तु लब्धमेव। किन्तु तदन्तःप्रविष्टानि *शब्दरत्नस्य* अत्यन्तं महत्त्वपूर्णानि पत्राण्यपि लब्धानि।

वस्तुतः अस्माकं पितृव्यचरणैस्तद्धस्तलिखितं केवलं *रसगङ्गाधर*पुस्तकम् इत्येव मत्वा अस्मभ्यं प्रदत्तम्। तदा अस्माभिः कल्पितम्, इदं सौवर्णमङ्गुलीयकं सम्प्राप्तमिति। परं यदा तद् हस्तलिखितम् उद्घाटय पठितम्, तदा तद् शब्दपूर्वकं रत्नगर्भमासीत् इति प्रह्लन्नमानसैरस्माभिर्ज्ञातम्।

तदिदं *शब्दरत्नस्य* पुस्तकम् "च–पुस्तकम्" इति सङ्केतेन अस्माभिः संस्करणेऽस्मिन् सर्वत्र व्यवह्रियते।

पुस्तकलेखनवैशिष्ट्यम्।

अत्यन्तमल्पाकारमपि हस्तलिखितमिदं सर्वेष्वपि पञ्चसु पुस्तकेषु उत्कृष्टतमम्, इत्यस्माकं मतम्। क्वचित् त्रुटिः, कुत्रचित् अक्षरव्यत्यासः, इत्यादयो दोषाः यद्यप्यत्र दृश्यन्ते, तथापि तुलनया ते अत्यन्तमल्पिष्ठाः। लिपिवैशिष्ट्येन लेखनशैल्या च केनापि महाराष्ट्रियेण छात्रेण एतत् पुस्तकं लिखितम्, इति प्रतिभाति। इतरेभ्यश्चतुर्भ्योऽपि पुस्तकेभ्यः अस्य पुस्तकस्य वैशिष्ट्यं झटित्येव नयनगोचरं भवति। प्रायो लेखनिकद्वयेन एतत् पुस्तकं लिखितम् इत्यस्माकं मतिः। अस्मिन् पुस्तके तु सर्वत्र वाक्यान्ते दण्ड एव; न तु आधुनिकपूर्णविरामचिह्नम् (.) बिन्दुः।

पत्रपङ्क्त्यक्षरादिमापनम् ।

षट्सप्ततिपत्रात्मकेऽस्मिन् पुस्तके प्रतिपृष्ठं सामान्यतः षोडश सप्तदश वा पङ्क्तयो विद्यन्ते। प्रतिपङ्क्ति च प्रायः षष्टिः अक्षराणि। १३×५ इंचपरिमितस्य पत्रस्य लेखनिबद्धः भागः ११×३॥ इंचपरिमितो वर्तते। पत्राणि अत्यन्तं जीर्णानि प्रायः शतद्वयसंवत्सरेभ्यः प्राचीनानि स्युः। सर्वेष्वपि पुस्तकेषु इदमेव प्राचीनतमं पुस्तकम्, इत्यस्माकं मतम्।

प्रारम्भः परिसमाप्तिश्च ।

अनाद्यनन्तस्य अस्य पुस्तकस्य वर्णनं कथं कर्तव्यम् ? स्वादिसन्धिप्रारम्भावसरे तु एवं दृश्यतेः—

श्रीः। **प्रत्याख्यातत्वादिति।** अस्या अप्रत्याख्याने 'ग्रहणवता प्रातिपदिकेन' इति परिभाषाया निर्मूलत्वं स्यात्, इति भावः।

अत्र च स्वादिसन्धेः प्रारम्भो वर्तते। अस्य पुस्तकस्य अन्ते षट्सप्ततितमे पत्रे च एवं ग्रन्थो दृश्यतेः—

भाष्यव्यतिरिक्तमते इति। अचः परो यो झल् तदन्तादिति, 'वर्णग्रहणे जातिग्रहणम्' इति च नाश्रीयते, इति भावः।

॥ इति हलन्तनपुंसकलिङ्गाः ॥

[एवं च अत्यल्पपत्रात्मकमपीदं पुस्तकं *शब्दरत्नस्य* द्वितीयभागस्य सम्पादनकर्मणि महते उपयोगाय कल्पेत, इति विभावयामः।]

अक्षरव्यत्यासाः

अत्र सर्वेष्वपि पुस्तकेषु विशिष्य च क–ख–घ–पुस्तकेषु प्रतिपङ्क्ति नैकेषु स्थलेषु लेखनसमये लेखनिकैः अनवधानेन, भ्रान्त्या, स्वकीयविशिष्टलेखनशैल्या च अक्षरविपर्ययः कृतो दृश्यते, इति पूर्वं पुस्तकवर्णनावसरे बहुवारमस्माभिः प्रतिपादितम्। सोऽयमक्षरव्यत्यासः अधुना सविस्तरमत्र उभयविधाक्षरलेखनपूर्वकं प्रदर्श्यते। तत्र प्रायः सामान्यस्वरूपेण सर्वत्रोपलभ्यमानः अक्षरव्यत्यासः अत्र उद्ध्रियतेः—

°कारस्थाने	°कारः	°कारस्थाने	°कारः	°कारस्थाने	°कारः
अ	श्र	व	च	त	न
श्र	अ	छ	थ	प	य
इ	ढ	थ	छ	य	प
ड	इ	ज्ञ	क्ष	ब	व
इ	द	क्ष	ज्ञ	व	ब
द	इ	झ	भ	भ	म
इ	३	भ	झ	म	भ
३	ई	ञ	त्र	र	ट
उ	ड	त्र	ञ	ट	र
ढ	उ	ट	ढ	र	ण
ए	ण	ढ	ट	ल	ळ
ण	ए	य	थ	ळ	ल
घ	य	थ	य	श	हा
य	घ	न	त	हा	श
ङ	ड	त्र	न्न	ह	ड
ड	ङ	न्न	त्र	ड	ह
च	व				

एतच्च उपरि निर्दिष्टं सर्वं केवलम् असंयुक्तानाम् अक्षराणां विषयेऽस्माभिरत्र सविस्तरम् उपवर्णनं कृतम्। क्र, क्त्र, क्त, त्त, त्न, त्र, न्न इत्यादीनां संयुक्ताक्षराणां विषये तु स्थाने स्थाने व्यत्यासाः दृश्यन्ते। ते तु अत्र परिगणयितुमशक्याः। केवलं दिङ्मात्रमत्रोदाहृताः। तथैव

˓ रेफस्थाने	· अनुस्वारः
· अनुस्वारस्थाने	˓ रेफः
ˎ ऊर्ध्वमात्रास्थाने	· अनुस्वारः
· अनुस्वारस्थाने	ˎ ऊर्ध्वमात्रा

किञ्च ऊर्ध्वमात्रास्थाने पृष्ठमात्रा दीयते, इत्येतदपि वैशिष्ट्यमत्र क्वचित् दृश्यते।

तथैव वाक्यान्ते दण्डस्थाने पूर्णविरामचिह्नं (·) बिन्दुरूपेण दीयते इति क-ख-घ-पुस्तकेषु अपूर्वं वैशिष्ट्यं दृश्यते।

सम्बन्धविमर्शः

उपलब्धपुस्तकानाम् अन्योऽन्यसम्बन्धविवरणम्

अधुना उपवर्णितेषु पुस्तकेषु कतमत् प्राचीनतमम्, कतमत् च अर्वाचीनतमम्; कतमत् सम्पूर्णम्, कतमत् च असम्पूर्णम्; इत्यादि सर्वं तत्रत्येन वर्णनेन ज्ञातुं शक्यते। अत्र तु तेषां पुस्तकानां परस्परं [1]सम्बन्धो वर्तते वा कश्चित्; इत्यादि द्रष्टव्यं भवति।

यदि पुनः एतानि सर्वाण्यपि पुस्तकानि प्राचीनतमात् ग–पुस्तकादेव सङ्क्रमितानि, तर्हि सर्वेषामपि पुस्तकानाम् एकपरम्परामूलकत्वमेव, इति वक्तुं पार्येत। तथा च नास्ति तादृश उपयोगः मूलग्रन्थसम्पादनचिकित्साकर्मणि ग–पुस्तकमाश्रित्यैव लिखितानां सम्पादितानां च क–ख–घ–च–पुस्तकानाम्, इति स्पष्टं वक्तुं शक्येत। यतः सर्वेषामपि पुस्तकानां साहाय्येन "हरिदीक्षितकृतः शब्दरत्नग्रन्थः यावच्छक्यं मूलस्वरूपेण सम्पादनीयः" इति हि सर्वस्यापि अत्रत्यस्य विमर्शस्य बीजम्[2]। स च विमर्शः एतादृशे प्रसङ्गे एकस्य ग–पुस्तकस्य साहाय्येन यथा कर्तुं शक्येत तथैवान्येषामपि पुस्तकानां साहाय्येन।

सुलभतरः पाठः स्वीकार्यः ?

यतः मूलग्रन्थनिर्धारणं नाम न उत्कृष्टपाठस्वीकरणम्; अथवा कः सुलभः समीचीनः पाठः, कश्च असमीचीनः दुर्बोधश्च पाठः, एतादृशस्वरूपो विमर्शोऽपि न। प्रत्युत बहुषु स्थलेषु च उपलब्धयोः द्वयोः पाठयोः कठिनतरपाठे एव मूलग्रन्थत्वसम्भावना कर्तुं योग्या भवति। यतः आवृत्तिकरणसमये मूलग्रन्थस्थं कठिन पाठं वीक्ष्य तत्स्थाने केनापि सम्पादकेन, पाठकेन अथवा लेखनिकेन ग्रन्थलापनार्थं प्रायः सुलभतरः पाठः संसूच्यते स्थाप्यते च इत्यस्ति अनुभवः। अतः ग्रन्थकारस्याभिमतः मूलः पाठः कः, इत्यस्मिन् विषये उत्कृष्टनिकृष्टसुलभतरकठिनतरादिविषयमनादृत्य पाठभेदचिकित्साशास्त्रीयप्रक्रियानुसारं क्रियमाणो विमर्श एवात्राभिप्रेतः। एवं विमर्शे क्रियमाणे मूलग्रन्थत्वेन स्वीक्रियमाणः पाठः कदाचित् असामीचीनोऽपि स्यात्। अस्तु

---

1. See "Critical Recension" Chap. IV *Indian Textual Criticism.*


2. (a) Textual criticism has for its sole object the interpretation and controlling of the evidence contained within the manuscripts of a text or in documents so that we can reach as far back as possible and try to recover the authentic text or to determine as nearly as possible the words written by the author himself. p. 30.

(b) All that a proper recension of a text does is to report the evidence of the documents which are the primary witnesses to the text so transmitted and to decide which documents are the most trustworthy owing to their age or character. p. 54.

नाम असमीचीनः। असमीचीन एव सः पाठः अस्माभिः मूलग्रन्थत्वेन स्थापनीयः, इति हि अत्रत्यं मूलतत्त्वम्। एतच्च सर्वमस्माभिः प्रथममेव मूलग्रन्थनिरूपणावसरे प्रतिपादितम्।

एवं च अनया सरण्या एतादृक्स्वरूपमूलग्रन्थनिर्धारणार्थम् एकपरम्परात एव समागतानां भिन्नभिन्नपुस्तकानामपि न तादृश उपयोगो भवति। उदाहरणार्थम् एवं कल्पना क्रियताम्; यत् इदं ग–पुस्तकं वर्तते, तस्मात् क–पुस्तकं सङ्क्रामितम्, तस्माच्च ख–पुस्तकम्, तस्माच्च घ–च–पुस्तके। यथाः—

शब्दरत्नस्य मूललेखः



यदि चात्र प्रदर्शितपद्धत्या एकपरम्परयैव सर्वेषामपि पुस्तकानामुपलब्धिर्भवेत्, तर्हि उत्तरोत्तरपुस्तकस्य मूललेखपुस्तकस्थग्रन्थापेक्षयाधिकाधिकदूरसरणस्य, सति सम्भवे च अधिकाधिकदोषयुक्तत्वस्यैव शक्यता। सर्वेषामपि उत्तरोत्तराणां पुस्तकानां लेखनिकाः अत्यन्तं प्रामाणिकाः, यथावल्लेखनदक्षाः, अनवधानभ्रान्त्यादिदोषमुक्ताश्च इति यदि उच्यते (वस्तुतः प्रायः तथा न दृश्यते) तर्हि ग–पुस्तकलेखानुकरणमात्रतत्पराणां क–ख–घ–च–पुस्तकानां न मनागपि उपयोगः मूलग्रन्थनिर्धारणार्थम्। न कोऽपि लाभः, प्रत्युत व्यर्थः परिश्रमः, सति सम्भवे बुद्धिभेदः, बहुधा दुष्टपाठसम्भावना च। अतः सर्वाण्यपि एतादृंशि पुस्तकानि अस्वीकार्याण्येव। अत एव चात्र एतदवश्यं विमर्शनीयं भवति, यद् अधुनोपवर्णितानाम्, उपलब्धानाम् क-ख–ग–घ–च–पुस्तकानां परस्परं कः सम्बन्धो वर्तते? एका एव परम्परा सर्वेषां पुस्तकानाम्, उत भिन्ना परम्परा?

तत्र आपाततोऽवलोकनेऽपि शब्दरत्नस्य अस्मिन् संस्करणे एवं स्पष्टं दृग्गोचरीभवेत्, यत् चतुर्षु पुस्तकेषु (पञ्चमं च—संज्ञितं पुस्तकं तु स्वादिसन्धिमारभ्य प्रवृत्तम्, इति तद्विषयको विचारः अस्य प्रकरणस्यान्ते प्राधान्येन भवेत् ।) क—ख—घ—पुस्तकानाम् एका परम्परा दृश्यते; अन्या च परम्परा एकस्यैव ग—पुस्तकस्य ।

न केवलम् अक्षरव्यत्यासः, अहैतुकी त्रुटिः, अथवा हैतुकः प्रक्षिप्तः पाठः, अथवा अशुद्धस्थाने शुद्धपाठस्थापना इत्यादयो विशेषाः क—ख—घ—पुस्तकानाम् अपेक्षया ग—पुस्तके उपलभ्यन्ते; किन्तु अत्यन्तं दीर्घदीर्घतराः महत्त्वपूर्णाश्च पाठाः अस्मिन् ग—पुस्तके तथोपलभ्यन्ते यथा निःसन्दिग्धतया ग—पुस्तकस्य परम्पराभेदः झटिति ज्ञातुं शक्येत । अस्मिन् परम्पराभेदनिर्धारणविषये च एतदेव [1]प्रबलतमं प्रमाणं यन्महत्यो ग्रन्थत्रुटयो नाम। तत्र स्पष्टप्रतिपत्त्यर्थं कानिचनोदाहरणानि अत्र उपस्थाप्यन्ते :

१. ग. [2]इति च व्याख्यास्यते इति।.... पृ. ५, [3]पं. २२ तः २६.
क.ख.घ. ग्रन्थत्रुटिः

२. ग. यत्तु यावदुच्यते ....इत्यलम्। पृ. १६, १७, १८.
क.ख.घ. ग्रन्थत्रुटिः

३. ग. 'हयवरट्'.... इत्यन्यत्र विस्तरः। पृ. २०, पं. ९ तः १६.
क.ख.घ. ग्रन्थत्रुटिः

---

1. The more usual tests to decide the genealogical relationship between manuscripts are :

a) Omissions of words and passages and transpositions of passages. Omissions are the surest test of affinity, says Hall, since if they are numerouse they can hardly have arisen by accident, and all of these cannot have been imported into a text by a comparison with other manuscripts. They frequently imply a far closer connection then could be inferred by identity of reading, and often show the immediate descent of one manuscript from another.

b) Agreement in a number of peculiar readings or in other peculiarities. It must be remembered tbat the relationship between manuscripts is not always simple; each manuscript accepted as a factor in constructing the text is not necessarily descended from one single ancester, so that complete identity of reading is not always possible from manuscripts derived ultimately from the same source. *Indian Textual Criticism.* p. 38.

२. अत्र इतःपरं प्रदत्तेषु उदाहरणेषु च प्रथमम् (उपरिष्टात्) उद्धृताः पाठाः अस्माकम् मूलग्रन्थत्वेन अभिमताः, इति ज्ञातव्यम् ।

३. उपरिष्टात् पाठः स्थलसङ्कोचेन अनावश्यकतया च सङ्क्षेपत एव दत्ताः । अत्र निर्दिष्टय । पङ्क्तिसङ्ख्ययैव पाठस्य दीर्घता झटिति प्रतीतिमियात् ।

४. ग. यदपि .... इत्यलम् । पृ. २२ पं. ९ तः १७.
क.ख.घ. ग्रन्थत्रुटिः

५. ग. भिन्नस्थानानां ....इति केचित् । पृ. ३९ पं. ४–६.
क.ख.घ. ग्रन्थत्रुटिः

६. ग. अत्रेदमवधेयम् । ....इत्याहुः । पृ. ४५ पं. १६, पृ. ४६ पं. ३.
क.ख.घ. ग्रन्थत्रुटिः

७. ग. पदसंस्कारपक्ष [मादाय....वाक्यसंस्कार] पक्षे पृ.४८ पं.१४-१६.
क.ख.घ. ग्रन्थत्रुटिः

८. ग. यत्तु ....चारितार्थ्यात् । पृ. ५६ पं. ९–१२.
क.ख.घ. ग्रन्थत्रुटिः

९. ग. एवं च ....कुत्वमिच्छन्ति । पृ. १०२ पं. ७–१०.
क.ख.घ. ग्रन्थत्रुटिः

१०. ग. न च ....समानम् । पृ. १०३ पं. ११–१४.
क.ख.घ. ग्रन्थत्रुटिः

११. ग. विकल्पासहत्वात् । ....किञ्चन पृ. १०८ पं. १८–२१.
क.ख.घ. ग्रन्थत्रुटिः

१२. ग. वस्तुतस्तु ....सुवचम् । पृ. १०९ पं. ४–६.
क.ख.घ. ग्रन्थत्रुटिः

१३. ग. किञ्च, ...चरमावयवः । पृ. ११८ पं. १२–१६.
क.ख.घ. ग्रन्थत्रुटिः

इत्येतादृक्षा बहवः पाठभेदाः प्रदर्शयितुं शक्यन्ते । शब्दरत्नग्रन्थादेव तत् अधिकं स्पष्टं भविष्यति । उपरिनिर्दिष्टाः महत्त्वपूर्णाः पाठाः क–ख–घ–पुस्तकेषु त्रुटिताः सन्ति । अधुना ग–पुस्तकात् त्रुटितेषु महत्त्वपूर्णेषु पाठेषु केचन पाठाः अत्र समुद्ध्रियन्ते । तथा च अन्वयव्यतिरेकाभ्यां क–ख–घ–पुस्तकानामपेक्षया ग–पुस्तकस्य परम्परा अत्यन्तं भिन्ना इति सिद्धं भवेत् । उदाहरणार्थम्:—

१. क.ख.घ. अत एव .... °अनुपन्यासो .... पृ. ३ पं. १८–१९.
ग. ग्रन्थत्रुटिः

२. क.ख.घ. धातुत्वादि .... अपास्तम । पृ. २४ पं. २३ तः पृ. २५ पं. ९
ग. ग्रन्थत्रुटिः

३. क·ख·घ· स्यादेतत् । .... °समये.... पृ. ५१ पं. १९ तः पृ. ५२ पं. ९.
ग· ग्रन्थत्रुटिः

४. क·ख·घ· इह मुण्डो ....पितामहचरणैः । पृ.५४ पं. ९ तः पृ. ५५ पं. १७.
घ· ग्रन्थत्रुटिः

५. क·ख·घ· यद्वा उ .... साधु । पृ. ५८ पं. १६–१८.
ग· ग्रन्थत्रुटिः

६. क·ख·घ· अत एव .... सङ्गच्छते । पृ. ७३ पं. १८–२०.
ग· ग्रन्थत्रुटिः

७. क·ख·घ· यत्तु .... ज्ञापकमित्याहुः । पृ. ९७ पं. २१ तः पृ. ९८ पं. २.
ग· ग्रन्थत्रुटिः

८. क·ख·घ· युगपत्प्रवृत्तावपि .... प्रवृत्तिः । पृ. ९८. पं. १५–१७.
ग· ग्रन्थत्रुटिः

९. क·ख·घ· न च .... अन्यत्र विस्तरः । पृ. ९९ पं. १३–१६.
ग· ग्रन्थत्रुटिः

१०. क·ख·घ· स्थानिवत् .... °स्थानी .... पृ. १०७ पं. १६–१८.
ग· ग्रन्थत्रुटिः

११. क·ख·घ· यत्तु .... हलन्तकौमुद्याम् । पृ. ११० पं. १३–१७.
ग· ग्रन्थत्रुटिः

१२. क·ख.घ· अत एव .... मानम् । पृ. ११८ पं. १८ तः पृ. ११९ पं. ४.
ग· ग्रन्थत्रुटिः

उपरि प्रदर्शितेषु उदाहरणेषु ग–पुस्तकस्थां ग्रन्थत्रुटिं प्रदर्श्य इदानीं ग–पुस्तके क–ख–घ-पुस्तकापेक्षया भिन्नतया उपलभ्यमानाः दश पाठभेदाः प्रदर्श्यन्तेः—

१. क·ख·घ· अहमुल्लेखगोचरता । पृ. १ पं. २२.
ग· °मुल्लेख्य°

२. क·ख·घ· लोपाप्रवृत्तेः । पृ. ८ पं. ७.
ग· लोपाप्राप्तेः ।

३. क·ख·घ· दीर्घस्थानिक° .... पृ. ८ पं. २२.
ग· दीर्घादिस्थानिक° ....

४. क·ख·घ· प्रातेत्संज्ञाया व्यावर्तनेन .... पृ. १४ पं. १६.
ग· प्रातेत्संज्ञा या व्यावर्तते, तेन ....

५. क·ख·घ· स्वरितमात्रग्रहणार्थम्। पृ. ३३ पं. १२–१३.
ग· °मात्रसङ्ग्रहार्थम्।

६. क·ख·घ· 'न य्वाभ्याम्' इति सूत्रे तु चरमपदे .... पृ. ४० पं. १२.
ग· .... चरमपक्षे ....

७. क·ख·घ· संज्ञ्यन्तरोपादानेन .... पृ. ४० पं. १६.
ग· संज्ञान्तरो° ....

८. क·ख·घ· उत्वनित्यत्वम् .... पृ. ४४ पं. ५.
ग· उत्वं नित्यम्

९. क·ख·घ· द्वित्वप्रवृत्तौ .... पृ. ४५ पं. ९.
ग· °प्रवृत्तावपि ....

१०. क·ख·घ· रूपसिद्धेः। पृ. ४५ पं. १३.
ग· °सिद्धेश्च।

किञ्च क–ख–घ–पुस्तकानामेकशाखात्वसम्पादनार्थम् अन्यदेव एकं समीचीनतरं प्रमाणमुपलभ्यते। तच्च यथा:—बहुषु स्थलेषु अत्यन्तमशुद्धोऽपि ग्रन्थः, सर्वथा असम्भाव्यं च पदं क–ख–घ–पुस्तकेषु समानाक्षरैः तुल्याकारेणैव च उपलभ्यते। न हि निरर्थकानि अत्यन्तमशुद्धानि च पदानि एकपरम्पराया अभावे केवलं घुणाक्षरन्यायेन अथवा काकतालीयन्यायेन भिन्नैर्लेखनिकैः लिखितानि, इति वक्तुं युक्तम्! उदाहरणार्थं दृश्यताम्:—

१. "भाष्यग्रन्थानुद्धारात्" इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
"भाष्यग्रन्थानुष्ठानात्" इत्यशुद्धमुपलभ्यते। पृ. १० पं. २.

२. "असन्न्यायोपन्यासपूर्विकायाः" इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
"सन्न्यायोपन्यासपूर्विकायाः" इत्यशुद्धमुपलभ्यते। पृ. २१ पं. ११.

३. "°पुंस्त्वस्याप्यावश्यकत्वम्" इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
"°पुंस्त्वस्याप्यवश्यकत्वम्" इत्यशुद्धमुपलभ्यते। पृ. ३० पं. ७.

४. "प्राञ्चस्तु" इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
"प्राचस्तु" इत्यशुद्धमुपलभ्यते। पृ. ३२ पं. १०

५. " त्रिपादीस्थ° " इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
" त्रियादिस्थ° " इत्यशुद्धमुपलभ्यते । पृ. ३३ पं. १३.

६. " अच्ग्रहणेन " इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
" अत्ग्रहणेन " इत्यशुद्धमुपलभ्यते । पृ. ५० पं. १६.

७. " चारितार्थ्येन " इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
" चारितार्थ्ये " इत्यशुद्धमुपलभ्यते । पृ. ५१ पं. १३.

८. " अण्ग्रहणं कुर्वतः सूत्रकारस्य मते " इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
" अण्ग्रहणकुर्वत्सूत्रकारमते " इत्यशुद्धमुपलभ्यते । पृ. ५३ पं. १३.

९. " °शब्दानां" इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
" °शब्दता" इत्यशुद्धमुपलभ्यते । पृ. ५८ पं. ७.

१०. " पशुषः " इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
" पपुषः " इत्यशुद्धमुपलभ्यते । पृ. ६० पं. १३.

११. " तद्विना " इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
" तं विना " इत्यशुद्धमुपलभ्यते । पृ. ६५ पं. १७.

१२. " यलोपप्रवृत्तेश्च " इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
" यलोपवृत्तेश्च " इत्यशुद्धमुपलभ्यते । पृ. ६८ पं. ८.


१३. " °विषयः मानान्तर°" इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
" विषयसमानान्तर°" इत्यशुद्धमुपलभ्यते । पृ. ८३ पं. ६.

१४. " स्वमतप्रच्युत्यभावार्थम् " इत्यस्य स्थाने क–ख–घ–पुस्तकेषु
" स्वमतप्रच्युतभावार्थम् " इत्यशुद्धमुपलभ्यते । पृ. ९१ पं. ११.

एतादृंशि नैकानि उदाहरणानि अस्माभिरत्र प्रदर्शयितुं शक्यन्ते । वस्तुतः एतादृशामशुद्धानामत्र संस्करणे पाठभेदत्वेनोद्धरणस्यायमेवोपयोगो महान्, यदेतेषां क–ख–घ–पुस्तकानाम् एकपरम्परामूलकत्वनिर्धारणं नाम ।

[1]अधुना एतत् स्पष्टं भवति यद् शब्दरत्नस्य क–ख–घ–पुस्तकानाम् अपेक्षया ग–पुस्तकस्य परम्परा सर्वात्मना भिन्ना वर्तते इति । अतः वंशवृक्षालेखप्रदर्शनार्थम् अस्माभिः प्रथमतः एवं प्रदर्श्यते:—

1. *Indian Textual Criticism* p. 39 lines 10–20



एवं स्थिते, एकपरम्पराप्राप्तेषु क–ख–घ–पुस्तकेष्वपि सर्वात्मना एकवाक्यता नोपपद्यते। ख–पुस्तके क–घ–पुस्तकापेक्षया केषुचन स्थलेषु त्रुटिर्दृश्यते, केषुचन स्थलेषु च अधिको ग्रन्थः, क्वचिच्च भिन्नाः महत्त्वपूर्णाः पाठभेदाः सन्दृश्यन्ते। अतः ख–पुस्तकस्य एका क–घ–पुस्तकयोश्च अन्तर्गता अन्या परम्परा अवश्यं स्वीकर्तव्या भवति। उदाहरणार्थं द्रष्टव्यम्:—

१. क·घ· सर्वप्रियकारित्वेन .... पृ. १ पं. २१.
   ख· सर्वप्रियकार्युपकारित्वेन ....
   ग· सर्वप्रियकार्यकारित्वेन ....

२. ख·ग· वयमित्यपि बहुवचनम्। पृ. २ पं. ३.
   क·घ· ग्रन्थत्रुटिः

३. ख·ग· सूत्रं न कर्तव्यम्। पृ. २ पं. ४.
   क·घ· सूत्रमनुकर्तव्यम्। ....

४. क·घ·ग· आशङ्कते–इदमिति। .... उक्तम्। पृ. ४ पं. ७–८.
   ख· ग्रन्थत्रुटिः

५. क·घ· जहीत्यादौ दीर्घापत्तेः। पृ. ४ पं. १०.
   ग· जहीत्यादौ दीर्घाद्यापत्तेः। ....
   ख· जहीत्यादौ दीर्घापत्तेः। "आदिशब्दग्राह्यं तु 'अजूहवत्' इत्यत्र 'ओः पुयण्जि' इत्यापत्तेः।" इत्यधिको ग्रन्थ उपलभ्यते।

६. क·ग·घ· अत एव प्लुतप्रकरणे .... सङ्गच्छते। पृ. ३० पं. १०–१२.
   ख· ग्रन्थत्रुटिः

७. क.ग.घ. वर्णग्रहणे जातिग्रहणात्, ... पृ. ३१ पं. १५.
ख. वर्णजातिग्रहणात्, ...
८. क.घ. भेदार्थं .... पृ ३८ पं. १.
ख.घ. भेदार्थे
९. क.ग.घ. यथा वा .... पृ. ३८ पं. १५.
ख. यथा च
१०. क.घ. दन्तोष्ठम् .... पृ. ३९ पं. १५.
ख.ग. दन्तोष्ठ्यम् ....
११. ख.ग. आवश्यकत्वाच्च।....योगविभाग...पृ.३९ पं.२२तःपृ.४०पं.२.
क.घ. ग्रन्थत्रुटिः
१२. क.घ. अथास्य सिद्धत्वपक्षे तु लक्ष्ये ... पृ. ४४ पं. २०
ख.ग. आर्यादभावस्य सिद्धत्वाकार्यासिद्धत्वपक्षे तु लक्ष्ये ....
१३. क.ग.घ. न हि रजतभ्रमप्रयुक्ता .... पृ. ४५ पं. ७
ख. तर्हि ....
१४. क.ग.घ. निरूपयिष्यामः। .... स्वप्रागभावा° पृ. ६१ पं. ७
ख. ग्रन्थत्रुटिः
१५. क.ग. दुर्वारत्वात्। .... न दोषः। पृ. ६८ पं. १०–१४.
ख.घ. ग्रन्थत्रुटिः

इत्येतादृंशि बहून्युदाहरणान्यत्र प्रदर्शयितुं शक्यन्ते। एषु उदाहरणेषु केषुचन स्थलेषु ख–ग–पुस्तकयोः साम्यं वर्तते, क्वचित् ख–घ–पुस्तकयोः साम्यं दृश्यते, बहुषु स्थलेषु च ख–पुस्तके एव तथात्वेन पाठ उपलभ्यते। अत्र सङ्गृहीतेषु उदाहरणेषु ख–पुस्तके क्वचित् ग्रन्थाधिक्यम्, क्वचित् लेखनिकानवधानजन्या त्रुटिः क्वचिच्च भिन्नः पाठभेदः, कुत्रचित् लेखनिकेन ग्रन्थमध्ये अन्तर्भावितः टिप्पणीग्रन्थः, इत्यादयो विविधाः प्रकाराः प्रदर्शिताः, येन ख–पुस्तकस्य पार्थक्येन अत्र स्वीकर्तव्यतायाः आवश्यकता समीचीनया रीत्योपपन्ना भवेत्।

किञ्च एतदर्थमावश्यकानि वैशिष्ट्यपूर्णानि क्वचिदशुद्धानि अन्यान्यपि उदाहरणानि अत्र दीयन्ते। तानि च यथाः—

१. ख.ग. पादादौ ‘उणादयो बहुलम्’ .... पृ. २३ पं. १२
क.घ. पदादौ
२. ख.ग. ‘झलो झलि’ इतिवन्निमित्त° पृ. २४ पं. १६.
क.घ. ‘झलो झलि’ इति च निमित्त°

३.	ख.ग.	यौगिकार्थाबाधस्य पृ. २६ पं. ७.
	क.घ.	यौगिकार्थबाधस्य
४.	क.ग.घ.	अनैमित्तिकात्व° पृ. २९ पं. ८–१२.
	ख.	अनैमित्तिकत्व°
५.	क.ग.घ.	व्याख्यानमेव पृ. २९ पं. १७
	ख.	व्याख्यानं च
६.	ख.ग.	'अपृक्तं हल्' पृ. ३० पं. १३.
	क.घ.	अपृक्तहल्
७.	क.ग.घ.	क्नोः कित्करणं पृ. ३२ पं. २२, पृ. ३३ पं. ५.
	ख.	क्नोः कित्करणं
८.	ख.ग.	सपादसप्ताध्याय्याम् पृ. ४१ पं. १६.
	क.घ.	सप्ताध्याय्याम्
९.	ख.	प्रदोधुवच्छ्मश्रुषु पृ. ४६ पं. ९.
	क.घ.	प्रदाधुवच्छ्र्यश्रुषु
	ग.	प्रदोधुवच्मश्रुषु
१०.	क.ग.घ.	ऋकारग्रहणे पृ. ५३ पं. १४.
	ख.	ऋकाराग्रहणे
११.	क.ग.घ.	स्वरसन्धिप्रकरण एव प्रवृत्तौ .... पृ. ५३ पं. २२.
	ख.	स्वरसन्धिप्रकरण एव वृत्तौ
१२.	ख.ग.	अग्निमीळे पृ. ७४ पं. ६.
	क.घ.	अग्निमीले
१३.	क.घ.	निष्पन्नमूर्तिकः सन् पृ. ७६ पं, ५.
	ग.	निष्पन्नमूर्तिकः सः
	ख.	निष्पन्नमूर्तिकरः सन्
१४.	क.ग.घ.	दुर्वारमिति दिक्। पृ. ७८ पं. ८.
	ख.	दुर्वारमिति दिक्। ('तस्मिन्निति निर्दिष्टे पूर्वस्य' 'तस्मादित्युत्तरस्य' इति सूत्रद्वयविषयम्, इति दिक्) इति प्रक्षिप्तो ग्रन्थो दृश्यते।

एवं च अधुना विविधैः प्रकारैः क–घ–पुस्तकापेक्षया ख–पुस्तकस्य वैशिष्ट्ये सिद्धे क–घ–पुस्तकयोः ख–पुस्तकस्य च लेखनिकैः लेखनार्थं स्वीकृतं पुस्तकद्वयं भिन्नं कल्पनीयं भवति। तादृशस्य पुस्तकद्वयस्य स्वीकारं विना च एतादृशपाठभेदानाम् उपपत्तिर्नैव सम्भवति। तदेव उपपादयितुं च उपशाखाद्वयस्वरूपेण भिन्नं मध्यं पुस्तकद्वयं कल्पनीयं भवति। ततश्च एकस्मात् उपशाखा–पुस्तकात् क–घ–पुस्तके अन्यस्माच्च उपशाखा–पुस्तकात् ख–पुस्तकम्। एवं च स्वीकृते उपशाखा–पुस्तकद्वये तत्रत्यानां (तत्पुस्तकलेखनिकानां वा) दोषाणाम् अनुवृत्तिः यथायथं क–घ–पुस्तकयोः ख–पुस्तके च सञ्जाता, इति कल्पयितुं शक्यते।

अत्रेदमवधार्यताम्

शब्दरत्नस्य क–घ–पुस्तकयोः अपि नातिमहत्त्वपूर्णाः पाठभेदाः द्रष्टुं शक्यन्ते एव। किञ्च ग्रन्थलापनेऽपि तयोः परस्परसाहाय्यमुपलभ्यते। किञ्च क–पुस्तकस्थानि बहून्यशुद्धानि स्थलानि घ–पुस्तकसाहाय्येन शुद्धानि कर्तुं शक्यन्ते, घ–पुस्तकस्थानि च अशुद्धस्थलानि क–पुस्तकसहाय्येन कर्तुं शक्यन्ते, इत्येतदपि महत्त्वपूर्णं साहाय्यं परस्परम् क–घ–पुस्तकयोः मूलग्रन्थस्थापनकर्मणि भवति। किञ्च लेखनिकानवधानजन्या भ्रान्तिमूलकाश्च ये दोषाः तान् दूरीकर्तुं प्रभवतः एते उभे अपि पुस्तके। इति विविधैः प्रकारैः अत्र क–घ–पुस्तकयोर्वैशिष्ट्यमचिरादेव कथ्यते। परमत्र पुस्तकसम्बन्धविमर्शे तत्तु नातिमहत्त्वपूर्णम्। अस्मिन् हि वंशवृक्षालेखे प्रथमतस्तावत् कल्पित-शाखपुस्तक-निर्धारणं महत्त्वपूर्णं कठिनतरं च कार्यम्। ततश्च कल्पित-उपशाखापुस्तकनिर्धारणं तदपेक्षयाऽपि महत्त्वपूर्णं कठिनतमं च कार्यम् आसीत्। अतस्तदेव कार्यम् एतावत्काल-पर्यन्तं सविस्तरं सोदाहरणं च प्रपञ्चितम। अग्रेऽपि तत्तत्पुस्तकस्वरूपविवरणावसरे विविधैरुदाहरणैः सविस्तरं विमृश्यते; येन कल्पितयोः उपशाखारूपयोः अनयोः *उ–*ऊ–पुस्तकयोः स्वीकारविषये मनागपि सन्देहो न स्यात्।


तथा चायमत्र निष्कर्षः

१. *शब्दरत्नस्य* चतुर्षु पुस्तकेषु क–ख–घ–पुस्तकानाम् एका शाखा अपरा च ग–पुस्तकस्य; एका *इ–पुस्तकसङ्केतेन स्वीकृता, अपरा च *ई–पुस्तकसङ्केतेन।

२. *इ–पुस्तकसङ्केतितात् शाखा-पुस्तकाच्च उपशाखा-पुस्तकद्वयं स्वीक्रियते। एकम् *उ–पुस्तकम् इति, अपरं च *ऊ–पुस्तकम्, इति।

३. *उ–पुस्तकसङ्केतितात् उपशाखा-पुस्तकात् क–घ–पुस्तके *ऊ–पुस्तक-सङ्केतितात् उपशाखा-पुस्तकाच्च ख–पुस्तकम् इति।

तदर्थं च वंशवृक्षालेखः एवं कल्पनीयो भवति—



किञ्च अत्रेदमवधार्यताम्:—यद्यपि क–घ–पुस्तकयोरेकशाखामूलकत्वम्, इति सुस्पष्टतया उपरितनालेखात् ज्ञातुं शक्यते, तथा च उपलब्धेषु सर्वेष्वपि पुस्तकेषु क–घ–पुस्तकयोरतीव साम्यं दृश्यते, अथापि केषुचन स्थानेषु तु तयोरपि भेदोऽस्त्येव। अतः तयोर्विभिन्नपुस्तकस्वरूपेण पृथक्तया स्वीकारस्यात्यन्तमावश्यकता वर्तते इति पूर्वमेवोक्तम्। तदर्थं साम्प्रतमुदाहरणानि:—

१.	ख·ग·घ·	°भाष्यादिप्रामाण्यात् .... पृ. ३ पं. ५.
	क·	इत्यादिसूत्रस्थभाष्यप्रामाण्यात् ....
२.	क·	अनभिप्रेतमिति .... पृ. ४ पं. १४.
	ख·ग·घ·	अनभिप्रेतत्वमिति ....
३.	क·	अर्थतन्त्रं चेति .... पृ. ५ पं. ४.
	ख·ग·घ·	अर्थतन्त्रं वेति
४.	ख·ग·घ·	तदप्रतीतेश्च पृ. १० पं. १४.
	क·	तदर्थप्रतीतेश्च
५.	ख·ग·घ·	दीर्घापत्त्या ह्रारन्त्यम् पृ. १२ पं. १२.
	क·	दीर्घापहारात्परम्
६.	ख·ग·घ·	च प्रश्लेषाभावस्य पृ. १८ पं. १३.
	क·	चेकारप्रश्लेषाभावस्य

७. क·ख· महासंज्ञाकरणेन पृ. २६ पं. ७.
ग·घ· महासंज्ञायाः करणेन

८. क·ग· द्विमात्रबुद्धेः .... पृ. ४५ पं. ६.
ख·घ· द्विमात्रे बुद्धेः ....

९. क·ग· सूत्रप्रवृत्तिरिति ज्ञाप्यते। .... पृ. ५९ पं. २०.
ख·घ. सूत्रप्रवृत्तिर्ज्ञाप्यते। ....

१०. क·ग· दुर्वारत्वात्। .... न दोषः पृ. ६८ पं. १०–१४.
ख·घ· ग्रन्थत्रुटिः

एवं च कल्पितेऽपि उपशाखाद्वयपुस्तके ख–पुस्तके कश्चन विशेषः प्रतीतो भवति। यत् इदं प्रशाखारूपं ख–पुस्तकम्, तस्मिन् ग–पुस्तकस्य भिन्न-परम्पराप्राप्तस्यापि प्रभावो[1] दृश्यते। स प्रभावः यद्यपि अत्यल्पस्थलेषु दृश्यते; तथापि तेषु स्थलेषु ख–पुस्तकलेखनिकेन स्वीयपरम्परां त्यक्त्वा ग–पुस्तकस्याः पाठभेदाः स्वीकृताः; इति दृश्यते। कालानुक्रमदृष्ट्या तत्र नास्ति असम्भवः। ग–पुस्तकं हि ख–पुस्तकापेक्षया २५ वर्षैः प्राचीनम्। एतच्च ख–ग–पुस्तकयोः पुष्पिकायां स्पष्टं प्रतिपाद्यते। अतः ख–पुस्तकलेखनिकेन अथवा तदीय–उपशाखा–*ऊ–पुस्तकलेख-निकेन प्रसङ्गवशात् ग–पुस्तकं दृष्टमासीत्, अथवा ग–पुस्तकमपि समये समये यदा शक्यता सञ्जाता तदा लेखनसमये पुरो निहितमासीत्, अथवा ग–पुस्तकपरम्परातः लिखितं नवीनं पुस्तकं ख–पुस्तकलेखनिकेन दृष्टमासीत्, इत्यादि अवश्यमूहनीयं भवति। तदर्थं च अत्र कानिचन उदाहरणस्थलानि उपस्थाप्यन्ते। यथा:—

१. ख·ग· अत एव ररन्त्यम् .... सिद्धेश्च। पृ. ७ पं. २०.
क·घ· ग्रन्थत्रुटिः

२. ख·ग· पादादौ 'उणादयो बहुलम्' पृ. २३ पं. १२.
क·घ· पदादौ ....

३. ख·ग· उपदेश .... शक्यत्वात्। पृ. २७ पं. २१–२३.
क·घ· ग्रन्थत्रुटिः

---

1. " It may sometimes happen that the peculiar resemblances of two manuscripts may not be such as to warrant the derivation of one from the other, might be sufficient to establish some connection between them, " *Indian Textual Criticism*, p. 38.

४. क.घ. स्वशब्दः करणल्युडन्तोच्चारण° पृ. ३१ पं. २२.
खं.ग. स्वशब्दः कालकरणल्युडन्तोच्चारण°


५. क.घ. 'दन्तोष्ठम्' इति समासनिर्देशेन पृ. ३९ पं. १५.
ख.ग. 'दन्तोष्ठ्यम्' ....

६. ख.ग. [आवश्यकत्वाच्च। .... योगविभाग] पृ. ३९ पं. २२,
क.घ. ग्रन्थत्रुटिः पृ. ४० पं. २.

७. क.घ. अथास्य .... लक्ष्ये .... पृ. ४४ पं. २०.
ख.ग. आर्थात् .... लक्ष्ये

८. ख.ग. विहितस्तदवयत्वे तेन, पृ. ७० पं. १०.
क.घ. विहितः, तदवयवत्वेन; तेन

एभिः उद्धृतैः उदाहरणैः एतत्स्पष्टं भवति, यत् क्वचित् क्वचित् स्थलेषु ग–पुस्तकस्य प्रभावः ख–पुस्तके सञ्जातः, इति। तथा च ग्रन्थवंशावृक्षालेखे ग–ख–पुस्तकयोः परस्परं सम्बन्धः अनया रीत्या प्रदर्शयितुमावश्यकः। यथाः—



अस्मिन् वंशवृक्षालेखे ग–पुस्तकस्य ख–पुस्तकोपरि प्रभावप्रदर्शनार्थं ग–ख–मध्ये बिन्दुभिः (....) सम्बन्धः आलेखितः। रेखाभिः संयोजितः सम्बन्धः साक्षात्परम्पराप्रदर्शकः, बिन्दुभिः संयोजितः सम्बन्धस्तु केवलं पूर्वपुस्तकप्रभावप्रदर्शकः; इति सङ्केतोऽस्मिन् शास्त्रे दृश्यते।

1. See stemma Codicum in (1) *Indian Textual Criticism*, p. 43; (2) *Sukthankar Memorial Edition, Vol. 1*, p. 41.

[अत्र क–घ–पुस्तकयोः समानपरम्परागतत्वे सिद्धे, स्वीकृते च तत्स्वरूपे तथात्वेन अस्मिन् आलेखे, घ–पुस्तकस्य किं वा वैशिष्ट्यम्; येन अस्मिन् संस्करणे तस्य पार्थक्येन उपयोगः क्रियते; एतद्विषयको विमर्शः सविस्तरं पृ.४१-४२ इत्यत्र कृतः।]

अयं चात्र निष्कर्षो भवतिः—ख–ग–पुस्तकयोः क्वचित् क्वचित् एकाकारेण उपलभ्यमानाः पाठभेदाः क–घ–पुस्तकयोः कल्पित–उपशाखापुस्तकापेक्षया ख–पुस्तकस्य उपशाखा–पुस्तकं भिन्नम् आसीत्; इत्यनुमाने प्रबलं प्रमाणं प्रदर्शयन्ति। अत एव च अस्माभिः वंशवृक्षालेखे क–घ–पुस्तकयोः मूलम् उपशाखा–पुस्तकम् *उ–पुस्तकम् प्रकल्पितम्, ख–पुस्तकस्य च *ऊ–पुस्तकम्।

तथा च *उ–*ऊ–पुस्तकयोः सम्भावितानां पाठानां त्रुटिः ग–पुस्तके यथा दृश्यते; तथैव *उ–*ऊ–पुस्तकयोः सम्भावितपाठापेक्षया ग–पुस्तके अधिकाः अपि पाठा उपलभ्यन्ते। अत एव कारणात् *उ–*ऊ–पुस्तकयोः उपशाखारूपयोः मूलं शाखा–पुस्तकम् *इ–पुस्तकम् एकं पृथक् कल्पितम्, तथैव ग–पुस्तकस्य च मूलं शाखा–पुस्तकम् *ई–पुस्तकम् इति अन्यत् शाखा–पुस्तकं वंशवृक्षालेखे कल्पितम्। तयोः कालः कः? तल्लेखनिकाः, अथवा तयोः पठितारः के वा सम्भावयितुं शक्यन्ते? इत्यादि विमर्शः तत्तेषाम् सर्वेषां पुस्तकानां विमर्शावसरे पार्थक्येन सविस्तरं चानुपदमेव भविष्यति। तत्र सर्वेषाम् उपलब्धानाम् अनुपलब्धानाम् च पुस्तकानां मूलपुस्तकमारम्य तत्तत्पुस्तकस्वरूपवर्णने वंशवृक्ष–परम्परासम्बन्धवर्णने च कर्तव्ये अस्माभिः कल्पितस्य–गृहीतस्य–मूललेखस्य वर्णनं प्रथमतः प्रारभ्यते।

***अ. गृहीतमूललेखस्वरूपम्** (Autograph) प्रायः ख्रि० १७००

हरिदीक्षितैः स्वयं लिखितम् अथवा लेखनिकद्वारा लेखितम् इदं **शब्दरत्नस्य** *अ–पुस्तकम्। तत्र 'हरिदीक्षितैः स्वयं पुस्तकं लिखितम् आसीत्' इति सामान्यतः पुस्तकलेखनपरम्परानुसारेण एतद् वक्तुं शक्यम्। परं 'तैः इदम् *अ–पुस्तकं लिखितमासीत् एव' इति निश्चये किमपि प्रमाणं नास्ति। [1]मूलपुस्तकस्यानुपलब्धेः।

---

१. अस्य **शब्दरत्न**-पुस्तकस्य किञ्चिदिव बहिरङ्गम् अत्र विमृशामः। यद्यपि तद् बहिरङ्ग-परीक्षणम् अस्मिन् पाठभेदचिकित्साकर्मणि नात्यन्तमावश्यकम्; तथापि अस्य **शब्दरत्नस्य** यो वंशवृक्षोऽस्माभिः प्रदर्शितः; तत्र च आद्यावृत्ति–शाखारूपाणि यानि नागेशभट्ट-वैद्यनाथपायगुण्डेमहाभागादीनाम् अनुपलब्धानि पुस्तकानि अस्माभिः स्वीकृतानि; तेषां स्वीकारस्य ऐतिह्य–पार्श्वभूमिज्ञानार्थम्, तत्कालीनवैयाकरणकुलसङ्कलित-परम्पराज्ञानार्थं च अस्य बहिरङ्गज्ञानस्य अत्यन्तम् उपयोगः, इति कृत्वा सङ्क्षेपेणैवात्र तद् विमृशामः। (शेषम् अग्रिमे पृष्ठे)

अस्य च पुस्तकस्य कालो यद्यपि नैश्चित्येन वक्तुं न शक्यते; अथापि हरिदीक्षित-पितामहचरणानां भट्टोजिदीक्षितानां कालस्य सामान्यतया ज्ञातत्वेन तथैव च हरिदीक्षितशिष्याणां नागेशभट्टानामपि कालस्य विविधैः प्रमाणैः ज्ञातत्वेन हरिदीक्षितानाम् अस्य पुस्तकस्य कालः प्रायः ख्रि० १७००, इति स्थूलरूपेण सम्भाव्यते।

***आ. गृहीतमूललेखाद्यपुस्तकम्** (Archetype) प्रायः ख्रि. १७२५

नागेशभट्टैः यदा स्वगुरुहरिदीक्षितानां सविधे व्याकरणशास्त्रस्य अध्ययनं कृतम्, तदैव *प्रौढमनोरमायाः* बृहतः *शब्दरत्नस्य* च अध्ययनं कृतम्, तदैव च स्वकार्यार्थं हरिदीक्षितकृतेः *शब्दरत्नस्य* मूललेखस्य आद्यावृत्तिः सम्पादिता; इति सामान्यतः स्वीकर्तुं योग्यम्।

प्रौढमनोरमा तावद् भट्टोजिदीक्षितैः स्वयमेव **सिद्धान्तकौमुद्याः** व्याख्यानरूपेण विरचिता। **सिद्धान्तकौमुदी**स्थानां सिद्धान्तानां **पातञ्जलमहाभाष्या**नुरोधेन विशिष्टाशयप्रदर्शनपूर्वकं सुप्रतिष्ठापनार्थम्, कैयटादीनां प्राचीनानां वैयाकरणानाम्, विशिष्य च **प्रक्रियाकौमुदी**काराणां रामचन्द्राचार्याणाम्, **प्रकाश**काराणां विठ्ठलाचार्याणां च खण्डनार्थम् इयं **प्रौढमनोरमा** प्रवृत्ता। **प्रौढमनोरमायाः** एतत् स्वरूपं दृष्ट्वा स्वगुरुशेषकृष्णवंशाभिमानात् **रसगङ्गाधर**कारेण जगन्नाथेन **प्रौढमनोरमायाः** खण्डनार्थम् **प्रौढमनोरमा**स्थानि कानिचन स्थलानि दूषितानि दृश्यन्ते। परं पण्डितराजस्य **मनोरमा-कुचमर्दन**प्रयासः न तथा सफलतां गतः, यथा तेन

लक्ष्मीकान्तपदाम्भोजं प्रणम्य श्रेयसां पदम्।
पण्डितेन्द्रो जगन्नाथः स्यति गर्वं गुरुद्रुहाम्॥

इत्यत्र स्वग्रन्थप्रारम्भावसरे एव प्रतिज्ञातमासीत्। किन्तु भट्टोजिदीक्षितैः यथा विचक्षणसम्मतसहृदयहृदयाह्लादकपद्धत्या प्राचीनानां वैयाकरणानां खण्डनं कृतम्; न तया पद्धत्या जगन्नाथपण्डितेन भट्टोजिदीक्षितानां खण्डनं कृतम्। अत एव जगन्नाथपण्डितस्य **रसगङ्गाधरः** साहित्यशास्त्रे आकरग्रन्थत्वेन पण्डितसम्मतः अभूत् न पुनः **कुचमर्दनम्**।

कुचमर्दनवत् अन्योऽपि ग्रन्थः '**प्रौढमनोरमाखण्डनम्**' इत्याख्यः, तदानीं प्राचीनमतपुरस्कारार्थं प्रवृत्तः आसीत्। प्राधान्येन अनयोर्ग्रन्थयोः, सामान्यतश्च अन्येषां तदानीं प्रसिद्धानाम् इदानीं तु अनुपलब्धानां ग्रन्थानां खण्डनार्थम् प्रौढमनोरमायाः मण्डनार्थं च अयं हरिदीक्षितकृतः **शब्दरत्न**ग्रन्थः प्रवृत्तः।

'रामाश्रम' इति नाम्ना चतुर्थाश्रमे प्रसिद्धानां भानुजिदीक्षितानां जन्मविद्यावंशगुरवः भट्टोजिदीक्षिताः, इति तु सर्वसम्मतम्। अतः भट्टोजिदीक्षितग्रन्थहृदयग्रन्थिं याथातथ्येन ज्ञातुम् अनायासेन उद्घाटयितुं च रामाश्रमाः एव समर्थाः आसन्; इत्यत्र नास्ति संशीतिलेशोऽपि। 'रामाश्रमात् सद्गुरोः' (शब्दरत्न १-१२) अधिगतं प्रौढमनोरमायाः निगूढं तात्पर्यं हरिदीक्षितैः, इति **शब्दरत्न**प्रारम्भावसरे मङ्गलाचरणे तैः स्वयमेवोक्तम्। अतः ये आक्षेपाः कैश्चन आक्षेपकैर्गृहीता आसन्, तेषां निरासार्थं **शब्दरत्न**ग्रन्थः हरिदीक्षितैर्विरचितः, इति सुस्पष्टं भवति। हरिदीक्षितैः स्वयं लिखितम्, लेखनिकद्वारा वा लेखितं इदं शब्दरत्नस्य पुस्तकं 'मूललेखपुस्तकम्' इति नाम्ना अस्मिन् संस्करणे व्यवह्रियते।

यद्यपि हरिदीक्षितानां बहवः शिष्याः आसन् तथैव पुत्रपौत्रादिवंशपरम्पराऽपि विपुला आसीत्, इति सम्भावयितुं शक्यते; तेष्वन्यतमेन च शब्दरत्नस्याद्यावृत्तिः सम्पादिता इत्यपि वक्तुं शक्येत; तथापि वैयाकरणकुले [1]हरिदीक्षितप्रधानशिष्यसर्वतन्त्र-स्वतन्त्रनागेशभट्टसम्पादिता आवृत्तिरेव 'मूललेखाद्यपुस्तकम्' इति विना वैमत्यं विना सन्देहं च स्वीकृतं भवेत्; इत्यस्माकं मतिः ।

किञ्च स्वगुरुहरिदीक्षितनाम्ना प्रकाशतां नीतस्य *लघुशब्दरत्नस्या*पि कर्तृत्वं नागेशभट्टानामेव, इति अस्मिन्नेव पुस्तके आद्यपरिशिष्टत्रयेण सविस्तरं प्रपञ्चित-मस्माभिः । अतः हरिदीक्षितकृतेः बृहतः *शब्दरत्नस्य* आद्यपुस्तकसम्पादनार्थं यावान् परिश्रमः, चिकित्सापूर्वकोऽभ्यासश्च नागेशभट्टैः *लघुशब्दरत्न*प्रणयनावसरे कृतः इति कल्पयितुं शक्यते; तावान् आद्यपुस्तकसम्पादनविषयकः प्रयासः, चिकित्सापूर्वकोऽ-भ्यासश्च न केनाप्यन्येन कृतः इति तर्कसुसंवादितयैव वक्तुं शक्यते । अतोऽपि कारणात् *शब्दरत्नस्य* नागेशभट्टकृता आवृत्तिरेव 'आद्यपुस्तकम्' इति अस्मिन् वंशवृक्षालेखे प्रकल्पितम् ।

कालविषये किञ्चित्

अर्थात् तदिदं नागेशभट्टसङ्क्रामितं *शब्दरत्नस्य* मूललेखाद्यपुस्तकं तु अस्मा-भिर्नैव लब्धम् । किन्तु हरिदीक्षितानां नागेशभट्टानां च कालस्य सामान्यतो याथातथ्य-स्वरूपेण ज्ञानात् *शब्दरत्नस्य* आद्यपुस्तकस्य कालः प्रायः ख्रि० १७२५ इत्यस्या-समन्तात् स्वीक्रियते । तत्र ख्रि० १७१० इत्यपि वक्तुं शक्यम्, अथवा ख्रि० १७४० इत्यपि प्रतिपादयितुं शक्यम् । तत्र विषये नास्ति विशिष्य आग्रहः । किन्तु *शब्दरत्नस्य* आद्यपुस्तकस्य सामान्यतया कालः प्रदर्शनीयः; इत्यत्रैवास्माकं तात्पर्यम् ।

***इ. *ई. गृहीतमूलपुस्तकशाखा** (Sub-archetype) प्रायः ख्रि. १७५०

नागेशभट्टानां साक्षाच्छिष्याः पायगुण्डेवैद्यनाथाः भैरवमिश्राश्च । (भैरव-मिश्राणां विषये वैमत्यं दृश्यते । तेषां मते अन्येन केनापि नागेशशिष्येण ।) आम्या-

---

१. नव्यवैयाकरणकुलगुरुपदम् अलङ्कुर्वाणाः नागेशभट्टा एव शब्दरत्नकाराणां हरिदीक्षितानां प्रधानशिष्यत्वेन प्रसिद्धाः । नागेशभट्टैश्च स्वयमेव

नागेशभट्टो नागेशभाषितार्थविचक्षणः ।
हरिदीक्षितपादाब्जसेवनावाप्तसन्मतिः ॥

इत्यादिना महाभाष्यप्रदीपोद्द्योतारम्भे एव स्वगुरु-हरिदीक्षितविषये स्वकीयो निरतिशयः आदर-विशेषः प्रदर्शितः ।

मुभाभ्यां प्रसिद्धाभ्यां शिष्याभ्यां नागेशकृतमूललेखाद्यपुस्तकस्य शाखारूपेण आवृत्तिः सम्पादिता, इति कल्पयितुमावश्यकं योग्यं च ।

सत्स्वपि नैकेषु नागेशशिष्येषु अनयोः शिष्ययोरेव विशेषसम्भावनायामिदमस्ति कारणम्:—उभाभ्यामपि पायगुण्डेवैद्यनाथ–भैरवमिश्राभ्यां नागेशकृत–लघुशब्दरत्ने टीकाग्रन्थौ विरचितौ, पायगुण्डे–वैद्यनाथेन *भावप्रकाशिका* (*भावप्रकाश*) इत्याख्यः, भैरवमिश्रेण च *भैरवी* इति नाम्ना प्रसिद्धः । अतः आभ्यामुभाभ्यामपि हरिदीक्षितकृत–*शब्दरत्नः* न पठितः; अथवा स्वकार्यार्थे *शब्दरत्नस्य* स्वगुरु–नागेशसङ्क्रामितात् आद्यपुस्तकात् शाखावृत्तिर्न सम्पादिता; इत्येतत् तु न युक्तियुक्तं प्रतिभाति ।

किञ्च पायगुण्डे-वैद्यनाथैः स्वकृत*भावप्रकाशिकायां* 'मान्य'शब्देन *शब्दरत्न-काराणां* हरिदीक्षितानामेव असकृत् निर्देशः क्रियते, इति सविस्तरं प्रदर्शितम् अस्माभिः प्रथमे [1]परिशिष्टे । तथैव भैरवमिश्रैरपि प्राचीनमतप्रदर्शनद्वारा, बहुषु स्थलेषु केचित्-शब्देन च स्वकृत*भैरवी*-टीकायां *शब्दरत्न*काराणां हरिदीक्षितानामेव निर्देशः क्रियते; इति जानन्त्येव व्याकरणशास्त्रनदीष्णाः ।

एवं च स्वकार्यार्थमाभ्यामुभाभ्यामपि नागेशशिष्याभ्यां नागेशकृतात् मूललेखाद्य-पुस्तकात् पुस्तकद्वयं सङ्क्रामितम्; इति सिद्धं भवति । तदेव च शाखाद्वयम् मूलभूतम् इतः सङ्क्रमितानां प्र-परा-शाखापुस्तकानाम् इति अस्माभिरत्र कल्प्यते । एतदेव च शाखाद्वयम् *इ–*ई–पुस्तकनाम्ना *शब्दरत्नस्य* वंशवृक्षालेखे अस्माभिः प्रदर्शितम् ।

अत्र उपलब्धेषु पञ्चसु पुस्तकेषु यानि त्रीणि पुस्तकानि औत्तरैर्लेखनिकैः लिखितानि इति तैस्तैः प्रमाणैः अस्माभिः पूर्वमेव प्रतिपादितम्; तानि क–ख–घ–पुस्तकानि भैरवमिश्राणाम् *इ–पुस्तकात् समागतानि, इति अस्माभिरत्र स्वीक्रियते; भैरवमिश्राणाम् उत्तरदेशाभिजनत्वात् ।

ये च अन्ये द्वे उपलब्धे पुस्तके महाराष्ट्रियलेखनिकैर्लिखिते; तथा ग–पुस्तकम्, घ–पुस्तकम् इति नाम्ना च अस्मिन् वंशवृक्षालेखे व्यवहृते; ते उभे अपि पायगुण्डे-वैद्यनाथैः स्वकार्यार्थं सम्पादितात् *ई–पुस्तकात् सङ्क्रामिते, इति अस्माभिरत्र कल्प्यते । उभयत्र महाराष्ट्रियलेखनपरम्परायाः समानत्वात् । इयमेव च *शब्दरत्नस्य* मूललेखाद्यपुस्तकस्य द्वितीया शाखा ।

---

१. शब्दरत्नम् पृ. २७३–१९३.

*उ.*ऊ.ग.च. उपशाखा-पुस्तकानि (Recensions)

ग. एवं चात्र सम्पन्ने गृहीतशाखाद्वये पायगुण्डेवैद्यनाथानां (प्रायःखि. १७५०) *ई–पुस्तकात् ' साठे 'इत्युपनामकेन महाराष्ट्रियेण छात्रेण काश्यां बिन्दुमाधवघट्टे खि. १७७४ तमे संवत्सरे लिखितं ग–पुस्तकम् उपशाखारूपेण स्वीक्रियते। तच्च ग–पुस्तकम् उपलब्धम्, इति कृत्वा तस्य सविस्तरं विवरणम् ' उपलब्ध–पुस्तकानां वर्णनम् ' इति प्रकरणे एव द्रष्टव्यम्।

अत्रेदं सम्भाव्यते

ग–पुस्तकलेखनिकस्य गुरुभिः पायगुण्डेमहाभागैः सम्पादिते शाखा–पुस्तके तैः प्रसङ्गवशात् स्वकार्यार्थं (भावप्रकाशिका–कार्यार्थम्) उपयुक्तत्वेन या टिप्पणी लिखिता; तस्या अपि अन्तर्भावः मूलग्रन्थे एव कदाचित् अस्य पुस्तकस्य लेखनिकेन कृतः स्यात्।

अथवा एवमपि सम्भावयितुं शक्यम्; यद् अध्ययनावसरे स्व-गुरुमुखात् (अत्र गुरुपदेन पायगुण्डेमहोदयाः वा भवन्तु, अथवा अन्ये केचन वैयाकरणमूर्धन्याः वा भवन्तु तेषां मुखात्) श्रुता या टिप्पणी, साऽपि अनवधानेन ग–पुस्तक–लेखनिकेन ग्रन्थमध्ये एवान्तर्भाविता, इति अवश्यं कल्पनीयं भवति।

अथ द्वितीयात् भैरवमिश्रैः सम्पादितत्वेन गृहीतात् *इ–शाखापुस्तकात् उपशाखाद्वयं सञ्जातम्; इत्यवश्यं कल्पनीयं भवति। यतः साम्प्रतमुपलब्धेषु क–ख–घ–पुस्तकेषु अपि परम्पराद्वयं दृश्यते। तत्र एका परम्परा क–घ–पुस्तकयोः समानरूपेण उपलभ्यते; अन्या च परम्परा ख–पुस्तके। (एतच्च क–ख–घ–पुस्तकविवरणावसरे अस्माभिः सविस्तरं प्रपञ्चितम्।)

क.ख.घ. प्रशाखा-पुस्तकानि (Sub-Recensions)

तत्र केचन पाठभेदाः क–घ–पुस्तकयोरेव उपलभ्यन्ते; न पुनः ख–पुस्तके। अन्ये च केचन विशिष्टाः पाठभेदाः ख–पुस्तके एवोपलभ्यन्ते; न पुनः क–घ–पुस्तकयोः। किञ्च काश्चन ग्रन्थत्रुटयः, वर्णव्यत्यासजनिता दोषाः कानिचन अशुद्धानि च तत्र तत्र पुस्तके एतादृश्युपलभ्यन्ते; यदर्थं *इ–पुस्तकस्य अनन्तरं क–ख–घ–पुस्तकेभ्यश्च पूर्वं *उ–*ऊ–पुस्तकयोः रूपेण उपशाखाभेदः तदनन्तरं कल्पनीयो येन क–घ–पुस्तकयोः एका परम्परा ख–पुस्तकस्य च अपरा परम्परा सुसङ्गतक्रमेण स्वीकर्तुं शक्या भवेत्। तदर्थं च पूर्वमेव चिकित्सावसरे अस्माभिः बहून्युदाहरणानि प्रदर्शितानि।

च· उपशाखा (Recension)

प्रथमायाः शाखाया उपशाखाभूतं यत् अन्यत् च–पुस्तकम्, तस्य अस्यामावृत्तौ न तावान् उपयोगः, यादृशः उपयोगः अग्रिमे भागे सम्पत्स्यते। यतः स्वादिसन्धिमारभ्यैव अस्य प्रारम्भो वर्तते। तत्रत्येन ग्रन्थेन एतत् स्पष्टं भवति यत् एतत् पुस्तकं पूर्णतया ग–पुस्तकपरम्परान्तःपाति इति। तच्च च–पुस्तकविवरणावसरे अस्माभिः सविस्तरं प्रतिपादितम्। तथापि ग–पुस्तकापेक्षया तथैव इतरसर्वपुस्तकापेक्षया च वैशिष्ट्यमस्य च–पुस्तकस्य वर्तते एव। उदाहरणार्थम् :—

१. क·ख·ग·घ· सन्निकर्षस्य पृ. २६१ पं. ८.
च· सन्निकृष्टस्य

२. क·ख·ग·घ· °मसिद्धत्वेन पृ. २६१ पं. १५.
च· °मसिद्धत्वे

३. क·ख·ग·घ· अविद्यमानेति। पृ. २६३ पं. २२.
च· अविद्यमानवदिति।

४. क·ख·ग·घ· युक्तम्। पृ. २६८ पं. २७.
च· शक्यम्।

५. क·ख·ग·घ· दीर्घसिद्धिः। पृ. २६ पं. १८.
च· दीर्घः सिद्धः।

६. क·ख·ग·घ· न काचित् पृ. २७० पं. १३.
च· न कदाचित्

७. क·ख·ग·घ· लोपाभावेऽपि पूर्वरूपस्य पृ. २७१ पं. ५.
च· लोपाभावे पूर्वपदस्य

अतः अत्यल्पपत्रात्मकस्याप्यस्य पुस्तकस्य स्वातन्त्र्येण वैशिष्ट्यं वर्तते एव। किञ्च तद् वैशिष्ट्यम् इतोऽप्यधिकतया शब्दरत्नस्य अग्रिमे खण्डे षड्लिङ्गीप्रकरणे सुस्पष्टं भवेत्। किञ्च रामशब्दप्रक्रियानिरूपणावसरे ग–पुस्तकलेखनिकेन लेखनम् अर्धमेव परित्यक्तम्। तच्च अव्ययप्रकरणप्रारम्भे पुनः प्रारब्धम्। अतः अयं महत्त्वपूर्णः षड्लिङ्गीभागो ग–पुस्तके नोपलभ्यते। क–ख–घ–पुस्तकानि तु एकपरम्पराप्राप्तानि। अतः पाठभेदनिर्धारणार्थं भिन्नपरम्पराप्राप्तस्य कस्यचन पुस्तकस्यावश्यकता आसीदेव। सा च आवश्यकता अनेन भिन्नपरम्परास्थेन च–पुस्तकेन पूर्येत। किञ्च अस्य च–पुस्तकस्य ग–पुस्तकस्य च एका एव परम्परा वर्तते इति तैस्तैः प्रमाणैः प्रदर्शितमेव; अतः पाठभेदनिर्धारणं समीचीनं भवेत् च–पुस्तकसाहाय्येन इति विभावयामः।

बिन्दुरूपं पूर्णविरामचिह्नम्

क–[1]ख–घ–पुस्तकविवरणावसरे प्रतिपादितमासीत्, यद् पुस्तकत्रयेऽ[2]पि वाक्यस्यान्ते बिन्दुरूपम् (.) आधुनिकं पूर्णविरामस्य चिह्नं दीयते इति। परं प्राचीनभारतीय-लेखनपरम्परायां तन्न कुत्राप्युपलभ्यते; अतः न तद् भारतीयलेखन-सम्प्रदायानुरोधि। एवं च तस्यात्र विमर्शोऽवश्यं कर्तव्यो भवति।

अद्यावधि उपलब्धेषु प्राचीनभारतीयहस्तलिखितेषु विशिष्य च संस्कृतहस्त-लिखितपुस्तकेषु कुत्रापि बिन्दुरूपः (.) पूर्णविरामो नैवोपलभ्यते; इति सर्वैरपि ऐकमत्येन अङ्गीक्रियते। पाश्चात्यलेखनपद्धतिमनुसृत्यैव आधुनिकभारतीयलेखनपद्धतौ बिन्दुरूपं पूर्णविरामचिह्नं स्वीकृतम्, न ततः प्राक्। 'धम्मपदे' शून्याकारसदृशं (०) विरामचिह्नं दृश्यते; तथापि न तद् आधुनिकं बिन्दुरूपं पूर्णविरामचिह्नम्।

पूर्णविरामचिह्नानि

विविधानि विरामचिह्नानि अद्यावधि उपलब्धेषु हस्तलिखितेषु दृश्यन्ते। तत्र अष्टौ विरामचिह्नानि प्राधान्येन [3]उपलभ्यन्ते। प्रकरणसङ्गतये सन्दर्भशुद्ध्यर्थं च तानि अत्र उद्धरामः। तानि च इत्थम्:—

१. एको दण्डः, । २. दण्डद्वयम्, ।। ३. दण्डत्रयम्, ।।।
४. एका रेखा, – ५. रेखाद्वयम्, = ६. दण्डद्वयं पृष्ठरेखया सह, ।।–
७. चन्द्रकला,) ८. चन्द्रकला मध्यरेखया सह, –)

ताम्रपट-शिलालेखादिषु यद्यप्यन्यानि विविधानि पूर्णविरामचिह्नानि दृश्यन्ते[4], परन्तु बिन्दुरूपं विरामचिह्नं न तत्रोपलभ्यते इत्यत्र तु न विवादः।

बिन्दुरूपं विरामचिह्नं कुतः समागतम्?

अतोऽयमत्र विचारः समुत्पद्यते यद् अत्रैव *शब्दरत्नस्य* क–ख–घ–पुस्तकेषु कुतः बिन्दुरूपं पूर्णविरामचिह्नं समागतम्, इति। हरिदीक्षितैरेव स्वयं तद् लिखितम्,

---

१. ख–पुस्तके आदितो दशसु पत्रेषु दण्डाः एव। ततो विंशतिपत्रपर्यन्तं क्वचित् क्वचित् . बिन्दुः; क्वचिच्च दण्डः। विंशतिपत्रानन्तरं ग्रन्थसमाप्तिपर्यन्तं तु बिन्दुरूपमेव पूर्णविरामचिह्नं दृश्यते।

२. ग–पुस्तके अत्यन्तं क्वाचित्कतया उपलभ्यमानो बिन्दुः अहैतुकः, आनवधानिकश्च इति विभावयामः।

3. *Introduction to Indian Textual Criticism*. pp. 10,11.

4. *Indian Palæography*: By Bühler [Eng. Translation], pp. 108,109.

इत्यपि वक्तुं न शक्यम्। अद्यावधि अन्यत्र कुत्राप्यदर्शनात्। किञ्च शब्दरत्नस्य प्राचीनतमयोः ग–च–पुस्तकयोः सर्वत्र दण्डस्यैवोपलम्भात्। " ग–च–पुस्तकयोर्लेखनिकैः ख–पुस्तकलेखनसमये हरिदीक्षितलिखितोऽपि बिन्दुः परित्यक्तः, दण्डश्च समाश्रितः" इति विचारस्तु न तर्कसङ्गतः, न वा ऐतिह्यपरम्पराश्रितः, न वा लेखनिकस्वभावानुसारी। शब्दरत्नात् प्राक् शब्दरत्नात् अनन्तरं च कुत्रापि बिन्दुप्रयोगस्यानुपलम्भात्। हरिदीक्षितानां साक्षाच्छिष्यैः नागेशभट्टादिभिः बिन्दुचिह्नस्य कुत्राप्यनिर्देशात्। 'विरामोऽवसानम्' 'परः सन्निकर्षः संहिता' 'संहितायाम्' इत्यादिसूत्रेषु [1]पञ्चवारं विरामविषयं सविस्तरं विमर्शद्भिः हरिदीक्षितैः स्वकीयस्य वैशिष्ट्यपूर्णस्य नवीनस्य विरामचिह्नस्य कुत्रापि साक्षात् निर्देशाभावाच्च। अतः इदं बिन्दुरूपं पूर्णविरामचिह्नं हरिदीक्षितकृतम् इति तु सर्वात्मना चिन्तितुमप्यशक्यम्।

बाह्यसन्दर्भमूलिका चिकित्सा

एवं च सर्वोऽयं विषयः जटिलः इत्यत्र नास्ति संशीतिलेशोऽपि। अतोऽत्र त्रयाणामपि क–ख–घ–पुस्तकानामैतिह्यविमर्शपूर्वकं बहिरङ्गप्रमाणप्रदर्शनपुरःसरं बाह्यसन्दर्भमूलिका चिकित्सा अवश्यं कर्तव्या भवति।

तत्रादौ कालनिर्देशं विमृशामः। भाग्यवशात् त्रयाणामपि पुस्तकानां लेखनकालनिर्देशः तेष्वेव पुस्तकेषु उपलभ्यतेः—क–पुस्तकम् : खि. १७९६; घ–पुस्तकम् : खि. १७९७; ख–पुस्तकम् : खि. १७९९ इति। कुत्र लिखितम्, केन लिखितम्, इत्यादिनिर्देशाः कस्मिन्नपि पुस्तके पुष्पिकायामन्यत्र वा नोपलभ्यन्ते। लिपिवैशिष्ट्येन विशिष्टाक्षरलेखनपद्धत्या च त्रीण्यपि पुस्तकानि औत्तरैरेव लेखनिकैर्लिखितानि, इत्यस्माभिः पूर्वमेव निर्धारितम्। क–पुस्तकं नासिकक्षेत्रे लब्धम्, घ–पुस्तकं च सातारानगरे आसीत्; इत्येतावदेव अनयोः पुस्तकयोः स्थानविषये ज्ञायते। ततोऽधिकम् एतयोः पुस्तकयोर्विषये न किमपि ज्ञातुं शक्यते।

कोल्ब्रुक्महोदयानां हस्तलेखसङ्ग्रहः

अवशिष्टं तृतीयं ख–पुस्तकम्। एतद् पुस्तकम् इण्डिया-ऑफिस्-लायब्ररीमध्ये कोल्ब्रुक्महाभागैः कृते हस्तलेखसङ्ग्रहे समाविष्टं वर्तते। अष्टादशशतकस्य अन्तिमे दशके श्रीमद्भिः हेन्री थॉमस् कोल्ब्रुक्महोदयैः काशीक्षेत्रे महान् हस्तलेखसङ्ग्रहः कृतः आसीत्। अनन्तरं च स सर्वोऽपि सङ्ग्रहः श्रीमद्भिः कोल्ब्रुक्महोदयैः ईस्ट

---

१. शब्दरत्नम् : पृ. ३६७, ३६८, ३६९.

इण्डिया-कंपनी-अधिकारिभ्यः, तैः अधिकारिभिश्च इण्डिया-ऑफिस्-ग्रन्थालयाधिकारिभ्यः प्रदत्तः आसीत्। अस्माभिः ख–सङ्केतेन स्वीकृतं *शब्दरत्नस्य* हस्तलिखितं पुस्तकमपि तदन्तःपाति, इति पूर्वमेव पुस्तकवर्णनावसरे प्रतिपादितम्[१]।

शब्दरत्नपुस्तकसङ्ग्रहः

किञ्च श्रीमतां हेनूरी थॉमस् कोल्ब्रुक्-महोदयानां त्रिखण्डात्मकं चरित्रं तल्लिखित-प्रबन्धैः सह प्रकाशितं [२]वर्तते। तत्रापि तृतीये खण्डे तैः संस्कृतभाषायाः व्याकरणरचनावसरे केषां केषां पुस्तकानामुपयोगः कृतः इत्येतत् सविस्तरमुपवर्णितं वर्तते। तत्र हरिदीक्षितकृतशब्दरत्नस्यापि निर्देशः [३]श्रीमद्भिः कोल्ब्रुक्महोदयैः क्रियते।

पाणिनीयव्याकरणशास्त्रस्य महत् परिशीलनं श्रीमद्भिः कोल्ब्रुक्महोदयैः कृतम्, तस्मिन् शास्त्रे च तेषां महान् आदरः आसीत् इति तेषां चरित्रग्रन्थात् ज्ञातुं शक्यते। किञ्च पाणिनीयव्याकरणस्य परिशीलनार्थं तैः प्रायः खि. १७९० तः १८०० पर्यन्तं महता परिश्रमेण हस्तलिखितानां सङ्ग्रहः कृतः आसीत् इत्यपि तेषां चरित्रग्रन्थात् स्पष्टं भवति। अयमेव च कालः—(खि. १७९६, १७९७, १७९९) अस्माभिः स्वीकृतानां *शब्दरत्नस्य* क–ख–घ–पुस्तकानाम्।

वाराणसीसमीपे निवासः

अस्मिन् काले च कोल्ब्रुक्महोदयानां निवासः वाराणसीतो नातिदूरे मिर्झापूर-नगरे आसीत्। तदा च साक्षात् वाराणस्यां गत्वा ब्राह्मणेभ्यो धनं दत्वा तद्द्वारा बहूनि हस्तलिखितपुस्तकानि सम्पादितानि, इति कोल्ब्रुक्महोदयैः स्वपितरं प्रति लिखिते पत्रे स्पष्टमासीत्, इति अधस्तनलेखात् स्पष्टं भवति।

[४]" The hopes expressed in his last letter, of being appointed to a station favourable for Sanskrit Studies, were soon to be fulfilled. His appointment to a station so eminently suited to facilitate these researches as that of Mirzapore was indeed equal in importance to his transfer to the judicial branch of the service. Mirzapore is in close proximity to Benares, still the seat and centre of Brahmanical learning in the north of India Here too he was enabled to collect the principle part of a large collection of manuscripts which was afterwards presented to the East India Company."

---

१. प्रस्तावना; पृ. १९.

२. *Miscellaneous Essays* : by H. T. COLEBROOKE. 1873.

३. *ibid* : p. 39.

४. *ibid* : p. 77.

अयं कोल्ब्रुक्महाभागानां मिर्झापूरनिवासकालः हस्तलेखसङ्ग्रहकालश्च स एव यदा अस्माकं क–ख–घ–पुस्तकानि लिखितानि (१७९६, १७९७, १७९९) इति।

अयं विषयः जटिलो वर्तते इति कृत्वा प्रमाणान्तरमपि अन्यस्मात् पुस्तकात् दीयते। तद् यथाः—

[1]" Colebrooke's official duties at this time brought him to Mirzapore, sufficiently near Benares for him to benefit by the help of the learned men there and the manuscripts in their keeping. By 1797 he had finished his translation of the digest, which at once established his position as the best Sanskrit Scholar of the day. ......

Colebrooke's greatest feat was, however, his study of the works of Indian grammarians. "

कोल्ब्रुक्महोदयानां निर्देशानुसारं लेखनम् :

अनेन एतदेवात्र अनुमातुं शक्यम्, यत् कोल्ब्रुक्महोदयैः काश्याम् अष्टादशशतकस्यान्तिमे दशके संस्कृतहस्तलेखसङ्ग्रहार्थम् असाधारणाः प्रयत्नाः कृताः, तदैव च तत्र तैः शब्दरत्नस्यापि हस्तलिखितं सम्पादितम्, इति। एतानि सर्वाण्यनुमानानि सुनिपुणं विमृश्य इत्थमस्माकमस्ति निष्कर्षः—

१. कोल्ब्रुक्महोदयैः *शब्दरत्नस्य* लेखनकर्मणि वाराणस्यां ये लेखनिकाः नियोजिता आसन्, तेभ्यः " **लेखनसमये दण्डस्थाने बिन्दुरूपं विरामचिह्नं दातव्यम्** " इति सूचना प्रदत्ता आसीत्।

२. प्रायो बहुभिः लेखनिकैः कोल्ब्रुक्सूचनानुसारं शब्दरत्नस्य नवीनं पुस्तकत्रयं सम्पादितम्।

३. एतेषु त्रिषु पुस्तकेषु कोल्ब्रुक्महाभागैः एकं पुस्तकं स्वकार्यार्थं स्वस्य समीपे स्थापितम्, स्वकार्यसमाप्त्यनन्तरम् ईस्ट-इण्डियाकम्पनी-अधिकारिभ्यः प्रदत्तं च। अनन्तरं तत्पुस्तकम् ईस्ट-इंडिया-कंपनीद्वारा इण्डिया-ऑफिस्-लायब्ररीमध्ये समागतम्।

४. अन्यत् पुस्तकद्वयं केनापि पाश्चात्त्येन विदुषा अथवा भारतीयेन पण्डितेन स्वीकृतम्। एतदेव पुस्तकद्वयमनन्तरं कयापि सुदीर्घया परम्परया काशीक्षेत्रतः

1. *British Contribution to Indian Studies.*
By : Sir ATUL CHATTERJEE and Sir RICHARD BURN. p. 14.

अतिदूरे महाराष्ट्रप्रदेशे विद्वद्रत्न-मुरगुडकरलक्ष्मणशास्त्रिणां कुले तथा प्राध्यापक-अभ्यंकरोपाह्व-काशिनाथशास्त्रिणां कुले समागतम् ।

५. अतश्चायमत्र निष्कर्षः सम्भवति:—

पाश्चात्त्यमहापण्डितः श्रीमान् कोल्ब्रुक्–महाभागः तदा अस्य पुस्तकत्रयस्य पण्डितद्वारा सङ्क्रमणं यदि नाकरिष्यत्, तर्हि अद्यापि अस्य बृहतः शब्दरत्नग्रन्थस्य सर्वथाऽनुपलब्धिरेव अभविष्यत् ।

कोल्ब्रुक्महोदयानामृणम् ।

यतः अद्य निखिलेऽपि भारते भारताद् बहिश्च साद्यन्तसम्पूर्ण-*शब्दरत्नस्य* द्वे एव पुस्तके वर्तेते । एकम् अस्माकं सविधे कै. विद्वद्रत्न-मुरगुडकर-लक्ष्मणशास्त्रिणाम्, द्वितीयं च लण्डन-इण्डिया-ऑफिस-ग्रन्थालये विद्यमानम् । उभे अपि इमे पुस्तके कोलब्रुक्-महाभागैरेव काश्यां पण्डितद्वारा सम्पादिते इति भाति । तृतीयं दशगणीरहितं पुस्तकं प्राध्यापकवर्याणाम् अभ्यङ्करकाशिनाथ-शास्त्रिणामपि तैरेव सम्पादितम् इति प्रतिभाति । अतः यदिदं महत्त्वपूर्णं पुस्तकत्रयं सम्प्रति दृश्यते, तद् कोल्ब्रुक्महोदयानां परिश्रमाणामेव फलम्; इति कृत्वा श्रीमतां हेन्री थॉमस् कोल्ब्रुक्-महाभागानां वैयाकरणैः कथं वा आनृण्यं सम्पादनीयम्, इति न वयं जानीमः ।

अथ पाठभेदचिकित्सा

अत्रेदमवधार्यताम्:—

अधुना क–ख–ग–घ–पुस्तकेषु विद्यमानानां भिन्नभिन्नानां पाठानां चिकित्सा प्रारभ्यते । तत्रादौ एतदवश्यं स्पष्टीकर्तव्यं भवति यद् अस्माभिः *शब्दरत्नस्य* अस्मिन् संस्करणे मूलग्रन्थत्वेन स्वीकृता अपि बहवः पाठाः पौनःपुन्येन विमर्शकरणानन्तरं अत्र चिकित्सायां पाठभेदत्वेन स्वीक्रियन्ते; पाठभेदत्वेन स्वीकृताः केचन पाठाश्च मूलग्रन्थत्वेन स्थाप्यन्ते । अतः *शब्दरत्न*ग्रन्थपठनसमये प्रियपाठकमहोदया अपि अत्र पाठभेदचिकित्सायाम् अस्माभिः मूलग्रन्थत्वेन स्वीकृतं पाठमेव अस्माकमभिमततमत्वेन जानन्तु । पूर्ववदेव अत्रापि चिकित्सार्थं स्वीकृतेषु उदाहरणेषु प्रथममुपरिष्टाद् उद्धृतः पाठ एव हरिदीक्षितकृतिरूपमूलग्रन्थत्वेन अस्माकमभिमततमत्वेन वर्तते, इति चावधारयन्तु इति ।

कस्य पुस्तकस्याधिकं प्रामाण्यम्

अत्र क–ख–ग–घ–पुस्तकानां मध्ये ग–पुस्तकं कालदृष्ट्या प्राचीनतमम्। किञ्च ग--पुस्तकस्य प्रायः प्रमुखो भागः केनापि छात्रेण लिखितः, इति कृत्वा सर्वेष्वपि पुस्तकेषु अस्यैव अधिकं प्रामाण्यं स्वीकर्तुं योग्यमावश्यकं च। अतः सर्वात्मना अशुद्धस्थलेषु लेखनिकानवधानजनितभ्रान्त्यादिस्थलेषु च (एतादृंशि उदाहरणानि च क–ख–घ–पुस्तकेषु वैपुल्येन लभ्यन्ते) ग–पुस्तकमेवास्माकम् आलम्बनम्। परम् एतदपि नास्माभिर्विस्मर्तव्यम्, यत् विषयज्ञातारः पण्डिताश्च लेखकाः स्वकीयं ज्ञानं पाण्डित्यं च लेखनसमये ग्रन्थमध्येऽपि यथावकाशं प्रदर्शयन्ति। अतः प्रक्षिप्तपाठ–सुलभतरपाठादिस्थलेषु यत्र भिन्नभिन्नपुस्तकेषु पाठभेदाः दृश्यन्ते तत्र पण्डितलेखनिकानां प्रामाण्यस्वीकारविषये अस्माभिर्विवेकशीलैरेव भाव्यम्। किञ्च केवलं ग–पुस्तकमनुसृत्य त्रयाणामपि क–ख–घ–पुस्तकानां यत्र एकवाक्यता सम्पद्यते तत्र तदनुसृतः पाठः स्वीकर्तुमयोग्य एव इति वक्तुं न योग्यम्। *इ–पुस्तके तदनन्तरम् *उ–*ऊ–पुस्तकयोस्ततश्च क–ख–घ–पुस्तकेषु समानाकारेणैव पाठे अनुवृत्ते ग–पुस्तकापेक्षया तत्र भेदे सत्यपि मूलग्रन्थत्वसम्भावनायाः कर्तुं शक्यत्वात्। अतश्चोभयोः परम्परयोर्मध्ये "अन्यतरा परम्परा एव बलीयसी" इति निर्धारणे किमपि विशिष्टं कारणं न पश्यामः। किन्तु तत्र तत्र प्रतिपाठं विशिष्टकारणकलापमालोच्यैव पाठभेदनिर्धारणं योग्यमिति विभावयामः।

पाठभेदचिकित्सायां केषुचन स्थलेषु भावप्रकाशकाराणां पायगुण्डे–वैद्यनाथानामपि साहाय्यं लभ्यते।

पृष्ठम् टिप्पणक्रमाङ्कः

१.	१.	क·ख·घ·	°न्यालोड्य .... पं. १४.
		ग·	°न्यालोच्य ....

पुस्तकत्रयस्वीकृतः '°ड्य' इति पाठोऽस्माभिः स्वीकृतः। केषांचन मतेन ख–पुस्तके '°च्य' इत्येव पाठो वर्तते। स एव पाठः मूलग्रन्थत्वेन स्वीकार्यश्च।

तत्र तेषामयमभिप्रायः—

अत्र भिन्नपरम्परातः सङ्क्रमितयोः ख–ग–पुस्तकयोः 'आलोच्य' इति पाठो वर्तते। पाठभेदचिकित्साप्रक्रियानुसारं च अयमेव पाठो मूलग्रन्थत्वेन स्वीकर्तुं योग्यो भवति। भिन्नपरम्पराप्राप्तत्वात्। साक्षात् सम्बन्धरहितयोः द्वयोः पुस्तकयोः द्वाभ्यां लेखनिकाभ्यां काकतालीयन्यायेन एकस्मिन्नेव स्थले अनवधानादिमूलकः दोषः कृतः, इति कल्पनापेक्षया एकस्य लेखनिकस्य तादृशदोषकल्पनायां लाघवात्। अतः एक-

परम्पराप्राप्तयोः क–घ–पुस्तकयोरुपलभ्यमानः 'आलोड्य' इति पाठः; क–घ–पुस्तकयोः मूलं प्रशाखापुस्तकं यद् *ङ–पुस्तकं तस्य लेखनिकेन अनवधानात् अर्ध-चकार–अर्धडकारयोः लेखनसाम्याद् भ्रान्त्या वा स्वीयपुस्तके चकारस्थाने डकारो लिखितः, इति कल्पनां कृत्वा स एव च यथायथं क–घ–पुस्तकलेखनिकाभ्यां ख-ख-पुस्तके सङ्क्रमितः, इति सम्भाव्य ग्रन्थकारासम्मतोऽयं पाठः मूलग्रन्थत्वेन स्वीकर्तुम-योग्यः, इति ।

निपुणं निरीक्ष्यमाणे तावत् एतद् दृष्टिपथमायाति । आलोचनं नाम परामर्शः । यथा स्वग्रन्थरचनावसरे यदि कस्मिंश्चित् स्थले सन्देहो भवति; तर्हि अन्येषां प्रथित-यशसाम्, अस्मिन् विषये कृतभूरिपरिश्रमाणां विदुषां ये विचाराः सिद्धान्ताश्च वर्तन्ते, तेषामपि प्रसङ्गवशात् परामर्शः स्वग्रन्थानुकूलतासम्पादनायात्यन्तमावश्यको भवति । ' किमप्यालोच्य उच्यताम् ' इत्यादौ यथा ।

आलोडनं तु आलोचनापेक्षया अधिकं गभीरम्, व्यापकम्, दीर्घपरिश्रमसाध्यं च । यथा "आलोड्य सर्वशास्त्राणि विमृश्य च पुनः पुनः" इत्यादौ यथा सर्वशास्त्राणां दीर्घपरिश्रमसाध्यं गभीरं च आलोडनम् अपेक्ष्यते । *महाभाष्य*विषयेऽपि तलस्पर्शि व्यापकं च एतादृशमालोडनमेवापेक्ष्यते । नहि "प्रसङ्गवशात् *महाभाष्यस्य* आलोचनं मया कृतम् । तत्सामर्थ्याच्च शब्दरत्नसदृशं ग्रन्थं व्याख्यातुं प्रवृत्तोऽहम्" इत्येतादृशः प्रयोगः शक्यते कर्तुम्? प्रत्युत *महाभाष्याब्धेः* सर्वात्मना तलस्पर्शि आलोडनमेवा-पेक्ष्यते । अतः क–घ–पुस्तकयोरुपलभ्यमानः 'आलोड्य' इति पाठ एव समीचीनतरः मूलग्रन्थत्वेन स्वीकर्तुं योग्यश्च । अर्धचकारार्धडकारविषये लेखनिकानवधानजन्या सादृश्यमूलिका वा भ्रान्तिस्तु समानैव ।

ननु तर्हि पाठभेदचिकित्साशास्त्रस्य का गतिः? अस्मिन् पक्षे भिन्नपरम्परा-प्राप्तस्यापि पाठस्य मूलग्रन्थत्वेन अस्वीकरणात्, चिकित्साशास्त्रीयस्य महतः सिद्धान्तस्य व्याघातापत्तेः; इति चेदत्रोच्यते:—

ख–पुस्तकलेखनिकेन क्वचित् क्वचित् स्थले ग–पुस्तकमपि दृष्टम्; अतः ग–पुस्तकप्रभावः भिन्नपरम्पराप्राप्त–ख–पुस्तकोपरि क्वचित् क्वचित् दृश्यते इति यद् अस्माभिः प्रस्तावनायां[1] प्रतिपादितं तस्यैवान्यतममिदमुदाहरणम् । विशिष्य च ग्रन्थादौ वर्तमानस्य मङ्गलाचरण-प्रशस्त्यादेः कण्ठस्थीकरणादिना अस्य पाठस्य सर्वत्र प्रसिद्धेः सम्भवात् । विशिष्य च नागेशभट्टानन्तरं पायगुण्डे-वैद्यनाथानामेव पाणिनीयव्याकरण-

1. प्रस्तावना पृ. ४३.

परम्परायां कुलगुरुपदाधिष्ठानात् तेषां पुस्तकात् अनवधानेन सङ्क्रमितस्य 'आलोच्य' इति ग–पुस्तकपाठस्य तदानीं विपुलप्रचारस्य सम्भवात् मुखोद्गततयैव तस्य प्रभावः ख–पुस्तकोपरि आसीत्, इति सम्भावयितुं नाशक्यम्। अतः ख–पुस्तकलेखनिकेन ग–पुस्तकप्रभावात् स्वीकृतः 'आलोच्य' इति पाठः अहैतुको वा भवतु अथवा पाठस्य सरसतया स्वीकृतत्वात् हैतुको वा भवतु एकपरम्पराप्राप्तः = ग–पराम्पराप्राप्त एव, इत्यवश्यं स्वीकर्तव्यं भवति। अतः भिन्नपरम्पराद्वयप्राप्तमूलकः अस्य ख-ग-पुस्तकस्थ-पाठस्य विशेषः न स्वीकर्तुं शक्यते।

एवं च क–घ–पुस्तकयोः उपलभ्यमानः 'आलोक्य' इति पाठ एव मूलग्रन्थत्वेन स्वीकर्तुं योग्यः। अस्माकं मतेन तु ख–पुस्तकेऽपि °क्य इत्येव पाठो वर्तते, इति पूर्वमेवोक्तम्।

१.३ ख·ग गुरोरित्येकवचनम्। गिर इति बहुवचनम्। पं. २१
क·घ· गुरोरित्येकवचनम्। [ग्रन्थत्रुटिः।]

अत्र भिन्नपरम्परागताभ्यां ख–ग–पुस्तकाभ्याम् 'गिर इति बहुवचनम्' इति स्वीकृतः पाठ एव मूलग्रन्थत्वेन स्वीकर्तुं योग्यः। यतः क–घ–पुस्तकयोः लेखनिकाभ्यां पूर्वं लिखितोऽपि अयं ग्रन्थः हरितालादिना निःसारितः अस्पष्टीकृतो दृश्यते। स एवायं ग्रन्थः इतिु तु सुस्पष्टं ज्ञातुं शक्यते। हरितालादिना तु किमर्थं निःसारितः स ग्रन्थः, इति बहु विमृश्यापि न कारणं किमपि जानीमः।

संस्करणे तावत् अस्य ग्रन्थस्य बुद्धिपूर्वकं हरितालादिना निःसारणात् अस्माभिः हेतुतः मूलग्रन्थत्वेन सः न स्वीकृत आसीत्, इति तु अवश्यं स्पष्टीकर्तव्यमत्र।

१.५ क.घ. सर्वप्रियकारित्वेन .... पं. २१
ख. सर्वप्रियकार्युपकारित्वेन....
ग. सर्वप्रियकार्यकारित्वेन ....

ख–पुस्तकस्थः 'सर्वप्रियकार्युपकारित्वेन' इति पाठः न सरसः, किञ्च अशुद्ध-प्राय एव। ग–पुस्तकस्थः 'सर्वप्रियकार्यकारित्वेन' इति पाठः न तथा स्वारस्यं भजते, येन 'कार्य' शब्दप्रयोगात् कोऽप्यधिको विशिष्टोऽर्थलाभः स्यात्। किञ्च ख–पुस्तकस्य यत् मूलं कल्पितम् *ऊ–पुस्तकं तत्रैव प्रायः 'सर्वप्रियकार्युपकारित्वेन' इति पाठः सम्भाव्यते। तस्य मूले *इ–पुस्तके तु न तत् सम्भवति क–घ–पुस्तकाभ्यामस्वीकृतत्वात्। अन्यथा क–घ–पुस्तकयोरपि तथैव अनुवृत्तं स्यात्। अतः *ऊ–पुस्तके एव एतत् 'सर्वप्रियकार्युपकारित्वेन' इति प्रथमं समागतम्, इति कल्पयितुं

युक्तम् । तच्च ग–पुस्तकसम्पादकेन प्रसङ्गवशात् दृष्टम् । परं 'सर्वप्रियकार्युपकारित्वेन' इति ग्रन्थः न समीचीनया रीत्या उपपन्नो भवति, इति चिन्तयित्वा 'सर्वप्रियकार्युपकारित्वेन' इत्यत्र किञ्चिदिव विपरिवर्तनं कृत्वा 'सर्वप्रियकार्यकारित्वेन' इत्येतादृशः सरलार्थः सरसश्च पाठो नूतनतया स्थापितः; इति कल्पयितुं शक्यते । एवं स्थिते अस्माभिः स्वीकृतः 'सर्वप्रियकारित्वेन' इत्येव पाठः मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति वयं विभावयामः ।

२.१ ख.ग. चोक्तरीत्या वयमित्यपि बहुवचनम् । पं. ३
क.घ. चोक्तरीत्या .... बहुवचनम् । ....

१.३ इत्यत्रेव क–घ–पुस्तकयोर्लेखनिकेन 'वयमित्यपि' अत्रापि हरितालादिप्रदानं कृतम्; तद् असम्बद्धम् इति वक्तुं योग्यम् । अतः 'एवं चोक्तरीत्या वयमित्यपि बहुवचनम्' इत्येव पाठो मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति वयं विभावयामः ।

ख. ग. पुस्तकयोर्वर्तमानः अयं पाठः प्रथममेव स्वीकर्तुम् आवश्यकः आसीदेव । किन्तु क–घ–पुस्तकयोः अत्रत्यो भागः केनापि सहेतु बुद्धिपूर्वकं हरितालादिना निःसारितः अस्पष्टीकृतश्चेति अस्माभिः हेतुत एव सः पूर्वं न स्वीकृत आसीत् ।

२.२ ख.ग. सूत्रं न कर्तव्यम् । पं. ४.
क.घ. सूत्रमनुकर्तव्यम् ।

क–घ–पुस्तकयोः 'सूत्रमनुकर्तव्यम्' इति पाठः लेखनिकानवधानमूलकः, सर्वात्मना असम्बद्धः अशुद्धश्च । केवलम् अनयोः एकपरम्परागतत्वकल्पनम्, ख–पुस्तकापेक्षया च भिन्नपरम्परागतत्वकल्पनं स्पष्टीकर्तुमेव च अत्र अस्योपादानम् । एतादृशैः बहुभिः पाठैः *उ–*ऊ–पुस्तकयोः स्वीकारस्यावश्यकतोपपन्ना भवति । अत्रैव १·३; १·५; १·६; २·३; ५·१; ७·३; ८·३; ८·६; ९·५; ९·६; इत्यादयो बहवः पाठभेदाः *इ–पुस्तकानन्तरम् उ*–*ऊ–पुस्तकयोः आवश्यकतां प्रतिपादयन्ति ।

२.४ ग. पदस्येत्यनुवृत्त्या चरमवाच्यन्तग्रहणस्य .... पं. १०–११.
क·ख·घ· पदस्येत्यनुवृत्त्या चान्तग्रहणस्य ....

अत्र 'पदस्येत्यनुवृत्त्या चरमवाच्यन्तग्रहणस्य' इति गपाठे 'चरमवाचि'शब्दस्य स्वारस्यानुपलम्भात् स पूर्वं परित्यक्त आसीत् । अन्तर्गतभिन्नपरम्परातः समागतैः त्रिभिः अपि क–ख––घ–पुस्तकैः स्वीकृतः 'पदस्येत्यनुवृत्त्या चान्तग्रहणस्य' इति पाठश्च मूलग्रन्थत्वेन गृहीतः आसीत् । परमत्र निपुणं निरीक्ष्यमाणे एतद् दृष्टिपथमायाति यद् उत्तरत्र अस्मिन्नेव वाक्ये 'मुख्यान्तग्रहणे' इत्याकारकस्य सविशेषणस्य 'अन्त'

शब्दस्योपादानात् तस्य प्रतिद्वन्द्वितया पूर्वमपि 'चरमवाच्यन्तग्रहणस्य' इति विशेषण-विशिष्टस्यैव अन्तशब्दस्य उपादानं स्वाभाविकम्, तर्कसङ्गतम्, ग्रन्थकारशैल्यनुगुणं च प्रतिभाति। अतः अयमेव पाठो मूलग्रन्थत्वेन स्वीकर्तव्यः, इति वक्तुं शक्यम्। अन्तर्गतभिन्नपरम्परागतपुस्तकत्रयप्रामाण्यात् एव उच्यते तर्हि अस्माभिः स्वीकृतः पाठ एव वरम्।

२.५ ख·ग· कारप्रत्ययप्रवृत्तेरिव .... पं. १२.

क·घ· कारप्रवृत्तेरिव ....

क–घ–पुस्तकयोः '°प्रत्यय°' इति त्रुटितम्, इति कल्पयितुं योग्यम्। यद्यपि '°प्रत्यय°'शब्दोपादानाभावेऽपि ग्रन्थलापनं शक्यते कर्तुम्, तथापि एकपरम्परा-समागतयोः क–घ–पुस्तकयोर्न तथा प्रामाण्यम्, यथा भिन्नपरम्परातः समागतयोः ख–ग–पुस्तकयोर्भवति प्रामाण्यम्। किञ्च अयं पाठभेदोऽपि *उ–*ऊ–पुस्तकयोः अस्माभिः कल्पितयोः आवश्यकतां प्रतिपादयति इति स्पष्टम्। (उदाहरणार्थम् अत्र २.२ द्रष्टव्यम्).

३.१ ख·ग·घ· इत्यादिसूत्रस्यभाष्यादिप्रामाण्यात् .... पं. ५–६.

क· इत्यादिसूत्रस्यभाष्यप्रामाण्यात् ....

प्रायः क–घ–पुस्तकयोः समानाः पाठा उपलभ्यन्ते। यत्र च तयोर्भेदः, तत्र इतरपुस्तकपाठबलात् पाठनिर्धारणं समीचीनया रीत्योपपन्नं भवति। अत्र च तदनुसारं क–पुस्तकलेखनिकेन 'आदि' इत्यक्षरद्वयम् अनवधानात् परित्यक्तम्, इति प्रतिभाति। अत्र च भिन्नपाठपरम्पराबलं वर्तते, इति विशेषः। किञ्च *भाष्यवत्* *कैयटा*दिग्रन्थेष्वपि अस्य विषयस्य विमर्शो दृश्यते। अतः 'आदि'शब्दस्वारस्यमभ्युपपन्नं भवति। एवं च '*भाष्यादि*' इत्येव मूलग्रन्थत्वेन स्वीकार्यम्, इति विभावयामः।

४.२-३ ग· जहीत्यादौ दीर्घाद्यापत्तेः। पं. १०.

क·ख·घ· जहीत्यादौ दीर्घापत्तेः।

'दीर्घाद्यापत्तेः' इति एकेनैव ग–पुस्तकेन स्वीकृतः पाठः समीचीनतरः, इति प्रतिभाति। 'जहीत्यादौ' इत्यत्र 'आदि'शब्दोच्चारणेन उत्तरत्राप्यादिशब्दोच्चारण-स्वाभाव्यात्।

किञ्च ख–पुस्तके "आदि'शब्दग्राह्यं तु 'अजूहवत्' इत्यत्र 'ओः पुयण्जि' इत्यापत्तेः" इति ग्रन्थः उपलभ्यते। तस्य च स्वारस्यं 'दीर्घाद्यापत्तेः' इत्यत्र 'आदि'-शब्दसत्त्वे एव सम्भवति, इति तु स्पष्टमेव। 'जहीत्यादौ' इत्यत्र 'आदि'शब्देन 'अजूहवत्' इत्यस्य समावेशः, 'दीर्घाद्यापत्तेः' इत्यत्रत्यादिशब्देन च 'ओः पुयण्जि'

इत्यस्य सङ्ग्रहः, इति तु स्पष्टमेव । अतः 'दीर्घाद्यापत्तेः' इति मूलपाठत्वेन स्वीकार्यम्, इति प्रतिभाति ।

अत्रेदमवधेयम्:—ख–पुस्तकस्थः " आदि'शब्दग्राह्यं तु 'अजूहवत्' इत्यत्र 'ओः पुयण्जि' इत्यापत्तेः " (४.३) इति तु न ग्रन्थकर्तुर्लेखः । किन्तु केनापि टिप्पणरूपेण कृतं तद् 'आदि'शब्दस्य प्रयोजनप्रदर्शनपरं विवरणम् । '*भाष्य*-ग्रन्थवत् स्वयमेव उच्चरितानां पदानां स्वयमेव ग्रन्थकर्त्रा व्याख्यानं कृतम्' इति समर्थनं तु अस्वाभाविकम्, ग्रन्थकर्तुर्लेखनशैलीविरुद्धं च । अतः केनापि पूर्वं टिप्पण-रूपेण पार्श्वभागे लिखितम्, अनन्तरं पुनर्लेखनसमये लेखनिकेन अनवधानात् भ्रान्त्या वा ग्रन्थमध्ये एव समावेशितम्, इति कल्पयितुम् इष्टम् । एकपुस्तकपरम्परात एव समा-गताभ्यां क–घ-पुस्तकाभ्याम्, तथा भिन्नपरम्परातः समागतेन ग–पुस्तकेन च अयं पाठः न स्वीकृतः, इत्यत्राप्यवश्यम् अवधानं दातव्यं भवति ।

४.४ क·ख·घ· **हलि अन्त्यमितीति** । .... पं. ११

ग· अधिको ग्रन्थः ....

क–ख–घ–पुस्तकैः भिन्नान्तर्गतपरम्परातः समागतैः अयं पाठः न स्वीकृतः; इत्यस्माभिः स न स्वीकृतः । किञ्च अत्र तस्योद्धारणे विशिष्टं स्वारस्यमपि न पश्यामः । अतः पूर्ववत् (४.३) अयमपि टिप्पणरूप एव ग्रन्थः, इति वयं विभावयामः ।

यदि तु 'हलि अन्त्यमितीति' इति प्रतीकोत्तरम् अव्यवहितत्वेन 'सप्तमीति' इति अन्यस्य प्रतीकस्यास्वाभाव्यं ग्रन्थकारशैलीविरुद्धं च, इति कल्प्यते; तदा " उपदेशे ' .... ' सूत्रे' इत्यर्थाल्लभ्यम् ।" इति ग–पुस्तकस्थः पाठोऽपि मूलपाठत्वेन स्वीकर्तुं शक्य एव । तथापि केषुचन स्थलेषु (उदाहरणार्थम्: " **–अन्यदीयेति** ' । '**चित्रगवीनामिति** ।"– पृ. ६, पं. २१-२२) अव्यवहितत्वेनापि प्रतीकद्वयं दृश्यते एव । एवं स्थितेऽपि यत्र मध्ये विवरणमुपलभ्यते; तत्र तस्यैव मूलपाठत्वेन स्वीकरणे औचित्यम्; इत्यपि कल्पयितुं शक्यम् ।

वयमत्र विवरणरूपस्य ग्रन्थस्य मूलग्रन्थत्वे विशिष्टं स्वारस्यं न पश्यामः ।

४.६ ग· **शाब्दबोधो न स्यात्** । पं. १८.

क·ख·घ· बोधो न स्यात् ।

त्रिभिरपि क–ख–घ–पुस्तकैः 'शाब्द' शब्दः परित्यक्तः अतः स पाठः अस्माभिः स्वीकृतः ।

यदि तु 'साधुत्वज्ञानं तु न शाब्दबोधे हेतुः' (पृ. ४ पं. १६) इत्यत्र पूर्वस्मिन् स्थले 'शाब्द'शब्दोच्चारणेन तथैव उत्तरत्र 'वाक्यार्थबोधो न स्यात्' (पृ. ४ पं. १९) इत्यत्र 'बोध'शब्दात् प्राक् 'वाक्यार्थ'शब्दोच्चारणेन केवल-'बोध'शब्दोच्चारणापेक्षया 'शाब्दबोध' इति शब्दः शास्त्रीयं स्वारस्यं प्रकटीकरोति, ग्रन्थकारशैल्यनुगुणं च तत्; इति चेत् क–ख–घ–पुस्तकलेखनिकैः अथवा तन्मूलभूतेन *ङ–पुस्तकेन अनवधानेन परित्यक्तः अयं शब्दः इति स्वीकर्तव्यं भवेत्।

५.२ ग· **इति च व्याख्यास्यते** इति। पं. २२.
क·ख·घ· ....

एतत् प्रतीकमादाय प्रवृत्तः (पं. २२–२६) ग–पुस्तकस्थः पाठः मूलग्रन्थत्वेनैव स्वीकार्यः इति प्रतिभाति। यतः—

(१) एतादृक्षस्य प्रदीर्घस्य ग्रन्थस्य प्रक्षिप्ततया स्वीकारे सामान्यतः प्रमाणाभावात्।

(२) अस्य प्रदीर्घस्य प्रघट्टकस्य हरिदीक्षितलेखनशैल्यनुगुणत्वात्।

(३) पूर्वस्य, 'हलि अन्त्यम्' इति प्रतीकमुपादाय प्रवृत्तस्य *शब्दरत्न*ग्रन्थस्य अनुकूलतया पूर्यमाणत्वात्।

(४) एकं प्रतीकमादाय द्वितीयं प्रतीकं यावत् मध्ये उपलभ्यमानस्य ग्रन्थस्य त्रुटेः क–ख–घ–पुस्तकेषु बहुशो दृष्टत्वाच्च। (उदाहरणार्थम्: द्रष्टव्यम् : पृ. ५ पं. २० तः पृ. ६ पं. १३ पर्यन्तम् पृ. १६ पं. ११ तः पृ. १८ पं. ९ पर्यन्तम्)

(५) एतादृक्षु स्थलेषु अधिक-प्रक्षिप्त-ग्रन्थकल्पनापेक्षया विद्यमानग्रन्थत्रुटेरेव कल्पनाया औचित्याच्च।

६.१ (*शब्दरत्न*स्वीकृतः) चित्रगवी**नाम्** .... पं. २.
(*लघुशब्दरत्न*स्वीकृतः) चित्रगवी**णाम्** ....

प्रायः सर्वेष्वपि मुद्रितेषु *प्रौढमनोरमा*पुस्तकेषु 'चित्रगवीणाम्' इति णत्वसहितः पाठ उपलभ्यते। अयं पाठः *लघुशब्दरत्नकारैः* नागेशभट्टैः स्वकीयमतप्रतिपादनानुसारं स्वयं विनिर्मितः नवीनः पाठः; इति स्पष्टमेव। यतः अत्रैव *शब्दरत्ने* 'चित्रगवीनाम्' इति प्रतीकमाश्रित्य "प्रत्यासत्त्या विभक्त्याक्षिप्तप्रकृते कवर्गवदुत्तरपदसमासरूपया एव ग्रहणेन 'कुमति च' इत्यनेन णत्वं न" इति स्पष्टमुक्तम्।

अतः *शब्दरत्नकारैः*हरिदीक्षितैः तेषां काले *प्रौढमनोरमायां* भट्टोजिदीक्षितानां

यो ग्रन्थः उपलब्ध आसीत्, स एव दन्त्यपाठ आदृतः समर्थितश्च। हरिदीक्षितानां शिष्यैः लघुशब्दरत्नकारैर्नागेशभट्टैस्तु दन्त्यपाठे दोषमुद्भाव्य णत्वं साधितम्।

एवं स्थिते ग्रन्थकाराणां भट्टोजिदीक्षितानां विद्यावंश-पितृवंशेति-उभयविधवंश-परम्परायाः साक्षात् समागतत्वात्, लघुशब्दरत्नापेक्षया शब्दरत्नस्थपाठस्य निर्विवादं प्राचीनत्वाच्च शब्दरत्नस्वीकृतः णत्वरहितः 'चित्रगवीनाम्' इति पाठ एव मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति विभावयामः। (द्रष्टव्यम् : ११३-१; ११७-३.)

[पृ. ७ पं. १४ अक्षरधूरन्तः, समासः ....

'अक्षधूरन्तः समासः' इति अवतरणं प्रथमतः निपुणं निरूप्यापि नोपलब्धम्। इदानीं तु 'ऋक्पूरब्धूःपथामानक्षे' (५.४.७४) इत्यस्मिन् सूत्रे *पातञ्जलमहाभाष्ये* चतुर्वारम् 'न चेदक्षधूरन्तः समासः' इत्याकारेण प्रयोग उपलभ्यते। अतः तत्र साम्प्रतं प्रश्नचिह्नस्यावश्यकता नास्ति इत्यवधारणीयमिति।]

७.१ ग.ख. उक्तरीत्यैवान्वयः। पं. १२
क.घ. उक्तरीत्यैव निर्वाहः।

अत्र क-घ-पुस्तकाभ्यां स्वीकृतः 'उक्तरीत्यैव निर्वाहः' इति पाठः समीचीनतयोपपन्नो भवति। अत एव चास्माभिः स स्वीकृतः। परं भिन्नपरम्परातः समागतयोः ख-ग-पुस्तकयोरुपलभ्यमान एव 'उक्तरीत्यैवान्वयः' इति पाठः स्वीकर्तुं योग्यः।

किञ्च 'देवदत्तनप्ता इत्यादाविव एकदेशान्वयः' (पृ. ७ पं. १३) इत्यत्राप्यन्वयशब्दोपादानेन पूर्वत्राप्यन्वयशब्दस्वीकारस्यैवौचित्यात्। अतः ख-ग-पुस्तकस्वीकृत एव पाठो मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति वयं विभावयामः।

७.३ ग. रलन्त्यमिति पं. २०
क.ख.घ. ररन्त्यमिति.

अत्रत्यः ग-पुस्तकस्थः 'रलन्त्यम्' इति पाठः स्वीकर्तुं शक्यः। क-घ-पुस्तकयोस्तु अत्रत्यानां तिसृणां पङ्क्तीनां त्रुटिर्वर्तते। ख-पुस्तके तु बहुषु स्थलेषु र-ल-वर्णयोर्व्यत्यासो दृश्यते।

अस्मिन् प्रकरणे च प्रत्याहारे हकारसङ्ग्रहस्य सर्वथा आवश्यकत्वेन तद्विषये मतभेदाभावेन च लकारेणैव प्रत्याहारकरणस्य युक्तत्वात्। उत्तरग्रन्थे च "न च ह्वोः सङ्ग्रहार्थं 'हल्' इति वाच्यम्" इति स्पष्टप्रतिपादनेन लकारेणैव प्रत्याहारकरणस्य ग्रन्थकर्त्रा स्वयमेव उक्तत्वाच्च। रेफेण प्रत्याहारकरणविषये अग्रे (पृ. ८ पं. १०) पार्थक्येन विवेचयिष्यमाणत्वाच्च।

९.२ ख.ग. आचार्यैर्ज्ञातत्वेन. पं. २
क.घ. आचार्येण ज्ञातत्वेन.

अत्र ‘ आचार्यैर्ज्ञातत्वेन ’ इत्येव पाठो युक्ततरः । उत्तरत्र ग्रन्थे (पृ. ८ पं.१६ इ. इ.) बहुषु स्थलेषु ‘ आचार्यैर्ज्ञातत्वेन ’ इत्याकारकस्यैव ग्रन्थस्य सर्वेष्वपि क–ख–ग–घ–पुस्तकेषु दर्शनात् । सर्वत्र बहुवचनोल्लेखं कृत्वा सकृत्स्थले एकवचनप्रयोगस्य ग्रन्थकर्तुर्लेखनशैलीविरुद्धत्वाच्च । भिन्नपरम्परातः समागतानां पाठानां स्वीकारस्य चिकित्साशास्त्रीयपद्धत्या अभिहितत्वाच्च इति तु प्रज्ञानमेव ।

१०.२ ख.ग.घ. उपदेशादिपददानेन पं. ६.
क. उपदेशपददानेन

क–पुस्तकलेखनिकेन ‘ आदि ’पदं अनवधानात् परित्यक्तम्, इति स्पष्टं प्रतिभाति । ख–ग–घ–पुस्तकेषु भिन्नपरम्परासमागतेषु तस्योपलब्धेः । अतः ‘ उपदेशादिपद° ’ इत्येव पाठः मूलग्रन्थत्वेन स्वीकार्यः ।

१२.४-५ ‘ढ्रो ढ्रे लोपः’ ‘रः खरवसानयोः’ इति न्यासेन सिद्धौ....पं.१४-१५
‘ ढो ढे लोपः ’ ‘ रः ’ ‘ खरवसानयोः ’ इति न्यासेन सिद्धौ.

अत्र चतुर्ष्वपि पुस्तकेषु समग्रस्य अत्रत्यस्य ग्रन्थस्य विपरिवर्तनं दृश्यते । कश्चन एकं हस्तलिखितादर्शम् आश्रित्य न ग्रन्थः समीचीनतया सरसतया च सङ्गच्छते । किञ्च प्रकरणसन्दर्भादिसमालोचनेन एवं ज्ञायते यत् : क–घ–पुस्तकयोः ‘ ढ्रो ढ्रे लोपः ’ इति पाठोऽभ्युपगन्तव्यो भवति ।

१२.६ क.ग.घ. भकारानुबन्धम् पं. १६,
ख. मकारानुबन्धम्

‘ म ’कारानुबन्धम्, इति ख–पुस्तकस्थः पाठस्त्वशुद्ध एव । परं क–घ–पुस्तकयोः अपेक्षया ख–पुस्तकस्थपाठनां वैशिष्ट्यम् उपपादयितुम्, ततश्च *उ–*ऊ–पुस्तकयोः पार्थक्येन अस्तित्वकल्पनायाः आवश्यकतां च प्रतिपादयितुमस्त्येवोपयुक्तता ख–पुस्तकपाठोद्धारस्येति ।

१३.१-२ ग. अज्ञातज्ञापकत्वरूप° पं. ३.
क.ख.घ. अज्ञातज्ञापकरूप°

क–ख–घ–पुस्तकैः स्वीकृतः ‘ अज्ञातज्ञापकरूप° ’ इत्येव पाठः अस्माभिः पूर्वं स्वीकृतः । तस्य अन्तर्गतभिन्नपरम्परातः समुपलब्धेः । किञ्च उत्तरत्र ‘उपदेशत्वाभावेन ’ इत्यत्रान्वयार्थम् ‘ °ज्ञापकत्व° ’ इति भावप्रत्य‘त्व’घटितपाठस्यैवौचित्यम्, इति

ग–पुस्तकपाठः एव स्वीकर्तुं योग्यः, इति प्रतिभाति। एतादृशत्रुटेः पुस्तकत्रयेऽपि बहुशो दर्शनात्। उत्तरत्र 'प्रामाणिकगौरवस्यादोषाच्च।' (पृ. १३ पं. १०) 'स्वरितप्रतिज्ञाबलेन' (पृ. ३० पं. १२) इत्यादिषु स्थलेषु 'त्व'त्रुटेर्बहुश उपलम्भाच्च। भावप्रत्ययाभावेऽपि कथञ्चित् ग्रन्थसङ्गतिर्भवत्येवेत्यन्यदेतत्।

१३.३ ग. शक्य एव, विशेषार्थबोधस्तु .... पं. १५.
क·ख·घ· शक्यः, एकविशेषार्थबोधस्तु ....

ग–पुस्तकस्थः 'शक्य एव विशेषार्थबोधस्तु' इत्येव पाठो मूलग्रन्थत्वेन स्वीकर्तुं योग्यः। क–ख–घ–पुस्तकमूलभूतस्य *ङ–पुस्तकस्य लेखनिकेन तु 'शक्य एव' इत्यनन्तरं यः अन्तिमः पूर्णविरामः, (अस्मिन् दण्डलेखनपद्धतिर्नास्ति। किन्तु पूर्ण-विराम (·) लेखनपद्धतिरेव सर्वत्र वर्तते) तस्यैव स्वल्पविरामाकारसदृशमाकारं प्रकल्प्य, तं च वकारेण संयोज्य (व. = व, = क) 'क'कारः सम्पादितः, स च अग्रेतन-'विशेष'शब्देन सह संयोजितः; इति सर्वथा लेखनिकबुद्धिवैशद्यसम्पादितोऽयं दोषः।

अतः पुस्तकत्रयस्वीकृतं पाठं परित्यज्य ग–पुस्तकपाठ एव स्वीकर्तुं योग्यः, इति विभावयामः।

१४.२ ग· निर्वृत्तप्रतिपत्तौ निर्वृत्तिः (एकवारमधिकम्) पं. ७

निर्वृत्तप्रतिपत्तौ निर्वृत्तिः (इत्येकवारमधिकम्) इति ग–पुस्तकम्। चतुर्ष्वपि पुस्तकेषु पुनर्लेखन-द्विर्लेखनेत्याख्याः दोषा वर्तन्ते, इत्येतत् प्रदर्शयितुमेव अस्यात्रोपन्यासः।

१४.४ क·ख·घ· संज्ञाया व्यावर्तनेन पं. १६.
ग· 'संज्ञा या व्यावर्तते, तेन'

ग–पुस्तकपाटस्तु सर्वथा अशुद्धः, पुस्तकत्रयेणास्वीकृतश्च। किन्तु 'व्यावर्तनेन' इत्यस्य स्थाने 'व्यावर्तते, तेन' इति लेखनिकेन कथं स्वबुद्धिकौशलमाश्रित्य विपरिवर्तितम्, इति प्रदर्शयितुमेवात्रास्योद्धारः। ग–पुस्तके पौनःपुन्येन एतादृग् शुद्धीकरणम्, अधिकग्रन्थसमावेशः, इत्यादि केनापि कृतम्, इति स्पष्टं भवति।

१६.२ ख·ग· निर्बीजत्वात् .... पं. १०.
क·घ· निवर्तितत्वात् ....

ख–ग–पुस्तकाभ्यां स्वीकृतः 'निर्बीजत्वात्' इत्येव पाठः सरसः भिन्नपरम्परा-सम्प्राप्तपुस्तकद्वयपुरस्कृतश्च। अतः 'निर्बीजत्वात्' इत्येव पाठः मूलग्रन्थत्वेन स्वीकार्यः।

१८.१ ख·ग·घ· उपजनिष्यमाणः .... पं. ६.
क· उपसञ्जनिष्यमाणः ....

'उपसञ्जनिष्यमाणः' इति पाठः एकेनैव क–पुस्तकेन स्वीकृतोऽपि साम्प्रतं सर्वत्र तदाकारेणैव परिभाषायाः उपलब्धेः, *परिभाषेन्दुशेखरे*ऽपि तेन स्वरूपेणैव परिभाषानिर्देशात्, स एव पाठोस्माभिरत्रापि प्रथमं स्वीकृतः। परम् अस्मिन् ग्रन्थेऽपि सर्वत्र उत्तरत्र (उदाहरणार्थं द्रष्टव्यम्ः पृ. ८२ पं. २२, पृ. १६६ पं. १२ इ.) 'उपजनिष्यमाण' इत्येव चतसृभिरपि मातृकाभिः स्वीकृतत्वात् अत्रैवं कल्पयितुं योग्यम्ः यत् सर्वत्र 'उपसञ्जनिष्यमाणः' इत्याकारेणैव प्रसिद्धेः क–कपुस्तकलेखनिकेनैव 'उपसञ्जनिष्यमाणः' इत्यनवधानात् लिखितम् । परम् उत्तरत्र स्थलेषु तु यथायथम् 'उपजनिष्यमाणः' इति लिखितम्। अतः अस्मिन्नपि स्थले 'उपजनिष्यमाणः' इत्येव पाठः मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति विभावयामः।

२०.२ ग. लाघवान्नास्कः .... पं. ५.
क.ख.घ. लाघवान्नासः

क–ख–घ–पुस्तकैः स्वीकृतोऽपि 'नासः' इति पाठः अशुद्ध एव। पुस्तकत्रयमूलभूत–*इ–पुस्तकस्यावश्यकतां प्रदर्शयितुमेवात्रास्योद्धारः। तथा च 'लाघवान्नास्क' इति ग–पुस्तकपाठ एव मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति विभावयामः।

२०.५ ग.घ. °प्राप्तार्थानुवादकस्य प्राबल्यानुमानेन .... पं. २४.
क.ख. °प्राप्तार्थानुवादकल्पनानुमानेन ....

क–ख–पुस्तकाभ्यां स्वीकृतोऽयं पाठः न तथोपपन्नो भवति, यथा ग–घ–पुस्तकाभ्यां स्वीकृतः 'न्यायप्राप्तार्थानुवादकस्य प्राबल्यानुमानेनोक्तार्थे' इति पाठः उपपन्नो भवति। क–ख–पुस्तकपाठोऽपि यथाकथञ्चिल्लापयितुं शक्यते।

किन्तु भिन्नपरम्परातः समागताभ्यां ग–घ–पुस्तकाभ्यामस्य पाठस्य स्वीकृतत्वात् शास्त्रीयचिकित्सादृष्ट्यापि अयमेव पाठः स्वीकर्तुं योग्यः, इति विभावयामः।

२१.४ ख.ग. लक्ष्यबलाल्लाभे पं. १६.
क.घ. लक्ष्ये बलाल्लाभे ....

भिन्नपरम्परातः समागताभ्यां ख–ग–पुस्तकाभ्यां स्वीकृतः 'लक्ष्यबलात्' इत्येव पाठः समीचीनतयोपपद्यते। वस्तुतः क–घ–पुस्तकयोरुपलभ्यमानः 'लक्ष्ये बलात्' इति पाठस्त्वशुद्ध एव। किन्तु क–घ–पुस्तकयोः कारणं विनैव बहुषु स्थलेषु मात्रालेखनं दृश्यते तत् प्रदर्शयितुमेवात्रास्योद्धारणम्। (द्रष्टव्यम् पृ. २२ पं. १९)

२१.२ ग. असन्न्यायोपन्यासपूर्विकायाः पं. ११
क.ख.घ. सन्न्यायोपन्यास° ....

क–ख–घ–पुस्तकैः स्वीकृतः 'सन्न्यायोपन्यास°' इति पाठः सर्वात्मना अशुद्धः एव इति प्रतिभाति। व्याकरणशास्त्रे नास्य उपयोगः प्रायेण क्रियते। किन्तु पूर्वमीमांसायाम् अस्योपयोगः वर्तते। *भाट्टदीपिकायाम्* (१.८.६) इत्यत्रास्योपयोगः स्पष्टं वर्तते एव। तत्र च 'असन्न्यायोपन्यास°' इत्येव वर्तते। क–ख–घ–पुस्तकानाम् एकमूलकत्वसम्पादनार्थं त्वस्य पाठस्य अत्रोपयोगो भवत्वेवेत्यन्यदेतत्।

२२.२ ख.ग. यदपि भावघञन्ते .... पं. १९.
क.घ. यद्यपि भावे घञन्ते

भिन्नपरम्परागत–ख–ग–पुस्तकयोरुपलभ्यमानः 'भावघञन्ते' इत्येव पाठः समीचीनतरः चिकित्साशास्त्रीयतत्त्वानुसारी च। किञ्च अत्रत्यः 'भावे घञन्ते' इति पाठः अशुद्धः, इत्यपि वक्तुं शक्यम्। कारणं विनैव एकारमात्रालेखनविषये क–घ–पुस्तकयोः प्रवृत्तेर्दर्शनात्। (उदाहरणार्थम् : पृ. २१ पं. १६)। 'भावघञन्त' इत्याकारकशब्दप्रयोगस्यैव सर्वत्र उपलम्भात्। अस्मिन्नेव प्रकरणे (पृ. २२ पं. २१) 'भावघञन्त' इति शब्दप्रयोगस्य दर्शनात्। क–घ–पुस्तकाभ्यामपि एतदाकारेणैव तत्र स्वीकृतत्वाच्च। अतः 'भावघञन्ते' इत्येव पाठः मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति विभावयामः।

२३.२ क.ख.घ. आदिशब्दग्राह्यं तु पं. २०.
ग. (अधिकः ग्रन्थः) ....

अत्रेदमवधेयम् :

अत्र ग–पुस्तकस्थः 'आदिशब्दग्राह्यम् आदिशब्दघटितबहुव्रीहौ अन्यपदार्थत्वेन ग्राह्यं वा' इति ग्रन्थः वस्तुगत्या पाठ एव नास्ति। किन्तु ग–पुस्तकस्य यत् मूलं कल्पितम् *ई–पुस्तकम्, तत्र केनापि बुद्धिमता चतुरेण पाठकेन पार्श्वभागे लिखिता इयं टिप्पणी 'आदिशब्दग्राह्य'शब्दस्य स्पष्टीकरणार्थम्। न तु हरिदीक्षितानां मूलग्रन्थोऽयम्। परन्तु *ई–पुस्तकतः ग–पुस्तकलेखनसमये तस्य लेखनिकेन तु अनवधानात् अज्ञानतो वा तस्याष्टिप्पण्याः अपि अन्तर्भावः ग्रन्थमध्ये एव कृतः, इति कल्पयितुं शक्यते। अतः प्रक्षिप्तोऽयं ग्रन्थः, इति प्रतिभाति।

यदि तु 'आदिशब्दग्राह्यं तु' इत्यत्रत्य–'ग्राह्यम्' इति वर्णानुपूर्व्याः 'अन्यपदार्थत्वेन ग्राह्यम्' इत्यत्रत्यग्राह्यशब्दसादृश्यात् मध्ये वर्तमानः ग्रन्थः अनवधानात् क–ख–घ–पुस्तकमूलभूत–*इ–पुस्तकलेखनिकेन परित्यक्तः, इति कल्प्यते, तदाऽस्य

पाठत्वमपि सम्भाव्यते। परन्तु पूर्वत्र '°ग्राह्यं तु' इति ग्रन्थो वर्तते; पाठे तु 'ग्राह्यं वा' इति तु-वा-शब्दौ अधिकौ स्तः। तयोः सत्त्वे शक्यो वा एतादृशो ग्रन्थपरित्यागः, इत्यपि विमर्शनीयं भवति, इति चिन्त्योऽयं विषयः। अतः क–ख–घ–पुस्तकस्वीकृतः पाठः अस्माभिर्मूलग्रन्थत्वेन स्वीकृतः।

२४.४ क·ख·घ· मन्मते तु लोपस्येत्र पं. २०.
ग· मन्मते तु प्रत्यासत्तिन्यायादुपदिश्यमानान्तस्यैव ग्रहणेन ....

ग–पुस्तके तु 'मन्मते तु प्रत्यासत्तिन्यायादुपदिश्यमानान्त्यस्यैव ग्रहणेन' इति ग्रन्थः अधिको वर्तते। प्रकृतोदाहरणसदृक्षेषु ग्रन्थेषु अत्यन्तं सन्देहो भवति।

कदाचित् एतद् ग्रन्थकर्त्रैव हेतुत्वरूपेण लिखितमपि पुस्तकत्रयेऽपि अनवधानात् त्रुटितम्, इति वक्तुं शक्यते।

अथवा एतदपि कल्पयितुं शक्यते यद् ग–पुस्तकस्य मूलभूते *ई–पुस्तके लेखनिकेन 'प्रत्यासत्ति° .... ग्रहणेन' इति टिप्पणी लिखिता, सैव च टिप्पणी ग–पुस्तकलेखनिकेन ग्रन्थमध्ये मूलग्रन्थत्वेनान्तर्भाविता, इति प्रक्षिप्तोऽयं ग्रन्थः, इत्यस्माकं मतिः। 'प्रत्यासत्तिन्यायादुपदिश्यमानान्त्यस्यैव ग्रहणेन' इति उपात्त-हेतोर्निवेशस्य अपरिहार्यतया वक्तव्यत्वेन आवश्यकता नास्ति, इति तु अत्र तत्त्वम्। नापि च अत्र ग्रन्थकारलेखनवैशिष्ट्यं दृश्यते।

२४.५ क·ख·घ· मकारस्य नेत्त्वम् पं. २२–२३.
ग· (अधिको ग्रन्थः) ....

ग–पुस्तकस्थः "अत एव 'षः प्रत्ययस्य' इत्यादीनां चारितार्थ्यम्।" इति ग्रन्थोऽपि पूर्ववत् (२४.४) प्रक्षिप्त एव इति प्रतिभाति। क–ख–घ–पुस्तकेषु अथवा तन्मूलभूते *ई–पुस्तके त्रुटेः सम्भवो नास्त्येव, इति न। परम् अत्र तथा विशिष्टमसाधारणं कारणं तु न पश्यामः, येनास्य ग्रन्थस्य नितान्तमावश्यकता भवेत्। प्रत्युत एतदत्र सम्भावयितुं युक्तम्, यत् प्राचीनव्याख्याकाराणाम् अथवा टिप्पणीकृतामियं लेखनशैली यथा ग्रन्थलेखनसमये अथवा ग्रन्थपठनसमये पठ्यमानस्य ग्रन्थस्य पूरकत्वेन मध्ये मध्ये स्वकीयविचारा अपि लिखित्वा ग्रन्थान्तःसन्निविष्टाः क्रियन्ते, इति। अनयैव रीत्या केनापि टिप्पणीरूपेण लिखितोऽयं ग्रन्थः ग–पुस्तक-लेखनिकेन मूलग्रन्थमध्ये अन्तर्भावितः, इति विभावयामः।

२६.१ ख·ग· महासंज्ञायाः करणेन .... पं. ७.
क·घ· महासंज्ञाकरणेन ....

प्राय: सर्वत्रापि स्थलेषु 'महासंज्ञाकरणेन' इत्येव निर्देश: क्रियते। अत: अत्रापि 'महासंज्ञाकरणेन' इत्येव पाठ: स्वीकर्तुं योग्य:, इत्यापततोऽवलोक्यमाने प्रतिभाति। परम् अत्र भिन्नपरम्परागतत्वात् षष्ठ्यन्तासमस्तपाठ एव स्वीकर्तुं योग्य:। किञ्च समस्तपाठे महासंज्ञाशब्दस्य 'सङ्ख्यावत्' इत्यत्र सम्बन्धस्य वर्तमानत्वात् अत्र 'अविमृष्टविधेयांश:' इत्याख्यो दोषोऽपि समापतत्येव।

२६.८ क॰ख॰ग॰घ॰ तं मनुते इत्यादौ त्राचर्यम् पं. ८

*(माचर्यम्? ञाचर्यम्?)

अत्र 'त्राचर्यम्' इति तु सर्वात्मना अशुद्धमेव। परन्तु सर्वास्वपि मातृकासु 'त्रा' इत्याकारेणैव उपलब्धे: अस्माभिस्तत्तथैव स्थापितम्। किन्तु टिप्पण्याम् 'माचर्यम्' इत्यस्य सम्भावना कृता। तत्र कारणं तु स्पष्टमेव। 'तं' इतिशब्दस्यानुस्वारस्य मकारे परत: परसवर्णे क्रियमाणे मकारस्यैव सम्भावना वर्तते। परम् मकाराकृते: त्राकृतेश्च न किञ्चिदपि साम्यम्, इत्यत्रापि नास्ति वैमत्यम्। अत: शिवसूत्रे अनुनासिकेषु आदौ उच्चारितस्य ञकारस्य ग्रहणं कृत्वा ञाचर्यम् इति पाठश्चेत् स्वीक्रियते, तर्हि तत्र ञकार-त्रकारयो: लेखनसाम्यं स्पष्टमेव। अत: 'ञाचर्यम्' इति स्वीकर्तुं शक्यमेव। परमत्र साक्षात् उपस्थितत्वेन 'माचर्यम्' इति: पाठ: टिप्पण्यां संसूचित:।

२६.३ ख॰ग॰घ॰ अभ्र आँ इति। पं॰ २०

क॰ अभ्र आँ अप इति।

अत्र केनापि आकारेण प्रतीकस्वीकरणे नास्ति दोष:। किन्तु क–घ–पुस्तकयो: क्वचित् स्थले दृश्यते भेद:, तेषु चान्यतमम् इदमुदाहरणम्, इत्येवात्रोपन्यास:। एतादृशैरुदाहरणैरेव भवति उभयोर्ग्रन्थयो: पार्थक्येन विमर्शने आवश्यकता।

शास्त्रीयमर्यादामाश्रित्य पाठस्वीकारे तु 'अभ्र आँ इति' इत्येव पाठ: स्वीकर्तुं योग्य:।

२७.१ ख॰ग॰ 'उपदेश इति .... वक्तुं शक्यत्वात्'। पं. ६.

क॰घ॰ °मशक्यत्वात् ...

क–घ–पुस्तकयो: उपशाखापुस्तकं यत् *उ–पुस्तकम्, तल्लेखनिकेन '°शक्यत्वात्' इति वर्णानुपूर्व्या: उभयत्र स्थले साम्यदर्शनात् ख–ग–पुस्तकयोर्वर्तमान: 'उपदेश इति .... वक्तुं शक्यत्वात्' इति पङ्क्तिद्वयपरिमितो ग्रन्थ: परित्यक्त:, इति स्पष्टं प्रतिभाति। अत: ख–ग–पुस्तकयोरुपलभ्यमान: 'उपदेश इति

........वक्तुं शक्यत्वात् । ' इत्यधिको ग्रन्थ एव मूलग्रन्थत्वेन स्वीकर्तुमावश्यकः, इति विभावयामः ।

२७.५　ग.　' शब्दस्य .... प्रत्ययान्तस्योपज्ञाशब्दस्य ' पं. १६.
　　क.ख.घ.　मुल्य(स्यो)पज्ञाशब्दस्य

पूर्ववदेव (२७.१) अत्रापि क–ख–घ–पुस्तकशाखाभूत–*इ–पुस्तकलेखनिकेन उभयत्र स्थले '°उपज्ञाशब्दस्य ' इति वर्णानुपूर्व्याः वर्तमानत्वात् तत्र विद्यमानेन लेखनसादृश्येन मध्ये वर्तमानः ग–पुस्तके उपलभ्यमानः ग्रन्थः अनवधानात् परित्यक्तः, इति स्पष्टं प्रतिभाति । अतः अयमेव ग–पुस्तकपाठः मूलग्रन्थत्वेन कल्पयितुं योग्यः, इति विभावयामः ।

३०.१　ग.　आवश्यकत्वम्　पं. ७.
　　क.ख.घ.　अवश्यकत्वम् ....

क–ख–घ–पुस्तकानां शाखापुस्तकस्य *इ–पुस्तकस्य निर्धारणार्थम् एतादृंशि (' अवश्यकत्वम् ' एतत्सदृक्षाणि) सामान्याशुद्धानि उदाहरणानि अत्रोदाहृतानि । (दिङ्मात्रमत्रोदाहृतम् ।)

३०.३　क.ख.घ.　स्वरितप्रतिज्ञा　पं. १२.
　　ग.　स्वरितत्व°

क–ख–घ–पुस्तकानां शाखापुस्तकेन *इ–पुस्तकेन 'त्व'प्रत्ययत्यागः बहुषु स्थलेषु क्रियते इति तु पूर्वं (पृ. १३.१-२) दृष्टमेव । वस्तुतः एतदृक्षु स्थलेषु शास्त्रीयग्रन्थेषु 'त्व'प्रत्ययसहितपाठा एव समीचीनाः इति भाति । अतः ग–पुस्तकेन स्वीकृतोऽयं पाठः अत्र मूलपाठत्वेन स्वीकर्तुं योग्यः, इति विभावयामः ।

३०.५　ख.ग.　भावल्युडन्तोच्चारण° पं. २१.
　　क.घ.　ल्युडन्तोच्चारण°

ख–ग–पुस्तकस्थः ' भावल्युडन्त° ' इति पाठ एवात्र मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति प्रतिभाति । भिन्नपरम्परागतपुस्तकद्वयपुरस्कृतत्वादस्य पाठस्येति तु स्पष्टमेव । किञ्च उत्तरत्र (पं. २१) प्रतिद्वन्द्वितया ' करणल्युडन्त° ' इति शब्दप्रयोगेण इहापि मूले 'भाव'शब्दसम्भावना कल्पयितुं युक्ता । तदर्थं च *उ–पुस्तकलेखनिकस्य प्रकृत्यनुसारम् अनवधानात् 'भाव'शब्दत्रुटेः कल्पना सर्वथा योग्यैव ।

३१.७　क.ख.घ.　साक्षाद् गृह्यमाणेन कालपरिच्छेदार्थम् पं. १९.
　　ग.　साक्षाद् गृह्यमाणे विशेषाभिव्यक्त्या कालपरिच्छेदार्थम्,

अत्र वदन्तिः—अस्मिन् स्थले 'साक्षाद् गृह्यमाणे विशेषाव्यक्त्या कालपरिच्छेदार्थम्' इति ग-पुस्तकपाठ एव मूलग्रन्थत्वेन स्वीकर्तुं योग्यः। तथाहिः—क-ख-घ-पुस्तकानां उपशाखा-पुस्तकद्वयं *'उ' *'ऊ' इति, तयोः मूलं पुस्तकम् *'इ' इति, तस्यैव लेखनिकेन अनवधानात् 'विशेषाव्यक्त्या' इति परित्यक्तम्। तदनन्तरं तयोः सङ्क्रमितयोः *उ-*ऊ-पुस्तकयोः सम्पादकाभ्यां 'गृह्यमाणे' इत्येतस्य हेतुत्वप्रदानबुद्ध्या 'गृह्यमाणेन' इत्येवं परिकल्पितम्। इति।

तन्न। उत्तरग्रन्थसन्दर्भात्। एकान्तरिते एव वाक्ये (पृ. ३१ पं. २०) "न च कालग्रहणं गृह्यमाणेनैव कालपरिच्छेदार्थम्" इत्यत्र 'गृह्यमाण'शब्दस्य कालपरिच्छेदे तृतीयान्तहेतुत्वेनैवोदाहरणात्। अतः अत्र एतत् कल्पयितुमिष्टम्; यत् ग-पुस्तकस्य शाखापुस्तकं यत् *ई-पुस्तकम्, तस्यैव लेखनिकेन 'गृह्यमाणेन' इत्यस्य स्थाने अनवधानात् 'गृह्यमाणे' इति लिखितम्। तदनन्तरं *ई-पुस्तकतः ग-पुस्तकलेखनसमये तत्सम्पादकेन तत्र वाक्ये हेतोरावश्यकतां दृष्ट्वा 'विशेषाव्यक्त्या' इत्यधिकं प्रक्षिप्तम्; इति कल्पयितुं योग्यम्। अतः पुस्तकत्रयस्यः एव पाठो मूलग्रन्थत्वेन स्वीकर्तुं योग्यः इति विभावयामः।

३२.२ ख.ग. लोके व्यक्तावेव खर्वत्वं **प्रसिद्धम्**, न जातौ। पं. ७.
क.घ. लोके व्यक्तावेव खर्वत्वं न जातौ।

अत्र भिन्नपरम्परागत-ख-ग-पुस्तकाभ्यां स्वीकृतः 'व्यक्तावेव खर्वत्वं प्रसिद्धं न जातौ' इति पाठ एव स्वीकर्तुं योग्यः। शास्त्रीयमर्यादया तथैव लाभात्। लेखनसमये 'लोके'शब्दोच्चारणानन्तरं 'प्रसिद्धम्' इति शब्दोच्चारस्य प्रायः सर्वत्र लाभात्। हरिदीक्षितलेखनशैल्यनुगुणत्वाच्च। अतः *उ-पुस्तकलेखनिकेन 'प्रसिद्धम्' इति पदं त्यक्तम्, इति विभावयामः।

३२.७ ख.ग. सन्वद्**भावा**भावार्थम् पं. १९.
क.घ. सन्वद्भावार्थम्

'अततक्षत्' इत्यादौ सन्वद्भावस्य अभावः अत्यन्तं सुस्पष्टः। अतः भिन्नपरम्परागत-ख-ग-पुस्तकपाठः समीचीन एव। *उ-पुस्तकलेखनिकेन तु अनवधानात् 'भाव'शब्दसादृश्येन एकः भावशब्दः परित्यक्तः इति विनायासेनैव कल्पयितुं शक्यते। अतः क-घ-पुस्तकयोरुपलभ्यमानः पाठस्त्वशुद्ध एव।

३३.१ ग. प्रातिशाख्यादिकं चेति । प्रातिशाख्यादिशब्दयोर्बहुव्रीहिः । प्रातिशाख्यमूलकं लक्ष्यदर्शनमित्यर्थः । शाकल्यरूपान्यपदार्थे बहुव्रीहिर्वा । चशब्दार्थस्तस्य ग्रहणम्। पं. १२.

क.ख.घ. प्रातिशाख्यादिकं चेति । 'च'शब्दार्थस्तस्य ग्रहणम् ।

अत्रत्यः उपरिष्टात् ग–पुस्तकपाठः मूलग्रन्थत्वेन स्वीकर्तुम् आवश्यकः । अन्यथा इतोऽनन्तरम् "'च' शब्दार्थस्तस्य ग्रहणम्" इति ग्रन्थस्य असङ्गतिः । 'च' शब्देन कस्य ग्रहणं कर्तव्यम्, इति प्रश्ने समुत्पन्ने शब्दरत्नकारैर्हरिदीक्षितैः 'प्रातिशाख्यमूलकं लक्ष्यदर्शनम्' इति स्पष्टीकरणम् कृतम् । तस्यैव लक्ष्यदर्शनस्य "चशब्दार्थस्तस्य" इत्यत्रत्येन 'तस्य'शब्देन परामर्शः कृतः । अतः *उ–पुस्तकलेखनिकेन अयं ग्रन्थः अनवधानात् परित्यक्तः इति स्पष्टं प्रतिभाति ।

अत्रत्यम् इदम् उदाहरणम् चिकित्साशास्त्रीयप्रक्रियायाम् अत्यन्तम् उपयोगाय कल्पते । तद्यथाः—*आ–पुस्तकानन्तरम् अस्माभिः *इ–पुस्तकम्, *ई–पुस्तकम्, इति पुस्तकद्वयपरम्परा स्वीकृता । ततश्च *इ–पुस्तकपरम्परातः पुस्तकत्रयम् अस्माभिरुपलभ्यते । *ई–पुस्तकपरम्परातश्च एकं पुस्तकमुपलभ्यते । अतः वस्तुतः तत् परम्पराद्वयमेव । परम् पुस्तकत्रयेतिसङ्ख्याधिकवशात् तत्पक्षपाती निर्णयः स्वीकर्तव्यः इत्यपि कदाचिन्मतिः प्रवर्तते । अत्रत्येन उदाहरणेन तु एतत् स्पष्टं भवति, यत् तादृशो निर्णयो नैव उचितः । किन्तु ग्रन्थगतप्रामाण्यमाश्रित्यैव मतभेदस्थलेषु स्वीकार्यास्वीकार्यविषये निर्णयः कर्तव्यः, इति ।

३३.२ ग. स्वरितमात्रसङ्ग्रहार्थम् । पं. १२–१३.

क.ख.घ. स्वरितमात्रग्रहणार्थम् ।

ग–पुस्तकेन तु '°ग्रहणार्थम्' इत्यस्य स्थाने '°सङ्ग्रहार्थम्' इति पाठः स्वीकृतः । पुस्तकत्रयेण तु '°ग्रहणार्थम्' इत्येव । परम् अत्रैव एकान्तरिते एव वाक्ये (न च त्रिपादीस्वरितसङ्ग्रहार्थम् .... पृ. ३३ पं. १३) '°सङ्ग्रहार्थम्' इत्यस्य दर्शनात् अत्रापि तस्यैव मूलग्रन्थत्वेन ग्रहणं योग्यम्, इति विभावयामः ।

एतादृक्षु स्थलेषु ग्रहणशब्दापेक्षया सङ्ग्रहशब्दस्यैवौचित्यं च, इत्यप्यवधारणीयमिति ।

३६.२ ख. निवृत्ते प्राणाख्ये वायौ पं. २०.

क.ग.घ. निवृत्ते प्राणाख्यवायौ

अत्र ख–ग–पुस्तकयोः 'प्राणाख्ये वायौ' इत्यसमस्तः पाठ उपलभ्यते । वस्तुतः क–घ–पुस्तकयोः कारणं बिना अधिकस्य शीर्षमात्रालेखनस्य दर्शनात् (उदाहरणार्थं

द्रष्टव्यम् : पृ. २१ पं. १६, पृ. २२ पं. १९) अत्र शीर्षमात्रारहितः पाठस्तयोः न सम्यगुपपद्यते। अतः अस्माभिः पूर्वम् ऊर्ध्वमात्रारहित एव समस्तः पाठः स्वीकृत आसीत्। ख–ग–पुस्तके तु भिन्नपरम्परागते, इति तयोर्महत्त्वं वर्तते एव। किन्तु असमस्तपाठे अविमृष्टविधेयांशो दोषोऽपि भवति।

एवं च समुदितात् कारणकलापात् ' प्राणाख्ये वायौ ' इत्येव पाठः मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति विभावयामः। अन्यानि त्रीणि पुस्तकानि वर्जयित्वा क्वचित् उपलभ्यमानं ख–पुस्तकपाठस्वीकारस्येदमुदाहरणमित्यपि वैशिष्ट्यमस्य।

३८.१ क॰घ॰ भेदार्थम् पं. १
ख॰ग॰ भेदार्थे

अत्र ख–ग–पुस्तकयोः ' भेदार्थे ' इति पाठः उपलभ्यते। किन्तु हरिदीक्षितलेखनशैल्यनुसारं सामान्यसंस्कृतभाषाप्रकृत्यनुसारं च एतादृक्षु स्थलेषु सप्तम्यन्तपाठस्य सम्भवोऽल्पतरः। किन्तु बहुषु स्थलेषु चतसृष्वपि मातृकासु अनुस्वारस्य स्थाने एकारः, एकारस्य च स्थाने अनुस्वारः, इति व्यत्यासो दृश्यते, तत्र निर्विवादं निर्णायकं च एतदुदाहरणं सर्वसम्मतं भवेत् इति प्रतिभाति।

ख–ग–पुस्तकयोः क्वचित् असाधुस्थलेषु उपलभ्यमाना एकवाक्यता तु अत्रापि लभ्यते। तेन च ख–पुस्तकोपरि ग–पुस्तकप्रभावः इत्येतत् कल्पयितुमपि एतदुदाहरणमुपकारकं भवति इति तु अन्यदेतत्।

३८.२ क॰ग॰घ॰ यथा वा पं. १५
ख॰ यथा च

क–ग–घ–पुस्तकैः स्वीकृतः पाठः शास्त्रीयचिकित्सामर्यादया स्वीकर्तुं सर्वथा योग्यः, स एव च स्वीकृतः। किञ्च अत्रैव उत्तरत्र (पृ. ३८ पं. १९) एतादृशप्रसङ्गे एव ' यथा वा ' इत्यस्य लेखनात् अत्रापि तथैव प्रयोगस्य आवश्यकत्वात्। किञ्च अत्र, उत्तरत्र, उभयत्रापि स्थले विकल्पप्रदर्शनस्यैवावश्यकता वर्तते न पुनः समुच्चयस्य। अतः ' यथा च ' इति प्रयोगस्तु सर्वथा अयोग्य एव।

एतदुदाहरणं तु चकारवकारयोः लेखने यत् साम्यं वर्तते तस्य स्पष्टतां प्रतिपादयति। ख–पुस्तकस्य उपशाखापुस्तकं यद् *ऊ–पुस्तकम्, तस्य लेखनिकेन ' यथा वा ' इत्यस्य स्थाने लेखनशैलीविशेषात् ' यथा चा ' इति लिखितम्। मनसि तु ' यथा वा ' इत्येव लेखनं कृतम्, इति निर्धारितम्। आकृत्या तु ' च 'सदृशमेव अक्षरम्। ततः *ऊ–पुस्तकं दृष्ट्वा लिखितुं प्रवृत्तेन लेखनिकेन तु ' यथा चा ' इत्य-

क्षराणि दृष्ट्वा ' चा ' शब्दस्य सर्वात्मना असम्भवं चोत्प्रेक्ष्य तत्स्थाने ' यथा च ' इत्यक्षरसन्निवेशः कृतः, इति सुस्पष्टं प्रतिभाति अस्मिन्नुदाहरणे ।

३९.३ क·घ· दन्तोष्ठम् पं. १५.
ख·ग· दन्तोष्ठ्यम्

अत्र ख–ग–पुस्तकयोः ' दन्तोष्ठ्यम् ' इति यकारघटितः पाठ उपलभ्यते । आपाततः स यद्यपि शुद्धः, इति प्रतिभाति तथापि स न हरिदीक्षित-पाठः, इति विभावयामः ।

यतो हिः—अत्र वकारस्य स्थानविषये विचारः प्रवृत्तः । किञ्च *सिद्धान्त-कौमुद्याम*पि ' वकारस्य दन्तोष्ठम्' इत्येव ग्रन्थः ' तुल्यास्यप्रयत्नम् ' इत्यस्मिन् सूत्रे उपलभ्यते । अतः अत्रापि " दन्तोष्ठम् ' इति समासनिर्देशेन समुदितस्य जनकत्वेन अन्यतरस्य तदभावात् " इत्यत्र ' दन्तोष्ठम् ' इति स्थाननिर्देश एव न तु वकारस्य विशेषणरूपः निर्देशोऽयम् ।

किञ्च विशेषणरूपेण निर्देशे ' दन्तोष्ठ्यो वः ' इत्येतादृशपुंस्त्वनिर्देशस्यैव सर्वात्मना आवश्यकत्वात् । अतः ' दन्तोष्ठम् ' इति यकाररहितः क–घ–पुस्तकपाठ एव स्वीकर्तुं योग्यः इति विभावयामः। ख–पुस्तकोपरि ग–पुस्तकप्रभावः इत्येतत्प्रदर्शनायापि इदमुदाहरणमत्यन्तमुपयोगि, इत्यप्यवधारणीयम् ।

४०.(पं.)१५ क·ग·घ· पूर्वसूत्रे आकारसहितत्वेनोत्तरसूत्रेऽकारसहितत्वेन.
ख· पूर्वसूत्रेऽकारसहितत्वेनेतरसूत्रे आकारसहितत्वेन.

अत्र ख–पुस्तके ' पूर्वसूत्रे अकारसहितत्वेन इतरसूत्रे आकारसहितत्वेन ' इति ग्रन्थः दृश्यते ।

तत्रेदं विचार्यतेः—अत्र 'पूर्वसूत्रे' इत्यनेन 'वृद्धिरादैच् ' इति सूत्रं परामृश्यते 'इतरसूत्रे' इत्यनेन च ' अदेङ् गुणः ' इति सूत्रम् । (अवलोक्यताम् " वृद्धिरादैच् ' ' अदेङ् गुणः ' इत्यत्र...." । पृ. ४० पं. १३) । अतः 'पूर्वसूत्रे अकारसहितत्वेन' इति पाठस्तु सर्वात्मना अयोग्य एव । तत्र आकारसहितत्वात्, न तु अकारसहितत्वात् । तथैव ' इतरसूत्रे आकारसहितत्वेन ' इति पाठोऽप्यशुद्ध एव । ' इतरसूत्रे ' नाम ' अदेङ् गुणः ' इत्यस्मिन् सूत्रे । तत्र च अकारसहितत्वमेव वर्तते न तु आकारसहितत्वम् । अतः अत्र अकारस्थाने आकारः, आकारस्थाने च अकारः, इत्येव शुद्धं स्वरूपम्; इति विभावयामः। अत एव च ख–पाठो नात्रास्माभिरुद्धृतः ।

किञ्च ‘ इतरसूत्रे ’ इत्यपि न समीचीनः पाठः । तदपेक्षया ‘ उत्तरसूत्रे ’ इति पाठस्यैव समीचीनतरत्वम् । ‘ अदेङ् गुणः ’ इत्यस्य सूत्रानुक्रमेण अव्यवहितोत्तरत्वस्य सत्त्वात् । न चैवम् ‘ उत्तरसूत्रे ’ (पृ. ४० पं. १६) इत्यत्रापि उत्तरशब्दप्रयोगस्यैव सत्त्वात् । भिन्नपरम्परागतेषु क–ग–घ–पुस्तकेषु अपि ‘ उत्तर ’शब्दप्रयोगस्यैव सत्त्वेन चिकित्साशास्त्रीयमर्यादया तथैव लाभाच्च ।

४१.२ घ· कण्ठभिन्नस्थानानाम् पं. ७.
ग· कण्ठस्थान°............°सामर्थ्याच्च । (अधिको ग्रन्थः)
क· कण्ठाभिन्नस्थानानाम् ....
ख· कण्ठस्थानानाम् ....

अत्र क–पुस्तके ‘ कण्ठाभिन्न° ’ इति पाठो वर्तते, स त्वशुद्ध एव । किञ्च अत्र सन्दर्भे ‘ भिन्न ’शब्दस्यावश्यकता वर्तते प्रतिपादयितुमेवात्रोद्धरणम् ।

ख–पुस्तकेन तु भिन्नशब्द एव परित्यक्तः । तदप्यशुद्धमेव । कण्ठव्यापारस्य सर्वेषां वर्णानाम् उच्चारणे आवश्यकत्वस्योक्तत्वेन अत्र ‘ कण्ठभिन्नस्थानानां वर्णानां सावर्ण्यापत्तिः ’ इत्यस्याः शङ्काया एवोदयात् । किञ्च ‘ चोः कुः ’ इति ज्ञापकमपि ‘ कण्ठभिन्नस्थान ’ इति शब्दप्रयोगे कृते एवोपपद्यते ।

अस्यैव अर्थस्य विवरणात्मकः ‘ कण्ठस्थानमात्रैक्यं गृहीत्वा ’ इत्यादिः अधिकः ग–पुस्तकपाठो वर्तते; इति ।

४१.४ ग· *भाष्यम्* । ‘ असिद्धशब्दस्य .... निरूपयिष्यामः ’। पं. १५.
क·ख.घ· त्रुटिः

अत्र ‘ न चास्या° ’ इति ग्रन्थात् प्राक् ग–पुस्तके “ असिद्धशब्दस्य आरोपितसिद्धपरत्वम्, सिद्धसदृशपरत्वं वा, सिद्धाभावपरत्वं वा। ततो वति प्रत्ययकल्पना ’ इत्यग्रे निरूपयिष्यामः। ” इति अधिको ग्रन्थ उपलभ्यते।

यद्यपि त्रिष्वपि पुस्तकेषु अस्य त्रुटिर्दृश्यते, तथापि ‘ निरूपयिष्यामः ’ इति प्रयोगात् अयं ग–पुस्तकग्रन्थः मूलग्रन्थ एव, इति स्पष्टं वक्तुं शक्यते। अतः पूर्वं यथा दृष्टम्, तथैव अत्रापि एकपङ्क्तिपरिमिता त्रुटिरेव क–ख–घ–पुस्तकमूलभूते *ङ–पुस्तके लेखनिकानवधानात् सञ्जाता इत्येव वक्तुं योग्यम्, इति विभावयामः ।

४२.२ ग· बाधकाभावाच्च। “ न मु ने ’ इत्यादेर्मानत्वाच्च ” पं. ३.
क·ख·घ· बाधकाभावाच्च । त्रुटिः

अत्रत्यः ग–पुस्तकपाठो मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति प्रतिभाति। पूर्वग्रन्थेन सहास्य सुसङ्गतत्वात्। पूर्वोपात्तहेतौ कामप्यरुचिं मनसि निधाय ग्रन्थकार-शैल्यनुरोधेन व्याकरणशास्त्रीयपरम्परादृष्ट्या च सूत्रकारनिर्देशस्य अन्तिमप्रबलप्रमाण-स्वरूपहेतुत्वेनोपन्यस्तुं योग्यत्वाच्च। *ड–पुस्तकलेखनिकप्रकृत्यनुसारं च 'बाधका-भावाच्च' इत्यत्रत्य–'च्च'कारसाम्यं दृष्ट्वा 'न मु ने' इत्यादेर्मानत्वाच्च" इति ग्रन्थस्य त्रुटेः सुष्ठु उपपादयितुं शक्यत्वाच्च।

४४.४ ग० किञ्चार्धाधिकारेण कण्ठादिव्यापारेणाप्रकाश्यमानस्य लोपस्या-
सिद्धत्वानापत्तेः। अपि च अवि° .... पं. १५.
क०ख०घ० (त्रुटिः)। किं च 'अविद्यमानवत्'पदानुवृत्तौ

अत्र ग–पुस्तके अधिकः ग्रन्थः उपलभ्यते। अर्थानुसन्धानेन अत्रास्यावश्यकता इति तु स्पष्टमेव। हरिदीक्षितलेखनशैल्यपि अत्र स्पष्टं प्रतीयते। उत्तरवाक्ये 'विक-ल्पोऽपि' इत्यत्रत्यः 'अपि'शब्दः 'अपि च' इत्यनेन वाक्यप्रारम्भे एव समीचीनतया उपपद्यते, न तु 'किं च' इत्यनेन प्रारम्भे। 'किं च' इत्यत्र यः 'च'शब्दः तेन सह 'अपि च' इत्यत्रत्यः यश्चकारः, तस्य सादृश्यमूलिकां भ्रान्तिं हृदि कृत्वा क–ख–घ–पुस्तकशाखाभूते *ङ–पुस्तके एकपङ्क्तिपरिमितस्यास्य ग्रन्थस्य त्रुटेः सम्भावना तु सुशका एव।

अतः एवं समुदितं कारणकलापं सुविमृश्य 'किं च' इत्यनन्तरम् 'अपि च' इत्येतावत्पर्यन्तं यो ग्रन्थ उपलभ्यते स मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति विभावयामः।

४४.७ ग० आर्धादभावस्य सिद्धत्वात्। कार्यासिद्धत्वपक्षे पं. २०.
क०ख०घ० अथास्य सिद्धत्वपक्षे ....

अत्र ग–पुस्तके 'अथास्य सिद्धत्वपक्षे' इत्यस्य स्थाने 'आर्धादभावस्य सिद्ध-त्वात्। कार्यासिद्धत्वपक्षे' इति ग्रन्थ उपलभ्यते। स एव स्वीकर्तुम् आवश्यकः। अन्यथा मूलग्रन्थसङ्गतिरेव नोपपद्यते। *ङ–पुस्तकेन तु अनवधानादयमंशः परित्यक्तः, इति क–ख–घ–पुस्तकेषु इयं त्रुटिरेव अनुवृत्ता इति स्वीकर्तव्यमेव।

अस्मिन् कर्मणि *भावप्रकाश*काराणां पायगुण्डे-वैद्यनाथानामपि साहाय्यं लभ्यते, इति ग–पुस्तकपाठ एव मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति विभावयामः।

४४.८ क०ख०घ० 'सुश्लोका३इति' इत्यादौ .... पं. २२
ग० 'अग्नी३ इति' इत्यादौ ....

अत्र ग–पुस्तके 'अग्नी३ इति' इत्यादौ इति पाठ उपलभ्यते। तत्र निपुणं

विचार्यापि मूलग्रन्थः कः इत्यस्माभिर्निर्णेतुं न पारितम् । परं क–ख–घ–पुस्तकेषु तु ‘ अग्नी३ इति ’ पाठं निरस्य ‘ सु-श्लोका३ इति ’ पाठ एव स्वीकृतः इति दृश्यते । अतः क–ख–घ–पुस्तक-लेखनिकैः ‘ अग्नी३ इति ’ पाठोऽपि ज्ञातः आसीत्, इति स्पष्टं वक्तुं शक्यते ।

४५.१ ग. तथा च अन्तरङ्गस्यापि....वैयर्थ्यम् । तथा च ‘ औजढत् ’ पं. ४-५
क.ख.घ. तथा च ‘ औजढत् ’ ....

ग-पुस्तके अत्र ‘ तथा च ’ इत्यनन्तरम् “ अन्तरङ्गस्यापि निषेधे आदेशेऽपि प्लुतः श्रूयेत । ‘ अप्लुतवत् ’ इत्यादीनां वैयर्थ्यम् । तथा च ‘ ईदूदेत् द्विवचनं प्रगृह्यम् ’ इति प्रगृह्यसंज्ञानापत्तिस्तु परत्वात् । तथाच औजढत् ” इत्येवंरूपो ग्रन्थो दृश्यते । क–ख–घ–पुस्तकेषु त्वस्य ग्रन्थस्य त्रुटिरेव । तत्रेदं विचार्यते :—

‘ तथा च ’ इति वर्णानुपूर्वीसादृश्यात् भ्रान्त्या अनवधानात् वा तैरेवाक्षरैः प्रारभ्यमाणं वाक्यद्वयं *इ–पुस्तकलेखनिकेन परित्यक्तम् । तदेव च यथायथम् *उ–*ऊ–पुस्तकलेखनिकैः, तदेव च क–ख–घ–पुस्तकलेखनिकैः अनुसृतम् इति वक्तुं शक्यम् । अतः अयं ग–पुस्तकपाठ एव मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति विभावयामः ।

४५.५ ग. किञ्च लून्युः....दोषः स्पष्टः । न चैवमूर्णुधातौ....पं. ७-८.
क.ख.घ. न चैवमूर्णुधातौ ....

ग–पुस्तके अत्र ‘ न चैवमूर्णुधातौ ’ इत्यस्मात् पूर्वम् ‘ किं च लून्युः, पक्न्युः, क्षाम्युः, गोमान्, इत्यादौ निषेधप्रवृत्तावप्रवृत्तौ च दोषः स्पष्टः । ’ इत्यधिको ग्रन्थ उपलभ्यते । क–ख–घ–पुस्तकेषु तु त्रुटिरेवास्य एकपङ्क्तिपरिमितस्य ग्रन्थस्येति स्पष्टम् । तत्रेदं विचार्यते :—

पूर्ववाक्यस्य तथा उत्तरवाक्यस्यापि ‘न’कारेण प्रारब्धत्वात् मध्ये विद्यमानं वाक्यम् *इ–पुस्तकलेखनिकस्य अनवधानात् त्रुटितम् । तदेव च यथायथम् *उ–*ऊ–पुस्तकलेखनिकैः ततश्च क–ख–घ–पुस्तकलेखनिकैः अनुसृतम् इति विद्यतेऽत्र त्रिष्वपि क–ख–घ–पुस्तकेषु अस्य ग्रन्थस्य त्रुटिः ।

‘ न हि रजतभ्रमप्रयुक्ता प्रवृत्तिः ....’ इति शास्त्रान्तरीयसिद्धान्तस्य उपोद्बलकत्वेन अस्य वाक्यस्य (ग–पाठस्य) आवश्यकता तु वर्तते एव । अतः प्रकरणादिपर्यालोचनेन सुसम्बद्धमेवेदं वाक्यम् । किन्तु ‘ नहि रजतभ्रमप्रयुक्ता ’ इत्यादिशास्त्रान्तरीयसिद्धान्तानुसारम् अस्मिन् शास्त्रे तथा कल्पयितुं नात्यावश्यकम्,

इतीमामरुचिं मनसि निधाय स्वशास्त्रीयप्रक्रियादृष्ट्यापि विशिष्टरूपाद्यसिद्धिं प्रदर्शयितुमाह :—' किञ्चेति '।

एवं समुदितं कारणकलापं दृष्ट्वा ग–पुस्तकपाठ एव मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति विभावयामः।

४६.१ क.ख.घ. ' परं घ्नन्ति ' .... पं. ६

ग. ' .... घ्नन्ति ' ....

अत्र ग–पुस्तके ' परम् ' इति नास्ति। सा तु त्रुटिरेव इति कल्पयितुं योग्यम्।

किन्तु अत्र ' परम् ' इति शब्दात् प्राक् ख–ग–घ–पुस्तकेषु ' केवलनासिक्यत्वपरेण यमानुस्वाराणामेवेति मुखनासिकेतिसूत्रस्थ*भाष्येण*' इति ग्रन्थः उपलभ्यते। स च मूलग्रन्थत्वेनैव स्वीकार्यः, इत्यत्र नास्ति शङ्कालेशोऽपि। अर्थानुसन्धानेन भिन्नपरम्परागतपुस्तकत्रयेऽस्य उपलब्धेः चिकित्साशास्त्रीयमर्यादया च अस्य ग्रन्थस्यात्र नितान्तमावश्यकत्वात्। क–पुस्तकलेखनिकेन तु पूर्वस्मिन् वाक्ये वर्तमानेन 'हयवरट्' इति सूत्रस्थ*भाष्येण* (पृ. ४६ पं. ५-६) इत्यत्रत्य'सूत्रस्थ*भाष्येण* ' इति प्रयोगस्य अस्मिन् वाक्ये वर्तमानेन ' सूत्रस्थ*भाष्येण* ' इत्यनेन अक्षरसमुदायेन सह सादृश्यात् भ्रान्त्या, अनवधानेन वा इदं वाक्यं परित्यज्य ' परं घ्नन्ति ' इत्यतः प्रारम्भः कृतः, इति स्पष्टं वक्तुं शक्यते। अतः क–पुस्तकस्य इयं त्रुटिरेव इति विभावयामः।

४८.१ क.ख.घ. **प्रथमान्तेनेति** । .... पं. ५

ग. परिनिष्ठितविभक्त्या .... (अधिकः ग्रन्थः)

अत्र ' प्रथमान्तेन ' इति प्रतीकात् प्राक् ग–पुस्तके " परिनिष्ठितविभक्त्या समासः ' इति पक्षे वर्णपदसमभिव्याहारे ' समानाधिकरणेन ' इति षष्ठीसमासनिषेधाभावः, विशेषणसमासप्रवृत्तिर्वा, इत्यवश्यमभ्युपगन्तव्यम्। अवर्णस्येति *भाष्या*दिप्रयोगात्। " इति ग्रन्थः उपलभ्यते। अयं न हरिदीक्षितग्रन्थः किन्तु केनापि लिखिता इयं टिप्पणी इत्यस्माकं मतम्। तत्र च कारणानिः–

(१) ' परिनिष्ठितविभक्त्या समासः ' इति पक्षस्वीकारे दोषोद्भावनरूपामरुचिम् उद्भावयितुम् अयं ग्रन्थः प्रवृत्तः, इति तु स्पष्टम्। तत्र मूलग्रन्थे प्रथमतः ' प्रथमान्तेन ' इति हेतूपन्यासात् तदनन्तरं च 'परिनिष्ठितविभक्त्या वा' इति हेत्वन्तरोपन्यसनेन ' परिनिष्ठितविभक्त्या समासः ' इति पक्षे दोषोद्भावनरूपारुचिप्रदर्शनम् अयोग्यम्, लेखनशैलीविरुद्धं च। यदि तत्र आग्रहः एव ग्रन्थकर्तुरभविष्यत् तर्हि हरिदीक्षिताः प्रथममेव परिनिष्ठितेति प्रतीकमादाय स्वमतमुदधरिष्यन्।

(२) 'प्रथमान्तेनेति' इति प्रतीकविवरणसमाप्त्यनन्तरमेव 'वस्तुतस्तु' (पृ. ४८ पं. १४) इत्येतदारभ्य 'परिनिष्ठितेति' प्रतीकान्तं (पृ. ४८ पं. १८) यावत् 'परिनिष्ठितविभक्त्या समासः' इति पक्षस्यैव समर्थितत्वात्।

(३) 'प्रथमान्तेन समासः' इति पक्षे यत् किल दोषोद्भावनं तस्यापि अत्रैव सन्दर्भे 'वस्तुतस्तु' इत्यनन्तरं, 'परिनिष्ठितेति' प्रतीकात् पूर्वं च प्रकरणसङ्गतिदृष्ट्या प्रतिपादनस्यावश्यकत्वात्।

(४) किञ्च अरुच्युत्पादनप्रसङ्गे सर्वत्र प्रतीकोद्धारात् प्राक् 'अत आह' इत्येतादृशग्रन्थस्यावश्यकत्वेन निर्देशात्, अत्र चोदाहरणे तदभावात्।

एवं च सर्वमेनं कारणकलापं दृष्ट्वा अत्रस्थः ग–पुस्तकग्रन्थः न हरिदीक्षितानां शब्दरत्नान्तर्गतो ग्रन्थः, किन्तु 'प्रथमान्तेन समासः' इति पक्षस्य उपोद्घलकत्वरूपेण केनापि पाठकेन सम्पादकेन वा लिखिता इयं टिप्पणी, इति कल्पयितुं योग्यम्, इति विभावयामः।

ग. पदसंस्कारपक्ष [मादाय .... वाक्य संस्कार] पक्षे ....पं. १४-१६

४८·२ क·ख·घ· पदसंस्कारपक्ष .... पं. १४

[ ] एतच्चिह्नान्तर्गतः मूलग्रन्थः क–ख–घ–पुस्तकानां मूलभूते *इ–पुस्तके त्रुटितः, तदेव चानुसृतम् *उ–*ऊ–पुस्तकलेखनिकाभ्याम् तदेव च यथायथं क–ख–घ–पुस्तकलेखनिकैरनुसृतम्। अत्र कारणं तु 'पदसंस्कारपक्ष' (पृ. ४८ पं. १४) इत्यत्रत्यपक्षशब्देन संस्कारशब्देन वा सह 'वाक्यसंस्कारपक्षे' (पृ. ४८ पं. १६) इत्यत्रत्यपक्षशब्देन संस्कारशब्देन वा सह सादृश्यमूलिका भ्रान्तिरेवेति विभावयामः।

५३.४ ग· गम्लृप्रभृतीनाम् लृदिताम् .... पं. १७.

क·ख·घ· गम्लृप्रभृतीनाम् लृदितानाम् ....

अत्रत्यः क–ख–घ–पुस्तकैः स्वीकृतः 'लृदितानाम्' इति पाठस्तु सर्वात्मना अशुद्ध एव। इयमशुद्धिस्तु कथं सञ्जाता, इति विषये इत्थं प्रतीयते :—

अत्र कल्पितेन *इ–पुस्तकेन 'लृदितातां' इत्येवम्प्रकारेण अनवधानात् 'तां' द्विवारं लिखितः। तदनन्तरं *इ–पुस्तकतः *उ–*ऊ–पुस्तकलेखनसमये '°तातां' इति सर्वात्मना अशुद्धं परिकल्प्य अन्त्यस्य 'तां' इत्यस्य स्थाने 'नां' इति सम्पादितं सम्पादकमहोदयैः। अत एव कारणात् ग–पुस्तकस्वीकृतपाठः मूलग्रन्थत्वेन स्वीकार्यः इति विभावयामः।

५४.१ ग· अतिदेशेन .... पं. ४.

क·ख·घ· अनिर्देशेन ....

ग–पुस्तकस्वीकृतः 'अतिदेशेन' इति पाठ एव अस्माभिर्मूलग्रन्थत्वेन स्वीकृतः। 'अनिर्देशेन' इति पुस्तकत्रयस्वीकृतेऽपि पाठे अर्थासङ्गतिरेव। *इ–पुस्तकलेखनिकेन तु सहजलेखनदोषात् तकारस्थाने नकारः स्थापितः। तादृशवर्णपरिवर्तनं तु बहुत्रोपलभ्यते। ततश्च *इ–पुस्तकतः *उ–*ऊ–पुस्तकलेखनसमये अशुद्धिपरिमार्जनार्थं 'दे'कारोपरि रेफः लिखितः। स एव च क–ख–घ–पुस्तकलेखनसमयेऽप्यनुवृत्तः, इत्येतदशुद्धं सर्वत्रोपलभ्यते, इति।

५४.२　क·ख·घ·　'इह मुण्डो भव' .... पं. ९.
　　ग·　......................

अत्र तु ग–पुस्तकलेखनिकेन एकं पत्रं न लिखितम्, इति कल्पयितुं शक्यते। एतावतो ग्रन्थस्य प्रक्षिप्तस्वरूपेण स्वीकरणस्य सर्वात्मना असम्भवात्। किञ्चास्य अत्र सर्वथा उपयुक्तत्वात्। किञ्च 'स्पष्टीकृतं च पितामहचरणैः' इत्यादिना अस्य ग्रन्थस्य हरिदीक्षितकर्तृकत्वेन सुग्राह्यत्वात्।

५६.१　क·घ·　हकारघकारयोरिवाकारघकारयोः　पं. ४-५.
　　ख·ग·　हकारयोरिवाकारयोः ....

अत्र 'हकार–घकारयोरिवाकार–घकारयोः' इति क–घ–पुस्तकपाठ एव मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति प्रतिभाति। 'ह–प्रयत्नबोधकवाक्ये ग्राहकसूत्रेण आकारस्यापि ग्रहणात्' इति हेत्वनुरोधेन ग–पुस्तकपाठस्योपेक्षणीयत्वात्।

५६.३　ग·　[1][यत्तु राम........] पं. ९–१२.
　　क·ख·घ·　ग्रन्थत्रुटिः ....

[ ] अयं ग्रन्थः क–ख–घ–पुस्तकैः कथं परित्यक्तः, इति यद्यपि नैश्चित्येन वक्तुं न शक्यते; अथापि इयमस्ति सम्भावनाः—

[ ] अयं ग्रन्थः पङ्क्तित्रयपरिमितो दृश्यते। पङ्क्तौ यस्मिन् स्थले 'स्पष्टश्चाष्य' इति ग्रन्थः उपलभ्यते, तस्यैवाधस्तात् पङ्क्तित्रयानन्तरम् तस्मिन्नेव स्थले 'भाष्ये स्थितमिति' इति प्रतीकं लिखितं दृश्यते। दृश्यते च इयं पद्धतिः, यत् कारणवशात् स्थगितलेखनानन्तरं पुनः प्रारम्भः कर्तव्यश्चेत् तर्हि किमपि प्रतीकमाश्रित्यैव पुनरारम्भः क्रियते इति। (उदाहरणार्थं द्रष्टव्यम्: पृ. ६२.३.) अतः *इ–पुस्तकलेखनिकेन कारणवशात् परित्यक्तं यत् लेखनम्, तस्य प्रारम्भसमये इदं पङ्क्तित्रयं परित्यज्य नवीनं लेखनं 'भाष्ये स्थितमिति' इति प्रतीकमाश्रित्यैव

प्रारब्धम् । तदेव च क–ख–घ–पुस्तकलेखनिकैः यथायथमनुसृतम्, इति विभावयितुं युक्तम् ।

६०.१ शब्दरत्नस्वीकृतः .... याः पश्यति .... पं. ४
प्रकाशितपाठः .... याः पश्यसि ....

मुद्रितेषु सर्वेष्वपि *प्रौढमनोरमा*-पुस्तकेषु ' पश्यसि ' इत्येव पाठो यद्यपि दृश्यते, अथापि *शब्दरत्नस्य* सर्वेष्वपि पुस्तकेषु ' पश्यति ' इत्येव प्रतीकरूपेण पाठ उपलभ्यते। अतः अत्र हरिदीक्षितमतानुसारं तु 'पश्यति' इत्येव पाठः स्वीकर्तव्यो भवति । यत्र ग्रन्थे अधस्तात् टीका दीयते, तत्र तट्टीकानुसारमेव उपरिष्टात् ग्रन्थ आवश्यकः, इति चिकित्साशास्त्रीयमूलभूततत्त्वानुसारमपि अत्र 'पश्यति' इत्येव मूलग्रन्थः अपेक्ष्यते ।

६०.३ ग· पशुषः .... पं. १३.
क·ख·घ· पपुषः ....

क–ख–घ–पुस्तकस्वीकृतः ' पपुषः ' इति पाठस्तु सर्वथा अयोग्य एव । अत्रैव लघुशब्दरत्ने *महाभाष्ये*ऽङ्गाधिकारे च (६.४.२२ वा ११) ' पशुषः ' इति प्रयोगस्योपलभ्यमानत्वात् । किञ्च *लघुशब्दरत्ने* "पशुं सनोति, इति विट् । 'विड्वनोः' इत्यात्वम् " इति व्युत्पत्तिप्रदर्शनाच्च ।

६१.१ ग· सावकाशत्वात् । अकच्प्रवृत्त्या चारितार्थ्याच्च । पं. ४.
क·ख·घ· सावकाशत्वात् । ....

अत्र ग–पुस्तके ' सावकाशत्वात् ' इत्यनन्तरम् ' अकच्प्रवृत्त्या चारितार्थ्याच्च ।' इत्यधिको ग्रन्थ उपलभ्यते । प्रायः ' एकबद्धमबद्धं भवति, द्विर्बद्धं सुबद्धं भवति ' इति न्यायमाश्रित्य हेत्वन्तरोपन्यासस्य ग्रन्थकारशैल्यनुगुणत्वात्, हरिदीक्षितलेखनशैल्या अपि बहुत्र तथैव अनुभवात् । किञ्च शास्त्रीयप्रक्रियासु सावकाशत्वरूपहेतूपन्यासानन्तरम् ' चारितार्थ्याच्च ' इत्येतादृगाकारेण हेतूपन्यासस्य दर्शनात् तेनैव रूपेणात्रापि हेतूपन्यासनसम्भवः इति ग–पुस्तकपाठ एवात्र मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति विभावयामः ।

६२·३ ग· माधवग्रन्थे च । उपसर्गाः क्रियायोगे .... पं. २१
क·ख·घ· माधवग्रन्थे च ।

अत्र ' माधवग्रन्थे च । ' इत्यतः अनन्तरम् ' **उपसर्गाः क्रियायोगे** । वक्ष्यमाणप्रकरणसाहचर्यात् क्रिया चात्र धातूपस्थाप्यैव गृह्यते । ध्वनितं चेदम् ' उपसर्गादृति ' इत्यादावाकरग्रन्थे । ' इति ग–पुस्तके अधिकः पाठ उपलभ्यते । प्रकरणादिना

हरिदीक्षितग्रन्थलेखनशैल्यनुरोधेन चायं मूलग्रन्थ एव प्रतिभाति । अतः *इ–पुस्तके एव अनवधानात् अयं ग्रन्थत्रुटितः, इति स्वीकर्तव्यम् ।

तत्र च कारणं तु पुनः लेखनसमये नवीनं प्रतीकमाश्रित्य लेखनं प्रारब्धव्यम् इति यः सङ्केतः, तदनुसारं पुनर्लेखनप्रारम्भसमये *इ–पुस्तकलेखनिकेन ' **उपसर्गाः क्रियायोगे** ' इति प्रतीकं परित्यज्य ' **निर्देशादिति** ' इति प्रतीकमाश्रित्यैव प्रारम्भः कृतः, इति कल्पयितुं योग्यम् । (उदाहरणार्थम् : पृ. ५६ पं. ९ द्रष्टव्यम् ।) तदेव *उ–*ऊ–पुस्तकाभ्याम्, तथैव च क–ख–घ–पुस्तकैः यथायथमनुसृतम्, इति विभावयामः ।

६३.१ क·ख·घ· न च ' अनिष्ठायाम् ' .... पं. १२
ग· अधिको ग्रन्थः ।

अत्र ग–पुस्तके " न च अनिष्ठायाम् " इत्यतः प्राक् "निसि उपसर्गे, 'कुष्'-धातोः सेट्कत्वात् निष्ठायामिडागमे यथान्यासेऽपि समानम् । " इति ग्रन्थ उपलभ्यते। निपुणं निरीक्ष्यमाणे पूर्वस्मिन् वाक्ये केनापि लिखिता टिप्पणी इति प्रतिभाति। अतः अयं प्रक्षिप्तग्रन्थः, इति वक्तुं योग्यम् । पूर्ववाक्योपोद्बलकत्वेन अस्य ग्रन्थस्य योजयितुं दुर्घटत्वात् ।

६३.२ क·ख·घ· अस्मिन्नर्थे मानम्। .... पं. १९.
ग· (अधिको ग्रन्थः)

अत्र ग–पुस्तके ' मानम्। ' इत्यनन्तरम् ' अत्र पाठस्तु विकल्पानुवृत्त्या चरितार्थः। ' इत्यादिको ग्रन्थः उपलभ्यते। अस्य वाक्यस्य तु टिप्पणीग्रन्थत्वेनैव सम्भावना कर्तव्या इत्यस्माकं मतम्। पूर्वोत्तरवाक्ययोरसम्बद्धत्वात्। उत्तरवाक्ये वर्तमानेन ' अत एव ' इत्यनेन सह त्वस्य कोऽपि सम्बन्धो नैव उपपद्यते। प्रत्युत ' अस्मिन्नर्थे मानम् ' इति वाक्येन सहैतत् सुसम्बद्धम्। अतः एतत्प्रकरणान्तपाठविकल्पचर्चामधिकृत्य केनापि लिखिता इयं टिप्पणी, इति कल्पयितुं युक्तम् इति विभावयामः ।

६४.१ ग· लत्वापत्तेः। उपसर्ग° .... दोषः। पं. १०.
क·ख·घ· लत्वापत्तेः। (ग्रन्थत्रुटिः)

अत्र....लत्वापत्तेः इति ग्रन्थानन्तरं ग–पुस्तके " उपसर्गग्रहणे तु ' यत्क्रियायुक्ताः प्रादयः ' इति नियमप्रवृत्त्या न दोषः " इत्यधिको ग्रन्थः उपलभ्यते। अत्र सन्दर्भानुरोधेनास्यात्यन्तावश्यकतया अयं ग–ग्रन्थः एव मूलग्रन्थत्वेन स्वीकर्तव्यः, इति प्रतिभाति। एवं च *इ–पुस्तके एवास्य त्रुटिः समुद्भावनीया तत्पुस्तकलेखनिकस्यान-

बधानेन ततश्च *उ–*ऊ–पुस्तकाभ्यामपि तदेवानुसृतम्; ततश्च क–ख–घ–पुस्तकैरपि तदेवानुसृतम्, इति वयं कल्पयामः।

६४.२ ग॰ श्रुतत्वाच्च। उपसर्ग॰ .... सत्त्वेन च .... पं. ९.
क॰ख॰घ॰ श्रुतत्वाच्च। (ग्रन्थत्रुटिः) ....

अत्र ग–पुस्तके 'उपसर्गक्रियांशे उत्थिताकाङ्क्षायाः सत्त्वेन च' इत्ययं पाठः उपलभ्यते। तत्रेदं विचार्यते :— क–ख–घ–पुस्तकमूलभूत–*इ–पुस्तके एव '॰धेन' इति शब्दस्य 'सत्त्वेन' इत्यत्रत्य'॰त्त्वेन' शब्देन सह भ्रान्त्या त्रुटिरित्यभ्युपगन्तव्यम्। सैव च त्रुटिर्यथायथम् *उ–*ऊ–पुस्तकाभ्याम्, ततश्च क–ख–घ–पुस्तकैरनुवृत्ता इति स्पष्टं दृश्यते।

किञ्च 'श्रुतत्वाच्च' इत्यत्र 'उत्थिताङ्क्षायाः सत्त्वेन' इति हेतूपादानस्यैव आवश्यकता वर्तते। 'बहुलक्ष्यसंस्कारानुरोधेन' इति हेतुः श्रुतत्वं प्रति नैव सम्भवति, किन्तु उपसर्गक्रियांशे आकाङ्क्षोत्थापनार्थमेव तस्य हेतुत्वोपादानमत्र अत्यन्तमावश्यकम्। अतः 'उपसर्गक्रियांशे उत्थिताकाङ्क्षायाः सत्त्वेन च' इति ग–पाठः मूलग्रन्थत्वेनैव स्वीकर्तुम् आवश्यकः, इति विभावयामः।

६४.३ ग॰ 'यमां यमि' .... पं. १५.
क॰ख॰घ॰ 'जमां जमि' ....

अत्र त्रिष्वपि क–ख–घ–पुस्तकेषु 'जमां जमि' इति ग्रन्थ उपलभ्यते। स न पाठभेदः। किन्तु सर्वात्मना अशुद्ध एव ग्रन्थः। सर्वात्मना निर्विवादम् अशुद्धानां ग्रन्थानां पाठभेदत्वेनोद्धरणं नैव क्रियते। अत्र एतदुद्धरणे तु हेतुद्वयं वर्तते :—

(१) क–ख–घ–पुस्तकानां ये कल्पिते मूलपुस्तके *उ–*ऊ–पुस्तके, तयोश्च यत् कल्पितम् एकं शाखापुस्तकम् *इ–पुस्तकम् तस्य दार्ढ्यार्थम् अस्य अशुद्धस्योद्धरणमत्र। एतादृशि च बहून्यशुद्धानि अत्रोपलभ्यन्ते, तद्द्वारा च कल्पितस्य शाखारूपस्य *इ–पुस्तकस्य सुतरां निश्चयो भवति।

(२) 'जमां जमि' इत्यत्र जकारद्वयस्थानेऽपि यकार एवापेक्ष्यते, इति तु स्पष्टमेव। अथापि तत्र सर्वत्र जकार एवोपलभ्यते। एवं च सर्वापीयम् *इ–पुस्तकपरम्परा औत्तरपण्डितानाम्, लेखनिकाश्च औत्तराः, इति स्पष्टं वक्तुं शक्यते।

६५.१ क॰ख॰घ॰ बीजम्। .... पं. ७
ग॰ बीजम्। (अधिको ग्रन्थः) ....

अत्र 'बीजम्।' इत्यनन्तरम् 'किञ्चित् कचित्फलासम्भवेऽपि सर्वत्र तद्-

कल्पनमन्याय्यम्' इति ग्रन्थः ग-पुस्तकेऽधिक उपलभ्यते। अयं ग्रन्थस्तु न पाठभेद-रूपेण स्वीकर्तुं शक्यः। किन्तु टिप्पणीरूप एव। यतो हि पूर्ववाक्येऽस्य साक्षात् सम्बन्धो नैवोपपादयितुं शक्यते। किञ्च 'बीजम्।' इति परिच्छेदान्तबीजशब्दानन्तरं 'नापीदम्' इत्येतादृङ्नवीनपरिच्छेदप्रारम्भस्यैवौचित्यात्।

६५.२ तद् विना .... पं. १७
तं विना ....

अत्र क-ख-घ-पुस्तकेषु 'तं विना' इत्येवोपलभ्यते। तथापि प्रकरणानुरोधेन तद्-शब्दस्य 'ज्ञानम्' इत्यत्र सम्बन्धेन नपुंसकत्वमपेक्ष्यते एव। अत एव ग-पुस्तकस्थः पाठोऽस्माभिर्मूलग्रन्थत्वेन स्वीकृतः। अर्थात् अत्रापि क-ख-घ-पुस्तकेषु या त्रुटिर्दृश्यते, सा तु *ङ-पुस्तकपरम्परात एव सम्प्राप्ता, इति स्पष्टमनुमातुं शक्यते।

६६.४ पिण्ड एव .... पं. १०

अत्रत्यः 'पिण्ड एव हि' इति श्लोकार्धः *वाक्यपदीये* नोपलभ्यते। तत् कथं हरिदीक्षितैरस्य *वाक्यपदीय*त्वेनोद्धरणं कृतम्, इत्यत्र विचार्यते:—

शब्दकौस्तुभे प्रथमेऽह्निके एव

यत्संज्ञास्मरणं तत्र न तदप्यन्यहेतुकम्।
पिण्ड एव हि दृष्टः सन् संज्ञां स्मारयितुं क्षमः ॥

इति श्लोको दृश्यते। एतच्छ्लोकात् प्राक् च 'आह च' इत्यारभ्य 'न सोऽस्ति प्रत्ययः' इति 'ग्राह्यत्वं ग्राहकत्वं च' इत्येवं श्लोकद्वयं वर्तते। (एतच्छ्लोकद्वयं *वाक्यपदीये* वर्तते) तदनन्तरं च इतिकरणं वर्तते। ततोऽनन्तरं च प्रकृतश्लोकः। तदनन्तरं च 'इति च' इति पृथक् इतिकरणम्, समुच्चायकश्चकारश्च। एवं च पृथक् इतिकरणेन समुच्चयार्थकचकारेण च एतत् स्पष्टं भवति यद् अयं तृतीयः श्लोकः पूर्वस्मात् श्लोकद्वयात् भिन्नस्थले उपलभ्यमानो भवति। परम् *शब्दरत्नकारैः* हरिदीक्षितैस्तावत् अनवधानात् पूर्वश्लोकद्वयवत् अयं तृतीयोऽपि श्लोकः *वाक्यपदीया*देवोद्धृतः, इति चिन्तयित्वा अत्र च तच्छ्लोकार्धं दत्त्वा तदनन्तरमुक्तम्: 'इति *वाक्यपदीयोक्त*-रीत्या' इति। अतः अस्य श्लोकार्धस्य *वाक्यपदीयान्त*र्गतत्वेन कल्पने हरिदीक्षितानामेव अनवधानं कारणम्; इति वक्तुं सुशकम्।

किञ्च अत्र श्लोके 'सत्संज्ञाम्' इत्यत्र तकारः दृष्टः। परन्तु *शब्दकौस्तुभ*-पाठानुसारम् अर्थदृष्ट्या च 'सत्' इत्यस्य स्थाने 'सन्' इत्येव पाठः आवश्यकः, शक्यः स्वीकर्तुं च इति प्रतिभाति।

६७.१ ग. परिभाषानिरपेक्ष° .... पं. १९–२१.

क.ख.ग. (ग्रन्थत्रुटिः) ....

अत्र ग–पुस्तके ' निरूपयिष्यामः ' इति शब्दप्रयोगात् ग्रन्थकर्तुरेवायमंशः *इ–पुस्तकलेखनिकेनानवधानात् परित्यक्तः, इति कल्पयितुं शक्यते। अतः अयं ग्रन्थः पुस्तकत्रयपरित्यक्तोऽपि मूलग्रन्थत्वेन निःसन्दिग्धं स्वीकर्तव्यः, इति विभावयामः।

७०.१ ख.ग. तेन–यमुद्दिश्य मिद्विहितस्तदवयत्वे तेन, अन्त्याचो.... पं.१०

क.घ. तेन–यमुद्दिश्य मिद्विहितः, तदवयवत्वेन; तेन–अन्त्याचो ...

अत्र पाठद्वयस्यापि अर्थदृष्टया सुसङ्गत्या, भिन्नपाठपरम्पराबलमाश्रित्य ख–ग–पाठः समाश्रितः। असति बाधके भिन्नपाठपरम्पराबलमेव आश्रयितुं युक्तम्। ग्रन्थस्वारस्यमपि अस्मिन्नेव पाठे भवति, इति त्वन्यदेतत्।

७३.२ क. तत्र अनुनासिकस्य .... पं. १२

ख.ग.घ. तत्तु ....

निपुणं निरीक्ष्यापि प्रथमं ख–ग–घ–पुस्तकस्थः ' तत्तु ' इति पाठः अस्माभिः यथायथं सम्बन्धस्थापनापूर्वकं सार्थकतया न लापितः इति तु सत्यम्। अतः क–पुस्तकस्वीकृतः ' तत्र ' इति पाठः स्वीकृतः आसीत्। वस्तुतस्तु ' तत्तु ' इत्यस्य 'उपेक्ष्यम् '। (पं. १५) इत्यत्र दूरान्वयेन सम्बन्धस्यैव कर्तुम् आवश्यकत्वात् पुस्तकत्रयेण स्वीकृतः ' तत्तु ' अयमेव पाठः मूलग्रन्थत्वेन स्वीकार्यः, इति विभावयामः।

७८.१ क.ख.घ. दुर्वारमिति दिक्। .... पं. ८.

ग. (अधिको ग्रन्थः)

ग–पुस्तके अत्र " दुर्वारं ' तस्मिन्निति निर्दिष्टे पूर्वस्य ' ' तस्मादित्युत्तरस्य ' इति सूत्रद्वयविषयमिति दिक्। " इति अधिकः ग्रन्थ उपलभ्यते। स तु न पाठभेदः। किन्तु टिप्पणीस्वरूपः प्रक्षेप एव।

तत्र चैवं प्रतीयते :—*इ–पुस्तकलेखनिकेन ' वैपरीत्यं दुर्वारम् ' इत्यत्र कथं कुत्र च दुर्वारता, इत्येतत् स्पष्टीकर्तुम् ' तस्मिन्निति ' ' तस्मादिति 'सूत्रद्वयविषये वैपरीत्यं दुर्वारम्, इति उक्तम्। तदेव च ग–पुस्तकलेखनिकेन अनुसृतम्। अतः अयं टिप्पणीरूपः प्रक्षेप एव, न तु मूलग्रन्थः, इति विभावयामः।

७८.४ ग. ' शित्कल्पन°....कल्पनात्' शित्ग्रहणवैयर्थ्या° ....पं. १६.

क.ख.घ. शिद्ग्रहणवैयर्थ्या ....

अत्र ग–पुस्तके ' शित्कल्पनवत् शिद्ग्रहणाभावे शकारस्योपलक्षणतया

शकारसदृशोऽसंज्ञकानेकालसम्बन्धस्यापि कल्पनात्' इत्यधिको ग्रन्थ उपलभ्यते। अयं ग्रन्थः अर्थप्रकरणसङ्गत्या मूलग्रन्थत्वेनैव स्वीकर्तुं योग्यः, इति प्रतिभाति। ग्रन्थकार-लेखनशैल्यनुगुणतापि चात्र लभ्यते। अतः 'कल्पन'शब्दानुपूर्वीभ्रान्त्या 'शित्'-शब्दानुपूर्वीभ्रान्त्या च *इ–पुस्तके एकपङ्क्तिपरिमितस्यास्य ग्रन्थस्य त्रुटिः सम्भावयितुं शक्यते। तदेव च अनुसृतं परम्परातः क–ख–घ–पुस्तकलेखनिकैः।

७९.१–२ (शब्दरत्नस्वीकृतपाठः) शित्त्वस्यैवात्राभावात्। पं. १–२.
(सर्वत्रोपलभ्यमानः पाठः) शित्त्वस्यैवात्रालाभात्।

प्रायः मुद्रितेषु *प्रौढमनोरमा*–पुस्तकेषु 'अभावात्' इत्यस्य स्थाने 'अलाभात्' इति पाठो दृश्यते। परम् अत्र *शब्दरत्ने* तु 'अभावात्' इति प्रतीकं धृत्वा एव व्याख्यातो ग्रन्थः। अतः *शब्दरत्न*काराणां हरिदीक्षितानां मतेन तु 'अभावात्' इत्येव मूलग्रन्थः, इति स्पष्टं कल्पयितुं शक्यते। (द्रष्टव्यम्: ११४–१)

८५.६ ग. अस्य च्वौ .... पं. १४–१५
क.ख.घ. (ग्रन्थत्रुटिः) ....

अयं ग–पुस्तकस्थः एकपङ्क्तिपरिमितः, एकवाक्यात्मकः एव पाठः मूलग्रन्थत्वेनास्माभिः स्वीक्रियते। प्रकरणसङ्गत्यर्थम् अस्यात्रावश्यकत्वात्। *इ–पुस्तके तावत् पूर्ववाक्यस्थं 'गौरवाच्च' इति शब्दमालोक्य तत्रस्थेन 'च'कारेण सह 'उदित्सा-हचर्याच्च' इत्यत्रत्येन 'च'कारेण सह भ्रान्त्या अनवधानेन वा 'अस्य च्वौ' इत्यादावष्टादशबोधक-अ-शब्दे 'अणुदित्सूत्रस्य चारितार्थ्येन इगादिशब्दबोध्येऽप्रवृत्तेश्च, उदित्साहचर्याच्च।" इत्येकपङ्क्तिपरिमितं वाक्यं त्रुटितम्। तदेव च परम्परातः क–ख–घ–पुस्तकैरनुसृतम् इति कल्पयितुं युक्तम्। अन्यथा (एतत्पाठस्य मूलग्रन्थत्वेन स्वीकाराभावे) उत्तरवाक्यस्थ (पं. १६) शाब्दबोधविषयत्वस्य सङ्गतिरेव न युज्यते। तत्रस्थ-शाब्दबोधविषयत्वस्य स्वीकृतपाठस्थ–इगादिशब्दबोध्ये इत्यत्र समीचीनया रीत्यान्वयस्य वक्तुम् आवश्यकत्वाच्च।

९३.४ क.ग.घ. सत्त्वेन सिद्धिः। पं. ७
ख. सत्त्वे नासिद्धिः।

अत्र भिन्नपरम्परागतैः क–ग–घ–पुस्तकैः स्वीकृतः 'सत्त्वेन सिद्धिः' इति पाठ एव अस्माभिर्मूलग्रन्थत्वेन स्वीकृतः। स एव च युक्तः। 'सत्त्वे नासिद्धिः' इति ख–पुस्तकपाठोऽपि नाशुद्धः। तथापि 'द्वौ नञौ दार्ढ्यं गमयतः' इति न्यायानुसारं दार्ढ्यकरणार्थम् उपयुज्यमानस्य नकारद्वयस्य अत्र आवश्यकता नास्ति। लेखनिकस्य च तादृशलेखनस्वभावोऽपि नास्ति।

'सत्त्वेन असिद्धिः' इति तु सर्वात्मना अशुद्धमेव इति विभावयामः ।

९७.३ क.ग.घ. तदादायैव .... पं. ८

ख. तमादाय ....

अत्र क–ग–घ–पुस्तकैः स्वीकृतः 'तदादायैव' इत्येव पाठः मूलग्रन्थत्वेन स्वीकर्तुं योग्यः । सर्वनाम्नामुत्सर्गतः प्रकृतपरामर्शित्वात्, प्रधानपरामर्शित्वाच्च । भिन्नपरम्पराद्वयपाठबल्लाभाच्च ।

'हन्तित्व'शब्दस्य–'हन्ति' शब्दमाश्रित्य 'तमादाय' इति पाठलापने तु द्राविडप्राणायामः ।

९९.४ ग. विशेषणान्वयार्हा । .... पं. १२

क.ख.घ. विशेषणार्हा । ....

अत्र क–ख–घ–पुस्तकैः स्वीकृतोऽपि 'विशेषणार्हा' इति पाठो न सरसतयोपपन्नो भवति । पदार्थैकदेशत्वेनोपस्थितौ तत्र विशेषणत्वेन अन्वयो न भवति, इति प्रतिपादन एव अत्र तात्पर्यात् । अतः "न्वया" इति वर्णसमुदायः पुस्तकत्रयमूलभूत–*इ–पुस्तकलेखनिकेनैव अनवधानात् परित्यक्तः, इति कल्पयितुं युक्तम्; इति विभावयामः ।

१०५.३ ग. *भाष्य*कारवार्तिकाद्युक्तम् .... पं. ५

क.ख.घ. *भाष्य*काराद्युक्तम् ....

अत्र क–ख–घ–पुस्तकैः '*भाष्य*काराद्युक्तम्' इति *वार्तिक*शब्दरहितः पाठः स्वीक्रियते । तदपेक्षया ग–पुस्तकपाठः *वार्तिक*शब्दसहित एव समीचीनतरः । अव्यवहिततया पूर्वं निर्दिष्टस्य 'तद्वदतिदेशेऽकिद्विधिप्रसङ्गः' इति ग्रन्थस्य *वार्तिक*त्वात् । 'गाङ्कुटादिसूत्रे' इति सप्तमीनिर्देशेने तत्रत्य*वार्तिको*द्धारस्यैव प्रधान्येन, *भाष्य*निर्देशस्य च गौणत्वेनोपपादनस्यावश्यकत्वात् ।

अतः अत्र केवल-आदिशब्देन *वार्तिक*स्य सम्बन्धप्रदर्शनापेक्षया पृथक्कृतया साक्षात्तन्निर्देशस्यैव युक्ततरत्वात् । नैकोदाहरणसाम्यात् *इ–पुस्तकलेखनिकेन तद् अनवधानात् परित्यक्तम्, इति कल्पयितुं योग्यम्, इति भाति ।

१०७.१ क.ख.घ. अज्झलादेशे अजादेशो न .... पं. १०.

ग. अहलादेशे ....

(कल्पितपाठः) अज्झलादेशे ....

अत्र अशुद्धं पाठद्वयमुपलभ्यते। ग–पुस्तके अ-हलादेशे, इति; क–ख–घ–पुस्तकेषु तु अ-झलादेशे, इति। पाठद्वयेऽपि न कोऽप्यर्थः सम्भवति। अतः अशुद्धमिदम्। अयं तु लेखनिकानामेव प्रमादः।

तत्रैव कल्प्यते:—‘ अज्झलादेशेऽजादेशो न ’ इति। अच्-हल्-उभयस्थानिकः य आदेशः स अजादेशः न, इत्यत्रैव अस्य ग्रन्थस्य तात्पर्यात्। अतः अयमेव कल्पितपाठो मूलग्रन्थत्वेन स्वीकर्तुं योग्यः इति विभावयामः।

१०७.३ क.घ. स्थान्यादेशभाव° .... पं. १८.
ख.ग. स्थान्यादेशिभाव° ....

अत्र स्थान्यादेशिभाव° इति पाठो यद्यपि भिन्नपरम्पराद्वयलभ्यः, तथापि सः अशुद्ध एव। अतः एकपरम्परातः समागताभ्यां क–घ–पुस्तकाभ्यां स्वीकृतः स्थान्यादेश° इत्येव पाठः स्वीकर्तुं योग्यः, इति विभावयामः। ख–पुस्तकोपरि ग–पुस्तकप्रभावः क्वचित् दृश्यते, इत्यस्य एतदुदाहरणम्, इत्यपि वक्तुं शक्यम्।

११४.१ (शब्दरत्नस्वीकृतपाठः) पदान्तस्थाने विधौ .... पं. २.
(प्रायः सर्वत्रोपलभ्यमानपाठः) पदान्तस्य स्थाने विधौ ....

प्रायः सर्वत्र प्रकाशितेषु *प्रौढमनोरमा*पुस्तकेषु ‘ पदान्तस्य स्थाने ’ इति असमस्तः पाठ उपलभ्यते। अत्र *शब्दरत्ने* तु ‘ पदान्तस्थाने ’ इति समस्तं प्रतीकं गृहीत्वा तदनुसारं व्याख्यायते:—‘ पदान्तस्थानिकादेशप्रापकातिदेशः ’ इति। तदनुसारेण एवं कल्पयितुं शक्यते, यद् हरिदीक्षितैः *प्रौढमनोरमा*पुस्तके तावत् ‘ पदान्तस्थाने ’ इत्येव ग्रन्थो लब्ध आसीत्। परन्तु तदनन्तरं केनापि पाठकेन लेखनिकेन वा ‘ पदान्तस्य स्थाने ’ इत्यसमस्तः पाठः स्वीकृतः। अत्र कारणं तु एवं विभावयामः—

अस्मिन् प्रकरणे भट्टोजिदीक्षितैः *पदमञ्जरी*कारस्य हरदत्तस्य खण्डनं क्रियते। तत्र च *पदमञ्जर्यां* हरदत्तमिश्रेण एवं व्याख्यानं कृतम् उपलभ्यते :—“ कौ स्तः ’ इत्यादौ तु पदान्तस्य सतः कार्यभावादि, पदान्तस्य वावादेः विधानम्, इत्युभयथा सम्भवः। एवं यरेविधावपि। तथापि सर्वसङ्ग्रहाय भावसाधन एव विधिशब्दः। इति।”

अत्र यः प्रथमः पक्षो हरदत्तेनोपस्थापितः, तस्य खण्डनार्थं प्रवृत्ताः हरिदीक्षिताः। अस्मिन् प्रसङ्गे ‘पदान्तस्थाने’ इति सामासिकरूपेणोद्धरणापेक्षया ‘पदान्तस्य स्थाने ’ इति व्यस्तप्रयोगस्तत्रोचितः, इति मत्वा केनापि लेखनिकेन ‘पदान्तस्य स्थाने’ इति ग्रन्थो लिखितः। स एव च प्रायः सर्वैरपि *प्रौढमनोरमा*लेखनिकैरनुस्रियते, इति विभावयामः।

परं शब्दरत्नकारैः हरिदीक्षितैस्तु यत् *प्रौढमनोरमा*पुस्तकं लब्धमासीत्, तदेवा-स्यन्तं प्राचीनमिति कल्पनायां न कोऽपि दोषः अथवा असम्भावना।

किञ्च अधस्तात् विद्यमाने व्याख्याग्रन्थे अथवा टीकाग्रन्थे यदि चेत् कश्चन पाठः स्वीक्रियते, तर्हि स एव उपरिष्टात् मूलग्रन्थे स्वीकर्तव्यः पाठः इति सामान्यं तत्त्वम्। तदनुसारं चात्र टीकायां हरिदीक्षितैः 'पदान्तस्थाने' इति समस्त एव पाठ स्वीकृतः इति उपरिष्टादपि स एव स्वीकर्तुं योग्यः इति विभावयामः।

११५.२ क.ख.घ. सवर्णग्रहणवैयर्थ्यं च। पं. २

ग. °वैयर्थ्ये — (अधिको ग्रन्थः)....

अत्र ग–पुस्तके '°वैयर्थ्ये ओः– शम्भोः अश्वः। वश्वे, एषो वश्वः। एतीति यन्, इण्–धातोः शतरि रूपम्। एषो यन्।' इति अधिको ग्रन्थ उपलभ्यते।

अत्रेदं विचार्यते:—

अयं ग–पुस्तकपाठः टिप्पणीरूपेण प्रक्षिप्तो ज्ञातव्यः; न तु मूलग्रन्थपाठभेद-त्वेन, इत्यस्माकं मतम्। 'सवर्णग्रहणवैयर्थ्यं च' इति यत् मूले प्रतिपाद्यते, तत्र वैयर्थ्य-प्रतिपादनखण्डनार्थम् उदाहरणरूपेण 'एषो वश्वः' 'एषो यत्' इत्युदाहरणद्वयं मूलग्रन्थखण्डनपरतया केनापि विदुषा पत्रस्य पार्श्वभागे अथवा अत्रैव पङ्क्तिद्वयमध्ये लिखितम्। एतत्सर्वं च ग–पुस्तकस्य मूलशाखापुस्तकम् *ई पुस्तकम्, तत्रैवास्माभिः कल्प्यते। ततश्च *ई–पुस्तकतः ग–पुस्तकलेखनसमये तल्लेखनिकेन तावत् मूलग्रन्थ-मध्ये एव तद् अन्तर्भावितम्, इति विभावयामः।

११७.१ क.ख.घ. तिङन्ते निरूपयिष्यामः। पं. ५

ग. (कश्चन अधिको ग्रन्थः) – निरूपयिष्यामः। ....

अत्र ग–पुस्तके 'निरूपयिष्यामः' इति ग्रन्थात् प्राक् 'विश्वग्हिर्मृत .... इति ध्वनयन्नाह:–' इति ग्रन्थ उपलभ्यते, तदनन्तरं च 'निरूपयिष्यामः' इति। तत्रेदं प्रतीयते:—*प्रौढमनोरमायां* 'निरूपयिष्यामः' इति शब्द एव नास्ति। किन्तु शब्दरत्नस्थे 'निरूपयिष्यामः' इत्यस्मिन् शब्दे केनापि लिखिता टिप्पणी, न तु मूलग्रन्थः इति।

यदि तु अयं ग्रन्थः 'निरूपयिष्यामः' इत्यनन्तरम् 'अन्तर्वर्तिसुपा' इत्यस्य प्रतीकस्य इदम् अवतरणम्, इति कल्प्यते, तर्हि ग–पुस्तकलेखनिकेन अनवधानेन अयं ग्रन्थः 'निरूपयिष्यामः' इत्यस्मात् प्राक् लिखितः, इति कल्पयितुं शक्यमिति तु अन्यत्।

११७.३ (*शब्दरत्न*पाठः) णिचो लुप्तत्वात्। पं. २.

(प्रायः उपलभ्यमानः पाठः) णेर्लुप्तत्वात्।

प्रायः सर्वत्र मुद्रितेषु *प्रौढमनोरमा*-पुस्तकेषु यद्यपि 'णेर्लुप्तत्वात्' इति पाठो दृश्यते, अथापि अस्मिन् *शब्दरत्ने* 'णिचो लुप्तत्वात्' इति प्रतीकं धृत्वा व्याख्यानं कृतम्, अतः स एव पाठोऽस्माभिरत्रानुस्रियते मूले। हरिदीक्षितैर्लब्धं *प्रौढमनोरमा*-पुस्तकं सर्वात्मना प्रामाणिकं प्राचीनं च, इति विभावयितुं युक्तम्। (द्रष्टव्यम् ११४.१)

लघुशब्दरत्ने तावत् 'णेर्लुप्तत्वात्' इति प्रतीकं दृश्यते। अतस्तावत् अध्ययनाध्यापनपरम्परायां वर्तमानत्वात् स एव पाठः आदृतो मुद्रितेषु पुस्तकेषु इति कल्पयितुं योग्यम्।

१२०.२ क.ग.घ तत्फलं तु .... पं. ७.

ख. (अधिको ग्रन्थः) ....

अत्र ख–पुस्तके 'तन्निमित्तकुत्वादेश्च बाधात् लुप्ते णिच्यपि भ्रष्टावसरत्वान्न प्रवृत्तिः। अत एव ....' इति अधिको ग्रन्थ उपलभ्यते। परं तस्य अत्र कोऽपि सुतरां सम्बन्धो नास्ति। लेखनिकस्यानवधानेन पूर्वपत्रे (पृ. ११९ पं. ८-९) वर्तमानः ग्रन्थः अत्र लिखितः। अतः अत्र अयमशुद्ध एव ग्रन्थः, न तु पाठभेदः इत्यवधारणीयमिति।

१२०.९ देवताऽस्य .... पं. ९.

अत्र यद्यपि 'पञ्चेन्द्राण्यः अग्नाय्यश्च देवताऽस्य पञ्चेन्द्रः, पञ्चाग्निः' इति ग्रन्थः स्वीकृतः, तथापि 'पञ्च गार्ग्यायण्यो देवता अस्य, पञ्चगार्ग्यः' (पृ. १२० पं. १५) इत्युत्तरग्रन्थानुरोधेन अत्रापि बहुवचनस्वीकारस्यैवौचित्यम्। यद्यपि 'साऽस्य देवता' (४.२.२४ पा.) इत्यनेन 'देवता' इत्यत्र जातावेकवचनं स्वीकृत्य उपपादयितुं शक्यते अयं ग्रन्थः, तथापि उत्तरत्र बहुवचनसहितनिर्देशात् ग्रन्थकारलेखनस्वभावानुसारं च अत्रापि बहुवचनयुक्तनिर्देश एवोचितः, इति विभावयामः।

१२४.१ (*शब्दरत्न*पाठः) शिण्ढि, शिंषन्ति। पं. १

(*लघुशब्दरत्न*पाठः) शिण्ढि।

सवर्णानुस्वारयोः उदाहरणप्रदर्शनार्थम् 'शिण्ढि' इत्येकमेवोदाहरणं सर्वेष्वपि प्रकाशितेषु ग्रन्थेषु उपलभ्यते। तत्र कारणमापाततः एवं दृश्यतेः– एकेनैव 'शिण्ढि' इत्यनेन उदाहरणद्वयस्य कार्ये सम्पन्ने पुनः अनुस्वारस्य कृते अन्यत् 'शिंषन्ति' इत्युदाहरणं नापेक्ष्यते, इति।

स्यादेतत् । हरिदीक्षितास्तु १२७ पृष्ठे ' शिंषन्ति ' इति पृथक् प्रतीकं धृत्वा " न च बहिरङ्गपरिभाषया असिद्धत्वम् । ' यथोद्देश 'पक्षाश्रयणात् । " इति विवेचयन्ति । पायगुण्डे–वैद्यनाथमहोदया अपि अत्रत्यलघुशब्दरत्नव्याख्यायाम् *भावप्रकाशिकायाम्* " अत एव ' शिण्ढि ' ' शिंषन्ति ' इति मूले पाठः " इत्यादिग्रन्थेन ' शिंषन्ति ' इत्यस्य मूलग्रन्थत्वमेव समर्थयन्ति । अतः ' शिंषन्ति ' इत्येतत् पृथगुदाहरणं शब्दरत्नकाराणां हरिदीक्षितानां मतेन *प्रौढमनोरमा*ग्रन्थे अत्यन्तमावश्यकम् इति विभावयामः । (द्रष्टव्यम् : ११७-३)

*लघुशब्दरत्नकारै*स्तु तत् त्यक्तम्, इति वैद्यनाथपायगुण्डेकृतात् *भावप्रकाशिका*ग्रन्थात् ज्ञातुं शक्यते । *लघुशब्दरत्नकारैः* किमर्थं स ग्रन्थः परित्यक्तः; अनवधानात्, भ्रान्त्या, हेतुतो वा; इति तु न निश्चयेन वक्तुं पार्यते ।

१२५.३ क.ख.घ. किञ्च, ईदृशे विषये .... पं. २२ .

ग. (व्यत्यासबहुलो ग्रन्थः)....

अत्र ग–पुस्तके ' किञ्च ' इत्यनन्तरम् अग्रिमः प्रघट्टकः अनवधानेन स्वीकृतः इति कल्पयितुं योग्यम् । अत्रत्यं केवलम् ' अदो जग्धिः ' इत्येतत् सूत्रं च तत्र उद्धृतम्, इति ग–पुस्तकलेखनिकस्य अनवधानमूलिका त्रुटिः इयम् इति विभावयामः ।

१४८.३ ग. पुच्छादिकल्पनावत् .... पं. १८.

क.ख.घ. पुच्छादिकल्पना चेत् ....

अत्र क–ख–घ–पुस्तकैः 'कल्पना चेत्, इति पाठः स्वीक्रियते । अतः अत्र *इ–*ई–पुस्तकयोरेव लेखनपरम्परा भिद्यते इति वक्तुं योग्यम् । पूर्वमपि बहुत्र, विशेषतः च–वा–शब्दयोर्व्यत्यासो दृष्टः । कुत्रचित् उभयथाऽपि ग्रन्थः उपपादयितुं शक्यते । (द्रष्टव्यम् पृ. १३८–५) । अत्र तु न शक्यते तथा ग्रन्थः उपपादयितुम् । किञ्च ' चेत् ' इति क–ख–घ–पुस्तकेषूपलभ्यमानः पाठः अशुद्धः, लेखनिककृतदोषमूलश्चेति सर्वथा त्याज्य एव, इति विभावयामः ।

१५९.४ (स्वीकृतपाठः) ज्ञापकमभिप्रेत्य .... पं. ४.

(प्रकाशितपाठः) °मुपन्यस्य ....

प्रायः मुद्रितेषु सर्वेष्वपि पुस्तकेषु अत्र *प्रौढमनोरमायाम्* ' ज्ञापकमुपन्यस्य ' इति पाठो दृश्यते । परमत्रैव भैरवमिश्रैः स्वकृतव्याख्यायाम् ' ज्ञापकमभिप्रेत्य ज्ञापकमुपन्यस्येत्यर्थः ' इत्येवंरीत्या स्पष्टीकरणात् भैरवमिश्राणां मतेन 'ज्ञापकमभिप्रेत्य इत्ययमेव

मूलपाठः, इति सुनिश्चितं भवति। भैरवमिश्राश्च नागेशभट्टानां प्रशिष्याः अथवा साक्षाच्छिष्याः। अतः अस्य पाठस्यात्यन्तं प्राचीनत्वं सम्भवति।

किञ्च अस्माभिर्दृष्टेषु प्रायः सर्वेष्वपि हस्तलिखितेषु 'ज्ञापकमभिप्रेत्य' इत्येव पाठः दृश्यते। एवं च सर्वात्मना 'ज्ञापकमभिप्रेत्य' इत्ययमेव पाठः मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति विभावयामः।

१७७ पं. ८   यत्तु मिश्रा आहुः .... पं. ९.

अत्रस्थः 'मिश्रा आहुः' इत्यादिः ग्रन्थः हरदत्तकृत*पदमञ्जर्या*मुपलभ्यते। परन्तु बहुषु स्थलेषु मिश्रशब्देन कृष्णमिश्राणामपि ग्रहणं भवति। अतः प्रथमम् अत्रापि कृष्णमिश्राणामेव सम्भावना कृता आसीत्। इदानीं तु अस्य ग्रन्थस्य *पदमञ्जर्यां* साक्षादुपलम्भात् मिश्रशब्देन हरदत्तमिश्राणामेव ग्रहणं कर्तव्यम्, इति सुनिश्चितं भवति।

१७९.१-२   (स्वीकृतपाठः)   १ परामार्ताण्डमास्यत्। .... पं. १०.
२ विश्वो मार्ताण्डो व्रजमापशुर्गात्। पं. ११.
(उपलब्धपाठः)   १ परा मार्ताण्डमास्थत्। .... पं. १०.
२ विश्वो मार्ताण्डो व्रजत्। पं. ११.

प्रायः मुद्रितेषु सर्वेष्वपि पुस्तकेषु '°मास्थत्' इति थकारः श्रूयते। परं तत्स्थाने यकारोऽपेक्ष्यते। (ऋक् १०.७२.८)। अस्माभिर्दृष्टेषु हस्तलिखितेषु च '°मास्यत्' इति यकार एव दृश्यते। अतः यकारसहित एव पाठो मूलग्रन्थत्वेन निर्धारणीयः इति सर्वथा युज्यते।

किञ्च द्वितीयेऽपि उदाहरणे 'विश्वो मार्ताण्डो व्रजमापशुर्गात्' (ऋक् २.३८.८) इत्येव संहिताग्रन्थ उपलभ्यते। तत्र 'अव्रजत्' इति सर्वत्र दृश्यमानः पाठस्तु अनवधानात् पठितः सर्वथा अशुद्ध एव मन्तव्यः। परं सर्वत्रापि प्रकाशितेषु *प्रौढमनोरमा*पुस्तकेषु अयमेव पाठः स्वीकृतः, अतः अस्माभिरपि मूलग्रन्थत्वेन स एवोद्धृतः।

किञ्च *प्रौढमनोरमाकारैः* भट्टोजिदीक्षितैरपि वेदवचनानां कीदृक् उद्धरणं कृतमासीत्, इति कथयितुं नैव शक्यते। सहस्रशाखोपबृंहितवेदवचनोद्धरणविषये प्राचीनपण्डितानां वैयाकरणमूर्धन्यानामपि प्रमादाः सम्भवन्ति।

१८०.१   क.घ.   तच्च तदन्त्ये प्रवृत्त्या .... पं. ८.
ख.   तच्चर्मतंद्प्रवृत्त्या ....
ग.   तच्च मदन्त्ये प्रवृत्त्या ....

अत्र ख–पुस्तके वर्तमानः ' तच्चमेतंदप्रवृत्त्या ' इति ग्रन्थः, ग–पुस्तके च उपलभ्यमानः ' तच्चमदन्त्ये ' इति ग्रन्थः सर्वात्मना अनुपपन्नः, अशुद्ध एव। क–घ–पुस्तकयोस्तु ' तच्च ' इत्येतदनन्तरं मध्ये किञ्चिदेकमक्षरं दृश्यते। तत् ' त ' इत्येतदक्षरम् इति अस्माभिः परिकल्पितम्। ग–पुस्तकस्थे ' तच्च मदन्त्ये ' इति पाठे मकारस्थाने तकारे स्वीक्रियमाणे सर्वमेवोपपन्नं भवति।

वस्तुतः मकारस्थाने तकारः, इति तु नास्य लेखनिकस्य स्वभावो दृश्यते। परम् अन्यस्य कस्यापि वर्णस्यात्रानुपपत्त्या मध्ये कस्यापि वर्णस्य स्वीकारस्यावश्यकत्वाच्च अस्माभिरत्र तवर्ण एव मूलग्रन्थे अन्तर्भावितः। ' तच्च अन्त्ये ' इति पाठे स्वीकृतेऽपि सूपपन्नो ग्रन्थः, इति तु अन्यदेतत्।

१८२·३ ग· °कालव्यवहितस्यापि साधुत्वबोधनद्वारा.... पं. ४-५
क·ख·घ· °कालव्यवेतस्यापि साधुत्वबोधनद्वारा ....

अत्र °कालव्यवेतस्यापि....इति पाठः क–ख–घ–पुस्तकेषु उपलभ्यते। अस्मिन् प्रकरणे सर्वत्र ' °व्यवहितस्यापि ' इति प्रयोगो दृश्यते। अत्रैव च ' व्यवहित ' इति शब्दं परित्यज्य 'व्यवेत'शब्दस्वीकारे किमपि प्रबलं प्रमाणं नोपलभ्यते, ग्रन्थकृल्लेखनशैली-विरुद्धं च तत्। अतः ' व्यवहित ' इत्येव पाठः स्वीकृतः।

१८२·४ ग· तदपेक्षयाऽधिको मात्राकाल एव। पं. ७
क·ख·ग· तदपेक्षयाऽधिकार्धमात्राकाल एव। पं. ७

अत्र क–ख–घ–पुस्तकत्रयस्वीकृतोऽपि ' अर्धमात्राकालः ' इति पाठः अशुद्ध एव। ' संहितयोच्चारणे सर्वत्र अर्धमात्राकालस्य सत्त्वेन तदपेक्षया अधिकः अर्धमात्राकालः भवितुं नार्हत्येव। किन्तु ' मात्राकालः' एव। अतः क–ख–घ–पुस्तकमूलभूत-*ङ–पुस्तकलेखनिकेन 'अर्ध'शब्दः अनवधानेन अधिको लिखितः, स एव च यथायथं परम्परातः क–ख–घ–पुस्तकैः अनुसृतः इति उपपादयितुं योग्यम्। मूलग्रन्थस्तु ' मात्राकालः ' इत्येव स्वीकर्तव्यः, इति विभावयामः।

१८३·६ क·घ· षोडशिग्रहणन्यायेन .... पं. १८
ख·ग· षोडशीग्रहणन्यायेन ....

अत्र भिन्नपरम्परागताभ्यां ख–ग–पुस्तकाभ्यां स्वीकृतोऽपि दीर्घेकारान्त-' षोडशी 'शब्दपाठः अशुद्ध एव, इति स परित्यक्तः। पूर्वमीमांसायाम् ' अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति ' (जै. न्या. ३.८९; मी. को. २६१-२६२) इत्यत्र इन्नन्तस्यैव षोडशिन्–शब्दस्य ग्रहणात्।

१८६.२ ग. अस्तु वा अयोगवाहेषु.... १८
क.ख.ग. (अशुद्धः असम्बद्धश्च ग्रन्थः)

अत्र ‘ अस्तु वा ’ इत्यस्मात् प्राक् क–ख–घ–पुस्तकेषु ‘ ईषत्स्पृष्टऌकारेण ईषत्स्पृष्टऋकारे ऌका ’ इति अर्थशून्यम् पूर्वापरसन्दर्भहीनम् अर्धत्रुटितं वाक्यमधिकं लेखनिकानवधानेन लिखितं दृश्यते । सर्वात्मना अशुद्धमेव तत् । केवलम् क–ख–घ–पुस्तकानाम् एकपुस्तकमूलकत्वनिर्धारणाय एतादृशानि सर्वात्मना असम्बद्धानि अशुद्धानि च वाक्यानि प्रबलानि प्रमाणानि भवन्ति । तदर्थमेव च अत्र एतस्य उद्धरणम् । अयं ग्रन्थः पाठभेदत्वेन तु सर्वात्मना ग्रहीतुं न योग्यः ।

१८७.१ (कल्पितपाठः) सिसा(षा)धयिषितम् .... पं. १
क.ख.ग.घ. सिसाधयिषितम् ....

भिन्नभिन्नपरम्परागतासु चतसृष्वपि मातृकासु दन्त्यसकारसहितम् ‘ सिसाधयिषितम् ’ इति सर्वात्मना अशुद्धं रूपमुपलभ्यते । अतः चतुर्णामपि पुस्तकानां मूलभूतं यत् पुस्तकम् *आ–पुस्तकम्, तस्य लेखनिकेनैव एतद् अशुद्धं रूपं स्वीकृतम्, इति वयं कल्पयामः । अनेन *आ–पुस्तकस्वीकारस्याप्यावश्यकता उपपादिता भवति । *आ–पुस्तकानन्तरं च *इ–*ई–पुस्तकाभ्याम् ततश्च परम्परातः सर्वैरपि क–ख–ग–घ–पुस्तकैः यथायथमनुसृतोऽयम् अशुद्धो ग्रन्थः, इत्येव कल्पयितुं योग्यम् ।

अस्य रूपस्य सर्वात्मना अशुद्धत्वेऽपि चतुर्णामपि पुस्तकानां लेखनिकैः समानरूपमशुद्धं कथं स्वीक्रियते, इत्येतत् प्रदर्शयितुमेवात्रास्योपन्यासः ।

किञ्च कदाचित् अनवधानात् ग्रन्थकर्तॄणां हरिदीक्षितानामपि अशुद्धं सम्भाव्यते एव ‘ गच्छतः स्खलनं क्वापि भवत्येव विपश्चितः ’ इति न्यायदर्शनात् ।

अत एवास्माभिः ‘ सिसाधयिषितम् ’ इति दन्त्यसकारसहितं रूपं मूले स्थापयित्वा एतच्चिह्नमध्ये ( ) च षकारः स्थापितः ।

१९२.५ ग. अज्रूप एव .... पं. ५.
क.ख.घ. अनज्रूप एव ....

अत्र क–ख–घ–पुस्तकैः स्वीकृतः ‘ अनज्रूप एव ’ इति पाठः सर्वथा अशुद्ध एव, इति प्रतिभाति । अज्भिन्नस्य वर्णस्य नाम व्यञ्जनस्य प्लुतत्वेन सर्वथा अदर्शनात् । प्लुतत्वं तु अचामेव सम्भवति ।

क–ख–घ–पुस्तकेषु तु ‘ अज्रूप ’ इत्यत्रत्य–अकारानन्तरं कोऽपि वर्णः प्रक्षिप्त इव दृश्यते । आपाततः ‘अमृद्रूपः’ इति अक्षरसमुदायो दृश्यते । परं सूत्रे साक्षात्

'अनृत्'शब्दोच्चारणेन 'साहचर्यात्, अपिशब्दबोध्यत्वं च तस्य (अनृद्रूपस्य)' इति तु सर्वथा असम्भवि। अतः 'अनृद्रूप' इति पाठस्तु नैव ग्रहीतुं शक्यते।

एवं स्थिते 'अजूरूपः' इत्यत्र अकारोत्तरं कश्चन वर्णः लेखनिकेनानवधानतया लिखितः, इत्येवं कल्पयित्वा अस्माभिः स्वीकृतः 'अजूरूपः' इत्ययमेव पाठः मूलग्रन्थत्वेन स्वीकर्तुं योग्यः इति विभावयामः।

१९४.१ (*पातञ्जलमहाभाष्य*पाठः) सर्व एव प्लुतः .... **वक्तव्यः**। पं. ३.
(प्रकाशितपाठः) सर्वः प्लुतः .... **कर्तव्यः**।

प्रायः सर्वत्रापि प्रकाशितेषु *प्रौढमनोरमा*पुस्तकेषु अस्माभिर्दृष्टेषु हस्तलिखितेषु च अस्य ग्रन्थस्यैव *भाष्य*ग्रन्थत्वेनोद्धरणं दृश्यते। साक्षात् *महाभाष्ये* अस्माभिर्दृष्टेषु सर्वेषु पुस्तकेषु तावत् 'सर्व एव' इत्येवकारोऽधिकः, तथा 'कर्तव्यः' इत्यस्य स्थाने 'वक्तव्यः' इति दृश्यते। अतः हरिदीक्षितैः स्वयमेव पाठभेदः कल्पितः इति वक्तुं सुशकम्।

यद्यपि अनेन अत्र अर्थहानिः अथवा अर्थभेदः इत्यादि किमपि न भवति, तथापि एतादृग्भिः उदाहरणैः स्पष्टं भवति यत् प्राचीनपण्डितैः *महाभाष्य--वार्त्तिका*दि-ग्रन्थानां कण्ठस्थीकरणेन साक्षात् ग्रन्थलेखनसमयेऽपि स्वकीयस्मृतिबलमाश्रित्यैव लेखनेन बहुधा विपरिवर्तनम्, व्यत्यासः, न्यूनाधिक्यमपि सम्पादितम् इति। विशिष्य च *वार्त्तिक*विषये एतद् विपरिवर्तनं बहुत्र अनुभूयते। बहुषु स्थलेषु च *भाष्य*ग्रन्थस्य *वार्त्तिक*शब्देन निर्देशः, *वार्तिक*ग्रन्थस्य च *भाष्य*ग्रन्थत्वेन निर्देशः अनुभूयते। (उदाहरणार्थं द्रष्टव्यम् : पृ. २३-१, २६-१५, १६८-१०, १४०-१, १४६-२१, १५२-२१, १५६-२१, २१९-११, १२.)

१९६.१ ख· प्लुतिं विदुः। पं. ८.
क·ग·घ· प्लुतं विदुः।

क-ग-घ-पुस्तकस्वीकृतोऽपि 'प्लुतम्' इति पाठोऽत्र न स्वीकृतः। वस्तुतः भिन्नपरम्परागतानां क-ग-घ-पुस्तकानाम् ऐकमत्ये स एव पाठो मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति सामान्यतः चिकित्साशास्त्रीयं तत्त्वम्। परमत्र किञ्चिदिव तदनादृतम्। *महाभाष्ये* पतञ्जलिना 'प्लुतिम्' इत्येव पाठस्वीकरणात्। प्रायः सर्वेष्वपि *महाभाष्य*-पुस्तकेषु तथैवोपलब्धेः। परमत्र तावत् महत्त्वपूर्णैः विभिन्नपरम्परातः समागतैश्च पुस्तकैः अस्य पाठस्य स्वीकारात् एवमपि कल्पयितुं शक्यते, यद् ग्रन्थकारैर्हरिदीक्षितैरेव अयम् 'प्लुतम्' इति पाठः स्वीकृतः। स एव च यथायथं लेखनिकैः अनुसृतः, इति।

परं तादृशविचारस्वीकारे प्रबलप्रमाणानुपलब्ध्या ग्रन्थकर्तुः अज्ञानावधानदोषार्हत्वं वक्तुं न योग्यम्, किन्तु सति सम्भवे स दोषः लेखनिकेषु एवारोपणीयः। अत एव एकत्रोपलभ्यमानोऽपि 'प्लुतिम्' इति पाठो *महाभाष्या*नुसारी इति स एवात्र अस्माभिर्मूलग्रन्थत्वेन स्वीकृतः इति।

१९८.१ क·ख·घ· 'अग्नी३ इति' .... पं. ११.
ग· 'अग्नी इति' ....

'अग्नी३ इति' इत्यत्र प्लुतस्य त्रिमात्रत्वप्रदर्शनार्थं लिखितः अङ्कः '३' इति ग–पुस्तकलेखनिकेनानवधानतया 'इ' इत्येवमकारेण लिखितः, इति प्रतिभाति। अतः 'अग्नी३ इति' इत्येव शुद्धः पाठः।

२०३.४ ग· सप्तम्यन्तस्य 'उ'निपातेन पं. २०.
क·ख·घ· सप्तम्यन्तस्य निपातेन ....

अत्र त्रिभिरपि क–ख–घ–पुस्तकैः 'उ' इत्येकमक्षरं परित्यक्तम्, इति प्रतिभाति। यतः "उ–निपातेन (अ–निपातेन) वा सह एकादेशः।" इति ग्रन्थः समीचीनया रीत्योपपन्नो भवति।

२०४.३ ख·ग· सप्तम्याः क्वाप्यभावेन .... पं. १६.
क·घ· सप्तम्या कार्याभावेन ....

अत्र ख–ग–पुस्तकयोः 'सप्तम्याः क्वाप्यभावेन' इति पाठो दृश्यते। वचनसामर्थ्यार्थं च क्वाप्यभाव एव अपेक्ष्यते, तत एव च ज्ञापकसङ्गतिः। अतः कार्याभावापेक्षया 'क्वाप्यभाव' एव श्रेयस्करोऽत्र।

किञ्च ख-ग–पाठस्वीकारे भिन्नपाठपरम्पराबलमपि लभ्यते, इति हेतोरपि 'क्वाप्यभावेन' इति पाठ आवश्यकत्वेन स्वीकर्तव्यो भवति।

२१०·१ (कल्पितपाठः) 'अनिः इः अभवत्'.... पं. १०
क·ख·ग·घ· 'अनि इः अभवत्'........

अत्र चतुर्ष्वपि पुस्तकेषु 'अनिः' इत्यत्रत्यस्य विसर्गस्य त्रुटिर्वर्तते, इति कल्पयितुं योग्यम। प्रथमान्तं पदं विना उच्चारणासम्भवात्। प्रायः चतुर्णामपि पुस्तकानां सामान्यभूतं यत् पुस्तकम् *'आ' इत्याख्यम् अस्माभिः कल्पितम्; तस्यैव लेखनिकस्यानवधानात् भ्रष्टोऽयं विसर्गः, इति कल्पयितुं शक्यम्।

('इ' इत्यस्य अर्थस्तु मदनः, कामः। अनिः नाम कामभिन्नः, इः नाम कामः अभवत्, ईअभवत्; इति चित्ररूपमिदम्।)

२१२.२ ख. प्रत्ययान्तभिन्नत्वानपायात् दोषो .... पं. १४

क.ग.घ. प्रत्ययान्तभिन्नत्वानपायात् अदोषो ....

अत्र ' दोषो ' इत्यस्य स्थाने उपलभ्यमानः ' अदोषः ' इति पाठस्त्वशुद्ध एव इति प्रतिभाति। परं क–ग–घ–पुस्तकैः भिन्नपरम्परातः समागतैरपि स एव पाठः कथं स्वीकृतः, किञ्च तत्रैव अन्यतरपरम्परायां वर्तमानेन ख–पुस्तकेन सः अशुद्धः पाठः कथं न स्वीकृतः, इति विमर्शयितुमेव अत्र अधस्तात् क–ग–घ–पाठः प्रदत्तः।

अत्र विषये विचारे क्रियमाणे इदमेव प्रथमतः स्वीकर्तव्यं भवति; यत् क–ख–ग–घ–पुस्तकानां परममूलं यत् पुस्तकम् *'आ' इति पुस्तकम्, तत्रैवेदमशुद्धं सम्भाव्यते। ततश्च कल्पिताभ्याम् *इ–*ई–पुस्तकाभ्यामपि स एव पन्थाः यथायथम् अनुसृतः। *इ–पुस्तकानन्तरम् *उ–पुस्तकेनापि तदेव लिखितम्। *ऊ–पुस्तकलेखनिकेन तु 'अदोषः' इति पाठः अशुद्धः, इति ज्ञात्वा स पाठः दूरीकृतः, ' दोषः ' इत्येव च मूलग्रन्थः स्वीकृतः। ग–पुस्तकलेखनिकेन तु *ई–पुस्तकस्थः अपपाठः यथायथम् अनुसृतः, इत्येवात्र सर्वत्र अशुद्धिसम्भावना इति विभावयामः। एतादृगुदाहरणार्थमेव च *उ–*ऊपुस्तक योः पार्थक्येन स्वीकारस्यात्यावश्यकता।

२१३ पं. १९ क.ग.घ. अञमर्थं चेति यावत्। पं. १९

ख.! उञर्थं चेति यावत्। ....

अत्र ' अञमर्थम् ' इत्यस्य ' यरो ञमि ञम् वा ' इति सूत्राकरणे, इत्यत्र तात्पर्यं विवक्षितम्। केचित्तु ' अञमर्थम् ' इत्यस्य स्थाने ' उञर्थम् ' इति पाठं स्वीकुर्वन्ति। तत्तु न समीचीनम्, इति भाति। अत्र हि 'एतज्जातीयार्थत्वमेव' अस्य ग्रन्थस्य ज्ञापनतया प्रयत्नः कृतः। तत्र जातीयार्थत्वे उच्यमाने सामान्यतो निर्देशस्यैव ग्रन्थकृल्लेखनस्यौचित्यात्। असति बाधके प्रमाणानां सामान्ये पक्षपातस्य शास्त्रसम्मतत्वाच्च।

किञ्च ' उञर्थम् ' इत्येव पाठे स्वीक्रियमाणे ' यदेतनाँश्चिनोति ' ' कमलाँश्चिनोति ' इत्यादीनां सङ्ग्रहो न भवेत्। अत एव लघुशब्दरत्नकारैरपि ' एतदर्थमेव ' इत्यस्य 'एतदर्थमपि' इत्यर्थं प्रकल्प्य ' यदेतनाँश्चिनोति ' ' कमलाँश्चिनोति ' इत्यादीनां सङ्ग्रहः कर्तव्यः; इति स्पष्टमुक्तमत्रैव लघुशब्दरत्ने। अतः ' अञमर्थम् ' इत्येव पाठः युक्ततरः इति विभावयामः।

२१३.५ क.ख.ग.घ. यदेतनाँश्चिनोति .... पं. २१

(*भावप्रकाशः*) यदेतनाँश्चिनोषि ....

अत्र सर्वत्र *शब्दरत्न*मातृकासु **'चिनोति'** इत्येव पाठः उपलभ्यते। परं स ग्रन्थः अशुद्धः, लेखकप्रमादेन वर्तते, इति *भावप्रकाश*काराणां वैद्यनाथपायगुण्डे-महाभागानामभिप्रेतं दृश्यते। तेषां मतेन सम्बुद्धौ ' हे आन् ' इत्यनन्तरम् ' त्वम् ' इत्यस्यैव कर्तृत्वेन अध्याहारस्यावश्यकत्वात् ' चिनोषि ' इति मध्यमपुरुषैकवचनस्यैव युक्तत्वात्। एतदेव च अन्यैरपि कैश्चन स्वीकृतम्।

परम् ' त्वम् ' इत्यस्य स्थाने ' भवत् 'शब्दस्य अध्याहारे स्वीक्रियमाणे *शब्दरत्नस्य* सर्वैरपि पुस्तकैः स्वीकृतः ' चिनोति ' इति पाठोऽपि सूपपन्नो भवति, इति भवच्छब्दाध्याहारं प्रकल्प्य ' स्थितस्य गतिश्चिन्तनीया ' इति पक्षमाश्रित्य **'चिनोति'** इति पाठस्य समर्थनं कर्तव्यम्, इति विभावयामः।

२१५.३ क·ख·घ· ' इकोऽसवर्णे ' .... पं. १८.
ग· (ग्रन्थत्रुटिर्वर्तते) ....

अत्र ग–पुस्तके " इकोऽसवर्णे ' इति पाक्षिकह्रस्वप्रसङ्गश्च। " इति ग्रन्थस्य त्रुटिः वर्तते। तत्र अयं ग्रन्थः ग–पुस्तकलेखनिकेन अनवधानेन परित्यक्तः, इति प्रतिभाति।

यतः पूर्वस्मिन्नेव वाक्ये अन्त्यः शब्दः ' °प्रसङ्गः ' इति वर्तते। तत्रत्यप्रसङ्गशब्दस्य अत्रत्यप्रसङ्गशब्देन सह समुत्पन्नया भ्रान्त्या मध्ये लिखितं ग्रन्थं परित्यज्य अग्रेतनं वाक्यं लेखनिकेन स्वीकृतम्, इति लेखनिकानवधानमूलिका ग–पुस्तकस्था त्रुटिरेवेयम्, इति विभावयामः।

२१७.५ क·ख·ग·घ· **सम्भवतो** मताः। पं. १८.
(*पाणिनिशिक्षा*) **शम्भुमते** ....

अत्र प्रायः सर्वत्र प्रकाशितेषु पुस्तकेषु परम्परायां च ' शम्भुमते ' इत्येव पाठः स्वीकृतो दृश्यते। परम् अत्रैव *शिक्षाभाष्ये* " **त्रिषष्टिश्चतुःषष्टिर्वेति**। सम्भवतः इति सम्भूतेः " इति ग्रन्थः उपलभ्यते। एतादृक्षु स्थलेषु पाठभेदनिर्णयार्थं *शिक्षाभाष्य*कारैर्यत् पुस्तकं स्वीकृतमासीत् तदेव प्राचीनतमं स्वीकारार्हं च भवति। अतः अत्र ' शम्भुमते ' इत्येव ' मूलग्रन्थः ' इत्येव कल्पयितुं योग्यम्। अत्र च ' मूलग्रन्थः ' इत्यनेन *पाणिनीयशिक्षा*ग्रन्थः इत्येव मन्तव्यम्। *शब्दरत्न*काराणां हरिदीक्षितानां पाठस्तु ' सम्भवतः ' इत्येव, इति विभावयामः। सर्वेष्वपि पुस्तकेषु तथैव उपलब्धेः।

किञ्च *पाणिनीयशिक्षायाः* अपि वेदाङ्गत्वात्, ऋग्वेदादिवत् परम्परातः गुरुमुखेनैव अध्ययनाध्यापनादिविषयीभूतत्वात्, यः पाठो गुरुमुखपरम्परातः निरपवादं सर्वस्मिन्नपि

भारते उपलभ्यते, तस्यैव मूलग्रन्थस्वरूपेण स्वीकरणं कार्यम्, इति अत्रोदाहरणे वक्तुं शक्यं योग्यं च।

२१९.१-२ (*पातञ्जलभाष्यम्*) उत्कन्दको .... । पं. १२.

क·ख·ग·घ· उत्कन्दो रोगः

अत्र सर्वेष्वपि पुस्तकेषु 'उत्कन्दो रोगः' इति पाठः उपलभ्यते। *महाभाष्ये* तु 'उत्कन्दको रोगः' (३·४६५·६-७) इति ग्रन्थः उपलभ्यते। अतः अत्र *शब्दरत्न*कारैः हरिदीक्षितैः *महाभाष्य*त्वेन 'उत्कन्दो रोगः' इत्यस्य यदुद्धरणं कृतम्, तत्तु सर्वथा अयोग्यमेव, सर्वेष्वपि *भाष्य*पुस्तकेषु 'उत्कन्दको रोगः' एतदाकारेणैव दर्शनात्।

किञ्च सर्वेष्वपि कोशग्रन्थेष्वपि 'उत्कन्दक' इत्ययमेव शब्द उपलभ्यते, नतु 'उत्कन्द' इति। अतः 'उत्कन्द' इति शब्दः सर्वथा अशुद्ध एव।

इयमशुद्धिः लेखनिककृता अथवा ग्रन्थकारकृता इति नैश्चित्येन वक्तुं न शक्यते। प्रायः एतादृक्षाणां *महाभाष्यवार्त्तिकादि*ग्रन्थानां कण्ठस्थीकरणेन ग्रन्थावलोकनं विना च लेखनेन एतादृक्षु स्थलेषु ग्रन्थकारप्रमादोऽपि सम्भवति। (उदाहरणार्थं द्रष्टव्यम्: पृ. २३–१, २६–१५, १४०–२१, १४६–२१, १५२–२१, १६८–१० इ. इ.)

किञ्च अस्मिन्नेव उदाहरणे *भाष्ये* 'उदः पूर्वत्वे' इति ग्रन्थः सर्वेष्वपि अस्माभिर्दृष्टेषु पुस्तकेषु उपलभ्यते। हरिदीक्षितैस्तु 'उत्पूर्वत्वे' इति *भाष्य*ग्रन्थत्वेन उद्ध्रियते। तत्र कारणमपि उपरिनिर्दिष्टमेव सम्भवति।

२२०.३ ख·ग· एव युक्तः। पं. १९.

क·घ· एवायुक्तः।

अत्र ख–ग-पुस्तकाभ्यां स्वीकृतः 'एव युक्तः' इति पाठः एव युक्तः। त्रैपादिके कार्ये कर्तव्ये चर्त्वस्यासिद्धत्वात् पूर्वं जश्त्वोपन्यासस्यैव युक्तत्वात्। अतः नञ्घटितः पाठोऽशुद्ध एव। किञ्च भिन्नपरम्परापाठबलमपि ख–ग–पुस्तकयोः पाठे एव वर्तते। किञ्च पायगुण्डे–महोदयैर्*भावप्रकाशे*ऽपि *मान्यग्रन्थोद्धरणसमये* 'एव युक्तः' इत्येव पाठः स्वीकृतः, इति एतदपि उपकारकं मूलग्रन्थनिर्धारणे।

२२२.१ ग· पुष्कर इति। पं. १०.

क·ख·घ· पुष्कर इति।

क–ख–घ–पुस्तकैः स्वीकृतः 'पुकर' इति पाठः सर्वथा अशुद्धो लेखनिकदोषमूलकश्च। अथापि केवलं क–ख–घ–पुस्तकानाम् एकपुस्तकमूलकत्वप्रदर्शनोद्बलककत्वेन सोऽत्र स्थापितः एकपुस्तकमूलकत्वाभावे एतादृशाशुद्धानां प्रायोऽसम्भवात्।

२२३.१ (कल्पितः पाठः) द्वित्वभाक्त्वे .... पं. ११.

क.घ. द्वित्वभात्क्रे

ख.ग. द्वित्वभाक्ते

अत्र 'द्वित्वभात्क्रे' इति 'द्वित्वभाक्ते' इति वा वर्तमानं पाठद्वयमपि अशुद्धमेव। अतः अक्षरानुपूर्वीसादृश्येन अर्थानुसन्धानाच्च अस्माभिः 'द्वित्वभाक्त्वे' इति पाठः संसूचितः। अर्थानुसारं सन्दर्भानुरोधेन च स एव स्वीकर्तुं योग्यः, इत्यस्माकं मतिः।

'द्वित्वमात्रे' इति पाठोऽपि नासम्भवी। परन्तु स न समीचीनया रीत्योपपन्नो भवति। तदुत्तरमेव 'विना प्रमाणं सङ्कोचस्यान्याय्यत्वात्' इति ग्रन्थोपलब्धेः। किन्तु 'द्वित्वमात्रे' इति पाठे स्वक्रियमाणे यावत् द्वित्वप्रदेशं निषेधस्य प्रवृत्तेर्ग्रन्थकारस्याभिमता व्यापकता एव सम्पादिता भवति, न तु सङ्कोचः। मात्रशब्देन 'यावत् द्वित्वप्रदेशम्' इत्यर्थस्यैवाभिव्यक्तेः। अतो 'द्वित्वभाक्त्वे' इत्येव पाठः ग्रन्थकाराभिमतत्वेन स्वीकर्तुं योग्यः इति विभावयामः।

२३१.६-७ ग. रोरनुनासिकस्य .... पं. २१.

क.ख.घ. णे अनुनासिकस्य ....

क–ख–घ–पुस्तकैः स्वीकृतो 'रोः' स्थाने 'णे' इति पाठस्तु सर्वात्मना अशुद्ध एव। प्रकृतसन्दर्भे 'रोः' इत्यस्यैव सम्बन्धात्, प्रत्युत केनापि प्रकारेण 'णे' इत्यस्य सम्बन्धाभावात्। अतः स लेखनिकदोष इत्येवावधारणीयम्। वस्तुतः 'णे' इति लेखने 'रो' इति लेखने च अतीव साम्यं वर्तते। विशिष्य च औत्तराणां लेखनिकानां 'ण'कारलेखनं यथा अत्र भ्रान्तिर्भवेत् तथैव वर्तते।

एवं स्थितेऽपि 'णे' इत्यस्य अत्र पाठभेदत्वेनोद्धरणं तु क–ख–घ–पुस्तकानां मूलभूतस्य एकस्य *ङ–पुस्तकस्य कल्पना अत्यन्तमावश्यकी, इति यद् अस्माभिः प्रतिपाद्यते तस्य उपबृंहणार्थमेव, न तु पाठभेदस्वरूपेण निर्देष्टुम्, इत्येवावधारणीयम्।

२३२.१ (*शब्दरत्न*पाठः) अवत्सा धेनुः .... पं. ७.

(प्रकाशितपाठः) अवत्सा ....

प्रकाशितेषु बहुषु *प्रौढमनोरमा*-पुस्तकेषु 'धेनुः' इति नास्ति। परमत्र शब्दरत्नकारैः हरिदीक्षितैः तस्य प्रतीकत्वेन स्वीकारात् तैः स्वीकृते *प्रौढमनोरमा*–पुस्तके तु

'धेनुः' इति शब्दोऽस्त्येव इति स्पष्टमनुमीयते। किन्तु 'धेनु'शब्दस्य गोरेव वाचकत्वं मन्यमानैः कैश्चन धेनुशब्दः मूलग्रन्थात् परित्यक्तः, इति प्रतिभाति। तेषां सन्दिग्ध-चेतसां विदुषामेव संशयनिरासार्थं *शब्दरत्न*कारैर्हरिदीक्षितैः 'यत्तु धेनुशब्दो गोरेव वाचकः, इति तन्न' इत्यादिना सर्वोऽयं विषयो विवेचितः।

किञ्च नेयं हरिदीक्षितैरेव नवीना सरणिः स्वीकृता इति मन्तव्यम्, येन भट्टोजिदीक्षितैः स्वकीये ग्रन्थे धेनुशब्दो न स्वीकृतः, इति वक्तुं शक्येत। यतः *कैयटादि*भिरपि *प्रदीपादि*षु ग्रन्थेष्वयं विषयः सुश्लिष्टतया परामर्शितः, इति प्रदर्शयितु-मेव अङ्गाधिकारस्थ*कैयट*ग्रन्थस्यात्रोद्धरणं क्रियते। यथा—'सकिशोरा धेनुः आनीयताम्, सवत्सा सकरभा, इति विशिष्टा धेनुः प्रतीयते। " .... यथा वृद्धानां किशोरीणां च मध्ये धेनवो बध्यन्ताम्, इत्युक्ते वडवा एव बध्यन्ते, न तु गवादयः।" (*मभा. कैयट*-६.४.२.३) तथैव हरदत्तेनापि धेनुसहित एव निर्देशः कृतः। यथा सवत्सा धेनुः आनीयताम्, सकिशोरा, इति गवादिर्धेनुः प्रतीयते। (*पदमञ्जरी* ६.४.३४)

एवञ्च उपरिनिर्दिष्टरीत्या *कैयट*हरदत्तादीनामपि धेनुशब्दसहितोच्चारणपरम्परा-दर्शनात् भट्टोजिदीक्षितैरपि धेनुशब्दसहितोच्चारणमेव स्वकीये ग्रन्थे कृतम्, इति धेनुशब्दसहित एव पाठः मूलग्रन्थत्वेन स्वीकर्तुं योग्यः, इति वयमत्र विभावयामः।

२३५.१ ख. तन्न। मध्येपवाद° .... पं. ५.
क.ग.घ. तत्र ....

अत्र भिन्नपरम्परातः समागतैः क–ग–घ–पुस्तकैः 'तत्र' इति पाठस्वीकारात् स एव पाठोऽस्माभिर्मूलग्रन्थत्वेन स्वीकृतः। परं सूक्ष्मया दृष्ट्याऽवलोक्यमाने 'तन्न' इत्येव ख–पुस्तकपाठः मूलग्रन्थत्वेन स्वीकार्यः इति प्रतिभाति।

अत्र हि " किञ्च 'विसर्जनीयः" इत्यतः आशङ्काग्रन्थः प्रारब्धः सः 'प्राप्तविसर्ग एव स्थाप्यते, इति' इत्यन्तेन ग्रन्थेनात्रोपसंह्रियते। तस्य च खण्डनार्थं प्रवृत्तस्यास्य ग्रन्थस्य 'तन्न' इत्यनेनैव प्रारम्भस्यौचित्यात्। अतः 'तत्र' इत्ययं पाठो यद्यपि नाशुद्धः, यथाकथञ्चिच्च लापयितुं शक्यते, इति यद्यपि सत्यम्, तथापि 'तन्न' इत्येव पाठः ग्रन्थकारलेखनस्वभावानुकूलः, अत एव मूलग्रन्थत्वेन स्वीकर्तुं योग्यश्च, इत्येव वक्तुं योग्यम्।

किञ्च 'तत्र' इत्यत्रत्येन 'त्र'कारेण 'न्न'कारस्य अत्यन्तं साम्यात् क–ग–घ–पुस्तकानां लेखनिकैः कृतोऽयं प्रमादः अथवा तेषां विशिष्टालेखनशैली, न तु पाठान्तरम्; इत्यपि वक्तुं शक्यम्।

अथवा *आ–पुस्तके एव एतदशुद्धमासीत्। ततश्च सर्वैरपि पुस्तकैर्यथायथं तद् अनुसृतम्। ख–पुस्तकेन तु तत् शुद्धं कृतम्, इत्यपि सम्भावयितुं शक्यम्। अथवा सर्वेष्वपि पुस्तकेषु उपलभ्यमानः 'तत्र' इत्यत्रत्यः 'त्र'कारः 'न्न'कार एवास्ति, न पुनः 'त्र'कारः, इति व्यर्थ एवायं सर्वोऽप्यायासः, इत्यपि विभावयितुं शक्यम्।

२३७.१ (*पातञ्जलमहाभाष्यम्*) 'बहुलं तणि', 'अन्न' पं. ७.
(*प्रौढमनोरमा*) बहुलं तण्यन्नवधक ....

प्रायः सर्वत्र प्रकाशितेषु *प्रौढमनोरमा*–पुस्तकेषु अस्माभिर्दृष्टेषु सर्वेष्वपि हस्तलिखितेषु च 'बहुलं तण्यन्नवधकगात्रविचक्षणाजिराद्यर्थम्'इति एकमेव *वार्त्तिकं* दृश्यते। *पातञ्जलमहाभाष्यस्य* प्रायः सर्वेष्वपि पुस्तकेषु तु १. 'बहुलं तणि' २. 'अन्नवधकगात्रविचक्षणाजिराद्यर्थम्' इति *वार्त्तिकद्वयं* दृश्यते। अतः ग्रन्थकाराणां भट्टोजिदीक्षितानामेवायं प्रमादः सम्भवति; इति कल्पयितुं योग्यम्।

अत्रैवं कल्पयितुं शक्यतेः—यद् भट्टोजिदीक्षितानां काले गुरुमुखपरम्परया *सवार्त्तिकाष्टाध्यायीपाठः* पठनार्थं शिष्येभ्यः उपदिश्यते स्म। तदानीं च पठनकाले मध्ये *भाष्यस्य* प्रत्यवायाभावात् 'बहुलं तणि' इति पूर्व*वार्त्तिकस्य* 'अन्नवधक°' इत्युत्तर*वार्त्तिकस्य* च परस्परं साक्षात् सम्बन्धात् हेतुतः अनवधानात् वा *वार्त्तिक*द्वयस्य स्थाने 'णि' 'अ' इत्यत्र संहितापाठमाश्रित्य यण्सन्धिं कृत्वा एकमेव वार्त्तिकं कृतम्, इति कल्पयितुं शक्यते।(उदाहरणार्थं द्रष्टव्यम्ः पृ. २३–१, पृ. २६ पं. १५, पृ. १४० पं. १, पृ.१४६. पं. २१, पृ. १५२ पं. २१, पृ. १३८ पं. १०, पृ. २१९ पं. १२ इ. इ.)

अतः भट्टोजिदीक्षितानामेवेदमनवधानम्, अथवा तैः संहितापाठेन कृतो वार्त्तिकनिर्देशोऽयम्, इति वयं विभावयामः ।

२३९.१ ग. उत्पुच्छयते .... पं. १०
क.ख.घ. उत्पुच्छयन्ते ....

क–ख–घ–पुस्तकैः स्वीकृतः बहुवचननिर्दिष्टः '°यन्ते' इति पाठो यद्यपि लापयितुं शक्यते, तथापि प्रयोजनं विना बहुवचननिर्देशस्य अयोग्यत्वात् ग–पुस्तकेन स्वीकृतः एकवचननिर्दिष्टः पाठ एवास्माभिर्मूलग्रन्थत्वेन स्वीक्रियते। अत्र त्रयाणां क–ख–घ–पुस्तकानां मूलभूतं यत् *इ–पुस्तकं तत्रैवायं दोषः, इति विभावयामः।

२४५.३ ख.ग. प्रकृते तु बाधकं स्पष्टमेव। अत एव.... पं. १०
क.घ. (ग्रन्थस्य त्रुटिः) .... अत एव ....

अत्र 'अत एव' इत्यस्मात् प्राक् 'प्रकृते तु बाधकं स्पष्टमेव' इति अधिको ग्रन्थः ख–ग–पुस्तकयोः उपलभ्यते। अयं च ग्रन्थः मूलग्रन्थत्वेन स्वीकार्यः, इति भाति। क–घ–पुस्तकयोः एकपरम्परामूलत्वात् *उ–पुस्तकलेखनिकेनैव अनवधानात् इदं वाक्यं परित्यक्तम्, इति कल्पयितुं शक्यते। अर्थानुसन्धानार्थमत्र अस्य वाक्यस्य आवश्यकत्वात्। किञ्च ख–ग–पुस्तकयोः एतादृशस्य एकाकारतया प्रक्षिप्तस्य अक्षरानुपूर्वीसन्निवेशस्य कल्पयितुमयोग्यत्वात्।

२४६·४ ख· परिगणनेन नान्यकार्ये अव्ययीभावस्याव्ययत्वम्। पं. १६

क·ख·घ· परिगणनेन अन्यकार्ये अव्ययीभावस्याव्ययत्वम्।

अत्र क–ग–घ–पुस्तकैः भिन्नपरम्परातः समागतैरपि स्वीकृतः 'न' काररहितः पाठो न युक्तः, इति भाति। प्रकरणसन्दर्भवशात् 'अव्ययीभावस्याव्यय'त्वम् ' लुड्मुखस्वरोपचारेषु ' इति परिगणनेन एतद्भिन्नस्थलेषु अव्ययीभावस्य अव्ययत्वं नास्ति, इति प्रतिपादने एव तात्पर्यम्। नकारद्वयस्य अव्यवहिततया लेखनसमये *आ–पुस्तके एव एको नकारस्त्रुटितः, तदेव चानुवृत्तं परम्परातः क–ग–घ–पुस्तकेषु इति स्पष्टमनुमातुं शक्यते। अतः 'परिगणनेन नान्यकार्ये' इत्येव पाठो मूलग्रन्थत्वेन स्वीकार्यः इति विभावयामः।

२४८.२ क·ख·घ· किञ्च पूर्वपदात् .... पं. १६

ग· (ग्रन्थस्य पौर्वापर्यम्, त्रुटिः व्यत्यासश्च)

' किञ्च ' इत्यनन्तरम् अस्मिन् सर्वस्मिन्नपि परिच्छेदे ग–पुस्तकस्थः सर्वोऽपि ग्रन्थः पौर्वापर्यव्याकुलीभूतो दृश्यते। उपलब्धेषु चतुर्ष्वपि पुस्तकेषु ग–पुस्तकं समीचीनया रीत्या लिखितमिव वर्तते। परं तत्रापि एतादृशा दोषाः सम्भवन्ति, इत्येतत्प्रदर्शयितुमेव अत्रेयं टिप्पणी।

२५४·१ ग· सम्भवः, ... पं. १०

क·ख·घ· सम्बन्धः, ...

अत्र यद्यपि क–ख–घ–पुस्तकैः ' सम्बन्धः ' इति पाठः स्वीकृतः, तथापि पूर्वापरसन्दर्भानुरोधेन ' सम्भवः ' इति ग–पुस्तकस्वीकृतः एव पाठः मूलग्रन्थत्वेन स्वीकार्यः इति विभावयितुं युक्तम। यतः उक्तरीत्या अस्सुजन्तयोः 'सम्बन्धो' नास्ति, किन्तु ' सम्भवः ' एव इति स्पष्टम्। किञ्च उत्तरवाक्ये अपि ' सम्भवः ' इत्यनेनैव ' सुजन्तयोरेव ग्रहणम् ' इत्यस्य समीचीनया रीत्योपपत्तिर्भवति।

२५८·१ ग· अस्या अप्रत्याख्याने .... पं. ९

क·ख·घ· अस्याप्रत्याख्याने ,...

अत्र ग–पुस्तकेन ' अस्या अप्रत्याख्याने ' इति पाठः स्वीकृतः। क–ख–घ–पुस्तकैस्तु ' अस्याप्रत्याख्याने ' इति पाठः स्वीक्रियते ।

तत्रेदं विमृश्यतेः—" ग्रहणवता प्रातिपदिकेन इति परिभाषायाः " इत्युत्तर-ग्रन्थस्थपरिभाषाशब्दानुरोधेन अत्र ' अस्याः ' इति स्त्रीलिङ्गनिर्देश एव योग्यः। किञ्च लघुशब्दरत्नेऽपि अत्र विवरणसमये स्त्रीलिङ्गनिर्देश एवोपलभ्यते। साधु उपपद्यते च तत्। ' सर्वनाम्नामुत्सर्गतः प्रकृतपरामर्शित्वम्, प्रधानपरामर्शित्वं च ' इति न्यायात्।

यदि तु *प्रौढमनोरमास्थम्* ' अस्य प्रत्याख्यातत्वात् ' (पं. ८) इति पुंस्त्व-प्रधाननिर्देशानुसारम्, अत्रत्योऽपि पुंस्त्वप्रधाननिर्देशः इति चेत् तदपि कथञ्चिल्लाप-यितुं शक्यते, इति तु गौणः पन्थाः।

२५८.२ ग॰ दृष्टान्तदार्ष्टान्तिकयोः .... पं. १६.
क॰ख॰घ॰ दृष्टांतिकयोः ....

सर्वात्मना अशुद्धोऽपि ' दृष्टांतिकयोः ' इति ग्रन्थः क–ख–घ–पुस्तकानां मूलभूतस्य पूर्वं सुनिश्चितस्य *इ–पुस्तकस्य स्वीकारे प्रबलप्रमाणोपन्यासेन दार्ढ्यं सम्पादयितुमेव अत्र प्रदत्तः। एकपुस्तकमूलकत्वं विना एतादृशाशुद्धं नैव सम्भवति।

२६१.२ ग॰ अवसानेऽप्रवृत्त्यापत्तेश्च। पं. ५.
क॰ख॰घ॰ अवसाने प्रवृत्त्यापत्तेश्च।

अत्र क–ख–घ–पुस्तकैः स्वीकृतः ' प्रवृत्त्यापत्तेश्च ' इति पाठो नैव युक्तः, इति प्रतिभाति। ' अणोऽप्रगृह्यस्य ' इत्यस्य प्रवर्तनेन सिद्धान्ते इष्टापत्तेः। अतः ' अवसाने ' इति शब्दोत्तरम् अवग्रहस्य सम्भावनां कृत्वा क–ख–घ–पुस्तकपाठोऽपि नञ्घटित एव मन्तव्यः। अवग्रहलेखनस्य बहुषु स्थलेषु विकल्पतया दर्शनात् *इ–पुस्तक–लेखनिकेन अत्रापि विकल्पः समाश्रितः तेनेदमशुद्धं सम्भाव्यते।

२६४.९ ग॰च॰ वेद*भाष्यकौस्तुभयोः*। पं. २३.
क॰ख॰घ॰ *भाष्यकौस्तुभयोः*।

अत्र क–ख–घ–पुस्तकैः ' वेद॰ ' इति शब्दः परित्यक्तः। ग–च–पुस्तकाभ्यां च स स्वीकृतः। यद्यपि ग–च–पुस्तकयोः मूलम् एकमेव *इ–पुस्तकम्, तथा च क–ख–घ–पुस्तकानामपि मूलमेकं *ई–पुस्तकम्। एवञ्च तुल्यबलयोः पक्षयोर्विरोधे इत्थं विभावयामः—

भाष्ये–पातञ्जलमहाभाष्ये अत्र ' सुबामन्त्रिते ' इति सूत्रे ' ऋतेन मित्रावरुणा ' (ऋक्. १.२.८) इति मन्त्रविषये न कोऽपि विचारः प्रदर्शितो दृश्यते। प्रत्युत

वेदभाष्ये तावत् सायणाचार्यैः बहुशो विस्तरेण विवेचनं कृतं दृश्यते। अतः अन्वय-व्यतिरेकाभ्यां प्रमाणाभ्याम् अत्र एतत् स्पष्टं दृश्यते, यत् अत्र वेदभाष्य° इत्येव पाठः वेदशब्दसहितोऽपेक्ष्यते।

अत्रेदं सम्भाव्यते:—सर्वेष्वपि शब्दरत्नपुस्तकेषु लेखनिकैः चकारवकारलेखन-व्यत्यासेन व्याकुलीकृतोऽयं ग्रन्थः। 'च'कारस्थाने 'व'कारः 'व'कारस्थाने च 'च'कारः, इति बहुशो दृश्यन्ते अस्य ग्रन्थस्य लेखनसमये लेखनिकानां प्रमादाः। अतः 'स्पष्टं चेदं वेदभाष्यकौस्तुभयोः' इत्यत्रत्य—चेदं-वेद°—शब्दयोः चकारवकारयोः सादृश्यदर्शनेन भ्रान्त्या अनवधानेन वा पौनरुक्त्यसम्भावनाकल्पनया 'भाष्यकौस्तुभयोः' इत्यक्षरानुपूर्व्याश्च सर्वत्र बहुशो दर्शनेन तथैव च अत्राप्यभ्युपगमात् क–ख–घ–पुस्तकानां मूलभूतेन *ङ–पुस्तकेनैव 'वेद°' इति शब्दः परित्यक्तः, स एव च पाठः यथायथं क–ख–घ–पुस्तकैः स्वीकृतः इति कल्पयितुं युक्तम्।

एवं च '*वेदभाष्यशब्दकौस्तुभयोः*' इति पाठ एव मूलग्रन्थत्वेन स्वीकार्यः, इति वयं विभावयामः।

२६६.१ (लघुशब्दरत्नपाठः) लघूच्चारणतरः। पं. १.
(प्रकाशितपाठः) ग्रन्थस्य त्रुटिः

प्रायः प्रकाशितेषु बहुषु *प्रौढमनोरमा*–पुस्तकेषु 'लघूच्चारणतरः' इति ग्रन्थो नास्ति। परम् अत्रैव *लघुशब्दरत्ने* 'लघूच्चारणतरः' इति प्रतीकं धृत्वा 'लघुतरोच्चारणः' इति व्याख्यानग्रन्थो दृश्यते। अतः अत्र *प्रौढमनोरमायाम्*, *सिद्धान्तकौमुद्यां* वर्तमानस्य 'लघुप्रयत्नतरः' इत्यस्य 'लघूच्चारणतरः' इति व्याख्यानग्रन्थः आवश्यकः, इति विभावयामः।

२६८.१ (ऋग्वेदपाठः) स्वर्चक्षा रथिरः .... पं. ८.
(*प्रौढमनोरमा*पाठः) स्वर्चक्षा रथिनः ....

प्रायः सर्वत्र प्रकाशितेषु *प्रौढमनोरमा*–पुस्तकेषु 'रथिरः' इत्यस्य स्थाने 'रथिनः' इति ग्रन्थ उपलभ्यते। कैश्चन तु 'रथिनः' इति पाठभेदत्वेनोपादीयते। तदुभयमप्यसङ्गतमेव। ऋग्वेदे (९.९७.४६) इत्यत्र 'रथिनः' इति ग्रन्थस्यैवोपलम्भात्। गुरुमुखपरम्परागतेषु एतादृक्षु च ग्रन्थेषु पाठभेदस्यासम्भवात्। सायणाचार्यैरपि वेदभाष्ये 'रथिरः' इत्यस्यैव स्वीकारात्। लौकिकभाषास्थं 'रथिनः' इति पदं जानता केनापि लेखनिकेन 'रथिरः' इत्यशुद्धं मत्वा तत्स्थाने 'रथिनः' इति प्रसिद्धस्य रूपस्य स्थापना कृता इति वयं विभावयामः।

२६८.१ ग.च. किञ्च दृहेरिव दृंहेरपि .... पं. २४.

क.ख.घ. किञ्च दृहेरिव दृहेरपि ...

अत्र क–ख–घ–पुस्तकैः स्वीकृतः पाठस्त्वशुद्ध एव। पुस्तकत्रयमूलभूत–*इ–पुस्तकलेखनिकेन अनवधानेन अनुस्वारः परित्यक्तः, तदेव च यथायथमनुसृतं क–ख–घ–पुस्तकलेखनिकैः। 'दृहेरिव दृहेरपि' इत्यस्य अर्थ एव नोपपद्यते, अतः असम्बद्धम्, अशुद्धं च तत्, इत्येतदपि तैः सामान्यतोऽपि न विमर्शितम्। किञ्च अत्रैव उत्तरत्र मूले 'यत्तु प्राचा व्याख्यातम्:—दृंहेरेवेदं निपातनम्' इत्यादि स्पष्टं निर्देशो वर्तते 'दृंहेः' इत्यस्य।

एवं स्थिते 'दृहेरपि' इत्यस्य स्थाने 'बृहेरपि' अथवा 'बृंहेरपि' इति पाठभेदः इति कल्पनायामपि सर्वात्मना असामञ्जस्यम्। "दृंहेरेवेदं निपातनम्। 'दृह वृद्धौ' इति तु प्रकृत्यन्तरम्। तस्य निष्ठायामागमशास्त्रस्यानित्यत्वात् इडभावे, 'वा द्रुह' (८.२.३३) इत्यत्र 'वा' इति योगविभागात् पक्षे घत्वाभावे, ढलोपे च प्रत्युदाहरणमिदं द्रष्टव्यम्; इति। तन्न। उभयोरपि निपातनाभ्युपगमात्। तदाह वामनः 'अथ दृहिः प्रकृत्यन्तरमस्ति। तस्याप्येतन्निपातनं नलोपवर्जम्' इति।

अनेन मूलग्रन्थेन एतत् स्पष्टं भवति, यदत्र नास्ति ईषदपि सम्बन्धः 'बृहेः' अथवा 'बृंहेः' इति पाठकल्पनायाम्, इति।

शब्दरत्नम् उत बृहच्छब्दरत्नम्

हरिदीक्षितकृतेः अस्य *शब्दरत्नस्य* नैकेषु आधुनिकेषु ग्रन्थेषु बहुत्र पठनपाठनवेलायां च '*बृहच्छब्दरत्न*' इति नाम्ना निर्देशः क्रियते। अतः एतदत्र विमर्शनीयम्, यत् अस्य ग्रन्थस्य नाम '*शब्दरत्न*' इति वर्तते; उताहो '*बृहच्छब्दरत्न*' इति। केन नाम्ना च पूर्वं साक्षात् ग्रन्थकर्त्रा अस्य ग्रन्थस्य निर्देशः कृतः, किमर्थं च तत्र विपरिवर्तनं सञ्जातमित्यादि।

अस्य ग्रन्थस्य बहूनां प्रकरणानामन्ते ग्रन्थकर्त्रा स्वयमेव ग्रन्थकर्तुर्ग्रन्थस्य च नैकवारं नामनिर्देशः कृतः। स चेत्थम्: —

"इति श्रीभट्टोजिदीक्षितपौत्रवीरेश्वरदीक्षितपुत्रहरिदीक्षितविरचिते *शब्दरत्ने*" इत्यादि इत्यादि।

अत्र सर्वत्र '*शब्दरत्न*' इत्येव ग्रन्थस्य नामनिर्देशो दृश्यते। न दृश्यते च कुत्रापि '*बृहच्छब्दरत्न*' इति निर्देशो हरिदीक्षितकृतः। अतः अस्य ग्रन्थस्य ग्रन्थकर्त्रा स्वयं प्रदत्तं नाम तावद् '*शब्दरत्न*' इत्येवासीत्, इति स्पष्टं भवति।

नागेशभट्टप्रणीतलघुशब्दरत्नानन्तरं हरिदीक्षितकृतस्य अस्य शब्दरत्नस्य 'बृहदुपपदपूर्वकशब्दरत्न' इत्यभिख्या बभूव, इति तु वक्तुं योग्यं तर्कसङ्गतं च। नागेशभट्टैश्च स्वकीये लघुशब्दरत्ने स्वगुरुहरिदीक्षितकृतस्य अस्य ग्रन्थस्य 'शब्दरत्न' इति नाम्नैव व्यवहारः कृतः। स चेत्थम्:—

(१) "विस्तरस्तु अस्मत्कृते शब्दरत्ने मदन्तेवासिकृते शब्देन्दुशेखरादौ च द्रष्टव्यः।" (स्वादिसन्ध्यन्ते भागे लघुशब्दरत्नस्य केषुचन पुस्तकेषु।)

(२) आलस्येनेति। अत्र केचिदित्यादिना मदुक्तया मूलस्थरीत्येति भावः। विस्तरस्तु अस्मत्कृते शब्दरत्ने मदन्तेवासिकृतशब्देन्दुशेखरमञ्जूषयोश्च द्रष्टव्यः। इति शुभम्। (लघुशब्दरत्नस्य पूर्वार्धस्यान्ते)

उपरिनिर्दिष्टेन उद्धरणद्वयेनैतत् स्पष्टं भवति, यद् नागेशभट्टैः यद्यपि स्वग्रन्थस्य 'लघुशब्दरत्न' इत्यभिख्या कृता तथापि स्वगुरुहरिदीक्षितकृतः स्वग्रन्थस्य मूलग्रन्थः 'शब्दरत्न' इति नाम्नैव व्यवहृतः, न पुनः 'बृहच्छब्दरत्न' इति नाम्ना।

एतत् सर्वं विमृश्य अत्र विषये अस्माकं तर्कः एवं प्रसरतिः—

नवीननामकरणविधिः

नागेशभट्टप्रणीतलघुशब्दरत्नानन्तरं नागेशभट्टशिष्यैः, इतरैश्च वैयाकरणैः लघुशब्दरत्न–शब्दस्थलघुशब्दस्य प्रतिद्वन्द्वितया 'बृहत्' इति शब्दः शब्दरत्नशब्दात् पूर्वं प्रयोक्तुं प्रारम्भः कृतः। स एव च 'बृहच्छब्दरत्न' इति शब्दः वैयाकरणकुले निरूढिं गतः। किञ्च मूलस्य शब्दरत्नस्य अद्यावधि साक्षादनुपलब्धेः, अध्ययनाध्यापनपद्धतितोऽपि निःसारणात्, टीकादिग्रन्थेषु 'बृहच्छब्दरत्न' इति नाम्नैव अस्य ग्रन्थस्य निर्देशोपलम्भात्, तदेवास्य मूलनाम इति प्रायो बहूनां विदुषां कल्पना बभूव अद्यापि वर्तते च। किञ्च केवलं 'शब्दरत्न' इति नाम्नैव यदि अद्यापि निर्देशः क्रियते, तर्हि तेन प्रायः नागेशभट्टकृत-लघुशब्दरत्नस्यैव बोधो भवति, इत्यपि नापरोक्षं विदुषाम्। अत एव च बहुत्र 'बृहच्छब्दरत्न' इति नाम्नैव अस्य ग्रन्थस्य व्यवहारो दृश्यते।

एवं स्थितेऽपि, अद्य साक्षात् उपलब्धे शब्दरत्नग्रन्थे, निर्णीते च विविधैः प्रमाणैः शब्दरत्नलघुशब्दरत्नयोर्भिन्नकर्तृकत्वे, ग्रन्थकर्त्रा स्वयं प्रदत्तेन, तच्छिष्यैः नागेशभट्टैश्च स्वकीये ग्रन्थे व्यवहृतेन 'शब्दरत्न' इति मूलेन नाम्नैव अस्य ग्रन्थस्य

व्यवहारः कर्तु योग्यः, आवश्यकः, तर्केतिहासप्रमाणसम्मतः, मूलग्रन्थसम्पादनशास्त्रानुमतश्च, इति वयं विभावयामः ।

' शब्दरत्नः ' उत ' शब्दरत्नम् '

' शब्दरत्नम् ' इति नपुंसकनिर्देश एव प्रायः सर्वैरप्यङ्गीक्रियते । रत्नशब्दानुसारं तद् योग्यं च । पायगुण्डे–वैद्यनाथैः *भावप्रकाशिकायां* कचित् कचित् *'शब्दरत्नः'* इति निर्देशोऽपि कृतः । अस्मिन् संस्करणेऽपि बहुत्र *' शब्दरत्नः '* इति प्रयोगः उपलभ्येत । तत्र 'रत्न'शब्दस्य नित्यनपुंसकतया पुंस्त्वप्रधानस्य *शब्दरत्न*शब्दस्य कथमुपपत्तिः, इति केषाञ्चन शङ्का सम्भवति ।

तत्रेयं व्यवस्थाः—

(१) शब्दाः एव रत्नानि यस्मिन् सः ग्रन्थः, इति अवधारणापूर्वपदो बहुव्रीहिः, अथवा शब्दाः रत्नानि इव यस्मिन् सः ग्रन्थः, इति उपमानोत्तरपदो बहुव्रीहिः । अन्यपदार्थत्वेन च ग्रन्थस्य ग्रहणम् ।

(२) अनयैव रीत्या बहुव्रीहिसमासे कृते तत्र अन्यपदार्थत्वेन पुस्तकशब्दस्य ग्रहणे तु नपुंसकत्वमप्युपपन्नं भवति ।

एवं च *' शब्दरत्न '*शब्दस्य अन्यपदार्थप्रधानत्वेन बहुव्रीहिसमासस्य स्वीकर्तव्यत्वात् पुंस्त्वनपुंसकत्वयोरविशेषात् 'रत्न'शब्दगतं नपुंसकत्वमाश्रित्य *'शब्दरत्न'*शब्दस्य नपुंसकत्वप्रतिपादने न किञ्चिदपि तात्पर्यम् । कर्मधारयसमासमाश्रित्य, अथवा षष्ठीतत्पुरुषं सप्तमीतत्पुरुषं वा आश्रित्य विग्रहे क्रियमाणे तु न किञ्चिदपि शब्दस्वारस्यं लभ्यते । प्रत्युत अस्वाभाविकमिव तत् प्रतिभाति; इति केचन मन्यन्ते ।

अपरे तु ' शब्दकौस्तुभः ' ' शब्देन्दुशेखरः ' इत्यादौ यथा अवधारणापूर्वपदम् उपमानोत्तरपदं वा कर्मधारयमाश्रित्य शब्दसिद्धिः क्रियते, तथैव ' शब्दरत्नम् ' इत्यत्राप्याश्रित्य नपुंसकत्वमेवास्यापि उचितम्, इत्याहुः ।

इदं चात्रावधार्यताम्ः—

यदा अस्माभिः *शब्दरत्नस्य* सम्पादनकार्यं प्रारब्धम्; तदा मूलग्रन्थसम्पादनविषये, पाठभेदस्वीकार–परित्यागविषये, लेखनपद्धतिविषये च येऽस्माकं विचाराः आसन्; तदनुसारेण अस्माभिः कार्यं प्रारब्धम् । उदाहरणार्थम्ः—

(१) प्राचीनपण्डिताः लेखनसमये अनुस्वारस्य परसवर्णविषये धातूपसर्गविषये सामासिकपदेषु च विकल्पमिच्छन्ति । तदनुसारमेव च अस्माभिस्तादृशेषु स्थलेषु प्रारम्भसमये विकल्पमाश्रित्यैव लेखनपद्धतिः स्वीकृता आसीत् । ततश्च तादृशलेखनविषये आक्षेपाः

केश्चन विद्वद्वरैः उत्थापिताः। अतः तदनन्तरमेव तं विषयं समूलमभ्यस्य परसवर्ण-विधिर्नित्यत्वेनैवाङ्गीकार्यः तादृशेषु स्थलेषु, इति निर्णयं प्रति सम्प्राप्ता वयम्[1]। अर्थात् तदनन्तरम् अस्माभिः अस्मिन् संस्करणे सर्वत्र नित्यत्वेनैव परसवर्णविधिः स्वीकृतः।

(२) एकस्मिन् वाक्ये आवश्यकत्वेन सन्धिकरणम् अनुस्रियते प्रायः सर्वैः पण्डितैः। अस्माभिस्तु नानुस्रियते स पन्थाः। तदर्थं च संहिताधिकारविषयं समूलमभ्यस्य एकवाक्ये अपरिहार्यतया सन्धिकरणमनावश्यकम्, इत्येव न; किन्तु अनुचितमेव, इत्यस्माभिर्निर्णयः स्वीकृतः[2]। तथैव च शब्दरत्नस्यास्मिन् संस्करणेऽपि लेखनपद्धतिः स्वीकृता।

किञ्चिदिव क्षम्यताम्

(३) इत्त्वम्, तत्त्वम्, इत्यादीनि इत्-शब्दात् तत्-शब्दात् च जायमानानि रूपाणि इत्वम्, तत्वम्, इत्येवमादिरूपेण लिख्यमानानि दृश्यन्ते क्वचित् क्वचित् प्राचीनपण्डितैः। तत्र च तकारेण सह वकारस्य दन्त्यमूलकं सावर्ण्यं स्वीकृत्य एकतकारलोपः, इति तेषां प्रक्रिया। तथैव च अस्माभिः पूर्वमपि स्वीकृतम् आसीत्। परं तन्न समीचीनम्[३]। किञ्च इकारस्य भावः इत्वम्, इतो भाव इत्त्वम्, इत्यनयोः तथैव च तकारस्य भावः तत्वम्, तस्य भावः तत्त्वम्, इत्यनयोश्च सुस्पष्टतया भेदं प्रदर्शयितुं द्वितीयोदाहरणेषु तकारद्वयलेखनमेव युक्ततरम्, इति तु सुस्पष्टमेव।

(४) पाठभेदचिकित्सायामपि पूर्वमस्माभिः ये मूलग्रन्थत्वेन पाठाः स्वीकृताः आसन्, तदपेक्षया अन्ये भिन्नाः पाठाः मूलग्रन्थत्वेन स्वीकर्तव्याः, इत्यस्माकं मतम् अनन्तरं सञ्जातम्। किञ्च अस्माभिः स्वीकृताः केचन पाठाः अयोग्या इत्यपि अस्माकं मतं सूक्ष्मतरेण पाठभेदचिकित्साशास्त्रस्यानुशीलनेन सञ्जातम्। अतः प्रस्तावनायां या पाठभेदचिकित्सा अस्माभिः कृता तस्याः अनुशीलनं कृत्वैव विद्वद्भिः, छात्रैः, टीकाकारैश्च शब्दरत्नस्यपाठभेदविषयकं स्वकीयं मतं प्रतिपादनीयम् इति।

---

1. See " Pāṇini and the Pāṇinīyas on परसवर्ण " paper read at the All India Oriental Conference, Gauhati 1965, and published in the Bhāratavāṇī Granthamālā, Poona.

2. See " Pāṇini and the Pāṇiniyas on संहिता ", paper read at the International Congress of Orientalists, New Delhi 1964, and published in the *Sukumāra Sen Volume of Indian Linguistics*. 1966.

३. 'झरो झरि सवर्णे' इत्यत्र न केवलं सावर्ण्यं विवक्षितम्, किन्तु सप्तम्यन्तोपात्तः सवर्णो झर् एवापेक्ष्यते।

टिप्पणीस्थाः स्थलनिर्देशाः

अस्मिन् संस्करणे पृष्ठस्याधस्तात् मूलग्रन्थोद्धृतानां तत्तद्ग्रन्थानां स्थलादिनिर्देशाः पाठकानाम् अवतरणोद्धरणादिविषयकज्ञानसौकर्यार्थं प्रदत्ताः । तत्र अनवधानात्, मुद्रणदोषवशात्, विशिष्य च ग्रन्थावृत्तिभेदेन निर्देशाङ्कव्यत्यासदोषसम्भावना वर्तते । तत्र प्रियपाठकवरैः क्षमाशीलैर्भाव्यम्, इत्येवाभ्यर्थयामहे । किञ्च तत्र बहुप्रचाराः अष्टाध्यायीसूत्राणां निर्देशाः प्रतिपत्रं नैकवारं वर्तन्ते । तेषां प्रथमतः *अष्टाध्यायीसूत्रपाठा*नुसारं स्थलनिर्देशः, अनन्तरं च भट्टोजिदीक्षितकृत*सिद्धान्तकौमुदी*स्थसूत्रक्रमाङ्कनिर्देशः प्रदर्शितः । अतः स्थलद्वयप्रदर्शनेन तन्निर्देशप्रसङ्गे क्वचित् क्वचित् दोषाणां विशेषतः सम्भावना । किन्तु अल्पेनैव प्रयत्नेन सुज्ञेयत्वात् तेषां शुद्धीकरणे न किमपि विशिष्य तात्पर्यं पश्यामः ।

पातञ्जलमहाभाष्यस्य स्थलनिर्देशविषये तावत् यत्र सौकर्यार्थं नितान्तमावश्यकता वर्तते तत्रैव कीलहॉर्नसम्पादित*महाभाष्या*वृत्त्यनुसारं भाग-पृष्ठ-पङ्क्तिरूपेण निर्देशः प्रदर्शितः; अन्यत्र तु साक्षात् पतञ्जलिस्वीकृतपद्धत्यनुसारम् अध्याय-पाद-आह्निक-सूत्रात्मक-अङ्कचतुष्टयरूपेण निर्देशाः प्रदर्शिताः । यद्यपि द्वितीया स्थलनिर्देशपद्धतिः नातिनिरूढप्रचारा अथापि सैव पतञ्जलिसम्मता, इति *पातञ्जलमहाभाष्यत* एव स्पष्टं ज्ञातुं शक्यते ।

वाक्यपदीय–लौकिकन्यायाञ्जलि–भाट्टदीपिका–श्लोकवार्त्तिकादीनां महत्त्वपूर्णानाम् अथापि विरलप्रचाराणां ग्रन्थानां स्थलनिर्देशादिविषये तु विशेषतः प्रयत्नाः कृताः ।

ऋणनिर्देशः

अस्य बृहतः *शब्दरत्नस्य* प्रकाशनकार्ये नैकेषां साहाय्यं सञ्जातम् । तत्र माननीयैः डॉ. सुमित्रमङ्गेशकत्रेमहोदयैः अस्य ग्रन्थस्य सम्पादनकार्ये मार्गदर्शनं कृत्वा प्रकाशनकर्मणि च विविधैः प्रकारैः साहाय्यं दत्त्वा अहमत्यन्तमुपकृतोऽस्मि । १९६१ तमे संवत्सरे भारतशासनद्वारा आर्थिकं साहाय्यं सम्प्राप्य प्रकाशनकार्यं यदा साक्षात् प्रारब्धम्, ततःप्रभृति अद्य यावत् पञ्चवर्षाभ्यधिककालपर्यन्तं सततं तेषां मार्गदर्शनं वर्तते । इदं *शब्दरत्नस्य* चिकित्सितावृत्तिसम्पादनाख्यं कार्यम् अत्यन्तं क्लिष्टं जटिलं गवेषणापद्धतिमन्त्रतन्त्रमात्राधीनं दीर्घपरिश्रमसाध्यं चासीत् । तत्रापि डॉ. कत्रेमहोदयानां सततं दृष्टिरासीत् ।

तथैव अस्य ग्रन्थस्य सम्पादनशास्त्रीयचिकित्सापद्धतिमाश्रित्य लिखितायाः प्रस्तावनायाः प्रमुखाधारभूतं डॉ. कत्रेमहोदयानां पुस्तकमेवासीत्। सत्स्वपि अन्येषु चिकित्साशास्त्रीयेषु पुस्तकेषु सन्दर्भादिप्रदानार्थं स्वकीयविवेचनस्य प्रामाणिकतां प्रदर्शयितुं च *Introduction to Indian Textual Criticism* इत्यस्यैवात्र बहुशः उपयोगः कृतः। अतस्तेषामत्यन्तमुपकृतिभरान् वहामि। किञ्च अस्य ग्रन्थस्य अत्यन्तं महत्त्वपूर्णं पुरस्कारं विलिख्य डॉ. कत्रेमहोदयैः अयं ग्रन्थो गौरवितः अहं च अधमर्णीकृतोऽस्मि। अतः कथं वा डॉ. कत्रेमहोदयानामानृण्यं सम्पादनीयम्, इति तु नाहं जाने।

अस्य ग्रन्थस्य चतुर्थे परिशिष्टे अस्माभिः चिकित्साशास्त्रीयपरिभाषाकोशः सम्पादितः। तस्मिन् कर्मणि च नैकविधपारिभाषिककोषकार्यकरणेन प्रथितयशसां डॉ. ना. गो. कालेलकरमहाभागानां साहाय्यं सञ्जातम्। अतस्ते नितान्तं धन्यवादानर्हन्ति। डॉ. मु. ग. पानसेमहाभागैः प्रस्तावनाविषये तथैव परिशिष्टादिविषये च उपयुक्तसूचनाप्रदानेन उपकृतोऽयं जनः, अतस्ते धन्यवादार्हाः।

अस्य ग्रन्थस्य मुद्रणकार्यविषये विविधैः प्रकारैर्विमर्शं कृत्वा समये समये च मुद्रितवाचनकर्मणि साहाय्यं दत्त्वा डॉ. म. मं. पाटकरमहाभागैः अहमत्यन्तमुपकृतोऽस्मि। अतस्ते नितान्तं धन्यवादानर्हन्ति। अस्य बृहतः शब्दरत्नस्य मुद्रणकार्यं तु कठिनम् अत्यन्तमायासकरं चासीत्। एतत् कार्यं वेदविद्यामुद्रणालयसञ्चालकैः श्रीमद्भिः सरदेसाईमहाभागैः समीचीनया रीत्या कृतम्, अतस्ते नितान्तं धन्यवादान् अर्हन्ति।

अस्य ग्रन्थस्य यथावन्मुद्रणविषये शुद्धतासम्पादनविषये च अस्माभिः यावच्छक्यं प्रयतितम्। तथापि तत्र काश्चन त्रुटयो वर्तन्ते एव। एतासु त्रुटिषु काश्चन अनवधानमुद्रणादिदोषवशात् सञ्जाताः, 'गच्छतः स्खलनम्'न्यायेन काः अपि शास्त्रीयाश्च भवितुमर्हन्ति। तत्र क्षमाशीलैः विद्वद्वरैः पाठकैः क्षन्तव्योऽयं जनः, शास्त्रीयत्रुटिप्रदर्शनेन अनुग्रहीतव्यश्च इति सम्प्रार्थ्य विरमति——

गणेशचतुर्थी }
१८८८ }

विदुषां वशंवदः
जोशी वेङ्कटेशः

प्रौढमनोरमा-शब्दरत्नम्

पञ्चसन्ध्यन्तः प्रथमो भागः